क्त्वा चरन्ति सत्सुखं॥ इति तेनोदितं श्रुत्वा सुप्रियोभिप्रबोधितः॥ सत्यमेवं परिज्ञाय वरत्नप्राभिनन्दितः॥ ततश्चागत्य जले पश्यद्दीपाद्भवप्रदीप्रिताः॥ ताः समीक्ष्य पुरस्तस्य
मघस्य संन्यवेदयत्॥ अत्र जले प्रपश्यामि दीपानिव प्रदीप्रितान्॥ केनात्र रंजितं साधो तन्निमित्तं समादिश॥ तन्निशम्य मघस्तं च सुप्रियं विस्मयान्वितं॥ महावीर्यं समुत्साहं सं-
पश्यन्नेवमब्रवीत्॥ वत्सात्रास्ति जले सन्ति महौषध्योभिरादीप्रिताः॥ एतत्प्रभावानुभावेन सर्वं जलं प्रदीप्रितं॥ तत्रौषधीः समादाय भिषग्द्वराः प्रमोदिताः॥ सर्वेषां सर्वरोगानि प्रशाम्यो

३८ नेऽस्यं त्वयि ॥ वर्तंते तानि निमित्तानि दुर्ज्ञानानि यतो न हि ॥ गमनं बदरद्वीपे प्रतिजानाम्यहं खलु ॥ एतत्तत्समुपादिष्टं नियम्य सुप्रियो मुदा ॥ सार्थवाहं मघं प्रश्नं भूयोप्येवमभा
सुप्रि षत ॥ कदात्र बदरद्वीपयत्र नाम्नं भविष्यति ॥ सूनो गम्य कियद्दूरे तत्समुपाख्यातुमर्हति ॥ इति तत्प्रार्थितं श्रुत्वा समघः सुप्रियं चतं ॥ महासत्त्वं महावीर्यं सम्प्रश्नत्रेवमब्र
वीत् ॥ मयापि बदरद्वीपं सर्वथैवाभिदृश्यते ॥ अतिकान्तसार्थवाहानां वृद्धानां श्रुतमेव हि ॥ इतस्तीरं समुत्तीर्य्य पश्चिमाभिमुखो व्रजेत ॥ एवमेतत्समाख्यातं सार्थवाहैः श्रुतं मया ॥
एतदेव कथित्वा समघस्तूष्णीं व्यवस्थितः ॥ घोरवेदनाक्रान्तः सर्वांगपरिपीडितः ॥ तमेवं रोगिनं दृष्ट्वा सुप्रियः सोऽपि देवता ॥ ध्यात्वा तु स्मृत्वा संतत्त्व प्रार्थये देवमादरात ॥ र
क्षेमं स्वामिनं नाथं क्षमस्वेनो पराधतां ॥ एवं तत्प्रार्थितं श्रुत्वा समघः सुप्रियं वदत ॥ असह्य वेदना वत्स प्रादुर्भूतानतो मम ॥ तदेषा नीयतां नौका तीरे त्रसां प्रतं लघु ॥ वेत्र ३५९
पाशेन वद्धो मां नावं मे देहमर्चय ॥ प्राणमुक्तमिदं काय्यं संजहत्व यथाविधि ॥ अवश्यं भाविनो भावा भवन्ति सर्वदेहिनां ॥ तन्मे त्र शोचतां कृत्वा मा भव दीनमानसः ॥ स्वेनं त्था
पितं श्रुत्वा तथा स सुप्रियस्ततः ॥ तीरे नीत्वा व वन्धासौ वेत्रपाशेन तं प्लवं ॥ तत्रान्तरे मघो ध्यात्वा स्मृत्वा रत्नत्रयं मुदा ॥ कालधर्माभिसंयुक्तः कार्यं त्यक्त्वा दिवं ययौ ॥ ततः का

मृतं मत्वा तं मेघं सुप्रियः स्थले ॥ प्रतिस्थाप्य समभ्यर्च्य वह्निना समदाहयत् ॥ ततस्तदस्थि संगृह्य क्षिप्त्वा वाहयन् महोदधौ ॥ ततस्तच्छोकमुस्कित्वा सर्वं समचिन्तयत् ॥
इदं पोतं समारुह्य कुत्र यास्यामि संप्रतं ॥ दैवेन प्रेरितो यत्र तत्राभिसंसरे यदि ॥ सर्वं विचिन्त्यमानस्य सुप्रियस्य महामतेः ॥ तत्पोतस्तीव्रवेगेन वायुनापहतो भ्रमन् ॥ ते
दपहृतमग्रेन वायुनावीक्ष्य सुप्रियः ॥ धैर्यैः पोतं समारुह्य प्राचरत्पश्चिमां दिशं ॥ तत्र पार्श्वे च रत्नमयस्य पर्वतस्य स्थले ॥ संप्रयातो महाटव्यां प्रचचार विलोकयन् ॥ तत्र
स फलमूलानि भक्षमाणो व्रजन्नतः ॥ अनेकयोजनातीत्य श्लक्ष्णां ददर्श पर्वतं ॥ तं प्रोच्चतरं प्रेक्ष्य सोऽभिगतस्तदन्तिकं ॥ अविरोढुं सुवीर्योऽपि न शशाक कथंचन ॥ तत्र
समधुनालिप्य पादौ समभिरुह्य तं ॥ गतं ततो वनीरागोऽपि गच्छन् सुरम्यारण्यतः ॥ तत्र फलानि मूलानि भक्षन् सम्प्रासर्जततः ॥ अनेकयोजनानीत्य ददर्श नगमुच्चकं ॥ तमभिरो
दुमुद्दीक्ष्य निःसरणं समन्ततः ॥ भ्रमन्नार्ग्य मार्गमाणोऽसौ कुत्रचिन्नाप्यपश्यत ॥ तत्र मार्गमलब्ध्वा स विषादपरितापितः ॥ तच्छिन्नयापरीतात्मा निद्राहतेन्द्रियोऽभवत् ॥ तदा तस्मि
न्नगे यक्षो नीलाद्येन्तामतिष्ठति ॥ स तं निद्रावशीभूतं समीक्ष्यैवं व्यचिन्तयत् ॥ पुरुषोऽयं महासत्त्वो बोधिसत्त्वः सुवीर्यवान् ॥ सर्वसत्त्वहितोत्साही सद्धर्मश्री सुखार्थभृत ॥ एता

र्थमिहप्राप्यातः परिखिन्नः श्रमैर्भिर्खेदितः ॥ तदहमस्य साहाय्यं कल्पये यमिहाधुना ॥ एवं निश्चित्य नीलाद्रौ यक्षस्तस्मिन्स्वप्नमूर्छिते ॥ तत्पुरः समुपाश्रित्य संपश्यन्नेवमब्रवीत् ॥ अत्रै
व त्वमितो गत्वा योजनं पश्य पर्वतं ॥ त्रीणि शृंगाणि दिव्यान्ते महदुच्चतराणि हि ॥ तत्र वै त्रिशृंगानामत्वा संक्रमस्व समारुहन् ॥ एवं प्रोक्त्वा स नीलाद्रिं तं सुप्तं प्रबोधयत् ॥
ततोन्तर्हिते तस्मिन्ते स्थित्वा पश्यन्समाश्रयत् ॥ तत्स्वप्नप्रबुद्धः स सुप्रियः प्राभिनन्दितः ॥ ततः सोभिभ्रमन्स्त्रीणि शृंगाणि समपश्यत ॥ तत्र वै त्रिशृंगानां मध्यपर्वतं तं स
मारुहत् ॥ तत्र सुवीर्यवान्पश्यन्नेव हृष्टः समाहितः ॥ ततः संप्रस्थितो भूयो ददर्शी स्फाटिकं नगं ॥ तत्र समीक्ष्य मनुष्याणामगम्यं महदुन्नतं ॥ समन्ततो भ्रमन्स्तत्र मार्गसोपानाल ३६०
भन्कचित् ॥ तत्र मार्गमपश्यन्स तदभिरोहणाय हि ॥ व्यवतस्थाव हेमात्रं तच्चिन्ताभिहताशयः ॥ तत्राग्रेभिस्थितो यक्षश्चन्द्रप्रभाभिधो महान् ॥ स तं चिन्ताहतात्मानं समीक्ष्यैवं
व्यचिन्तयत् ॥ प्रहृष्येयं महासत्त्वः सर्वसत्त्वहितार्थभृत् ॥ संसाधितुं महत्पत्न्यमिहायातो सुदाधुना ॥ एष मार्गमिहालब्ध्वा चिन्तापरोभिनिष्ठते ॥ तदस्याहं समाश्वास्य मार्गं संदर्शयेयु
ना ॥ इति संचिन्त्य यक्षः स तं समेत्य पुरः स्थितः ॥ समाश्वास्य प्रसन्नात्मा संपश्यन्नेवमब्रवीत् ॥ सत्वधीमान्न विषीद त्वं संचरस्व समाहितः ॥ कोशमात्रमितो गत्वा दक्ष्य सिच्चान्दनेव

नं॥ तत्र च संचारन्यस्य विद्यते महती शिला॥ तां समुत्थाप्य वीर्येण पश्यसि महतीं गुहां॥ तस्यां प्रभास्वरी नाम संविद्यते महौषधीः॥ तां पंचगुणसंपन्नां समीक्षादाय संव्रज॥ तस्या
गुणप्रभावेन कायेन त्वं क्रमेन्न हि॥ अवतीर्णं न लप्स्यन्ते सर्वे दुष्टाः सुरादयः॥ बलवीर्यसमालोकं सततं भेद्योदधावितं॥ तत्रां हि त्वा प्रयाहि त्वं श्रीसोपानं च प्रेक्ष्यसे॥ तत्र ते
न च तु रत्नसोपानेन समारुह्य॥ स्फटिकपर्वतं स्वस्ति संक्रम त्वं विलोकयन्॥ ततो वनरत्नो भूयः सान्नद्रक्ष्यति स्वौषधिः॥ तस्यास्त्वयानकर्त्तव्यं शोकवैषादरोदनं॥ एतत्खलु
प्रभोयक्षः सुप्रियं तं महामतिं॥ समनुज्ञाप्य संपश्यन्नतः सोन्तर्हितो व्रजन॥ तच्छ्रुत्वा सुप्रियो धीमान्समभिबोधितस्ततः॥ प्रयानश्चन्दनेरण्ये ददर्श महतीं शिलां॥ तां स
मुत्थाप्य वीर्येण सोमैक्षत महद्गुहां॥ तत्र सवीक्ष्य सोऽद्राक्षीत्प्रभास्वरां महौषधिं॥ तां समादाय निर्यातो महाबलोति वीर्यवान्॥ तत्राभिलोकयन्रत्नसोपानमभ्यपश्यत॥ ततः
ससुप्रियस्तेन प्रारुह्य स्फटिकं नगं॥ यक्षदेशितमार्गेण प्रचचाम समाहितः॥ ततो वतीर्य संचरन् प्रचचार महीतले॥ ततः सोन्तर्हिता तस्य प्रभास्वरा महौषधिः॥ तत्र
संप्रस्थितो पश्यन्सौवर्णं नगरं च सः॥ आरामोद्यानसंपन्नं पुष्करिणीसमावृतं॥ तं दृष्ट्वा सम्प्रयातस्य द्वारमुपगतः पुनः॥ अपश्यन्निर्जनं शून्यं दृष्ट्वा यानेसमाश्रयन्॥ त

भद्र
सुपि

उपस्थित्वा विषमात्मा ध्यात्वैवं समचिन्तयत् ॥ यदिदमिह पश्यामि तदपि शून्यकं खलु ॥ कदाहं वदरद्वीपं प्राप्य फलं पश्यामि वाञ्छितं ॥ एतच्चिन्तापरीतात्मा मिद्रोगताभिनिद्रि-
तः ॥ तं समीक्ष्य महासत्त्वमेवं चिन्ताकुलाशयं ॥ मापूर्वं देवताप्रात्तः समेत्यैवमभाषत ॥ साधु साधु महासत्त्व धैर्यमालंब्य पश्य मां ॥ नवमनेऽभिनन्दार्थं समाश्वासितुमागतां
॥ सर्वकान्तारदुर्गाणि निस्तीर्णानि त्वयाधुना ॥ संप्राप्तो वदरद्वीपपत्तनं सम्प्रसीदतत् ॥ संगोप्याश्रयन्तेन सर्वेन्द्रियाणि सर्वतः ॥ सुस्मृतिं मनसा धृत्वा संचरत्स्व स-
माहितः ॥ अत्र रत्ननगरद्वारं गत्वा समभिलोकयन् ॥ तत्कपाटे त्रिधा कीलं सतिष्ठत्व समाश्रितः ॥ ततोऽपि किन्नरी कन्याश्चतस्रो प्रीतिसन्निभाः ॥ निर्गत्यैव सु- ३६१
सुभद्राङ्गाः कलाविद्याविचक्षणाः ॥ ताः सर्वा मणिद्वारमुपात्वां समीक्ष्य प्रमोदिताः ॥ वशीकर्तुं समानस्य वंदिष्यं रेव मादरात् ॥ स्वागतं भो महासत्त्व समेहि नोऽभिनन्दय ॥ अस्मा-
कं पतीनां हि भर्त्ता स्वामी पतिर्भव ॥ पश्येमानि सुरम्याणि रत्नहाणि मन्दिराणि च ॥ सम्पश्यन्नेषु सर्वेषु संरमस्व यथासुखं ॥ एवं ताः किन्नरीकान्ताः सर्वा अपि पुरः स्थि-
ताः ॥ समीक्ष्य त्वां वशीकृत्य प्रेर्ययुः रमितुं सदा ॥ तदा त्वं तासु सर्वासु मानसं ज्ञानं समाहितः ॥ समुपस्थाप्य संपश्यन् सद्धर्मं समुपादिश ॥ तद्धर्मामृतं पीत्वा सर्वास्ता अ-

पि बोधिताः ॥ श्रीसंप्रदं महारत्नं अथ चेद्युः प्रसादिताः ॥ तन्महारत्नमादाय समभिपृच्छ तद्गुणान् ॥ तद्गुणांस्ते समाख्यायुः सर्वास्ताः संप्रसादिताः ॥ यथाताभिः
समाख्यातं संश्रुत्वा त्वं समाहितः ॥ तथा कृत्वा जगत्सर्वं सर्वार्थैरभिनन्दय ॥ ततो व्रज द्वितीयं च किन्नरीनगरं तथा ॥ गत्वा तत्रागारद्वारे त्रिधा कोषाद्युपाश्रय ॥ त
तो हैको किन्नरीकन्या निर्गच्छेत् सुरूपोपमाः ॥ पूर्वातिसुन्दराः कान्ताः कलाविद्याविचक्षणाः ॥ ता अपि सकलास्तास्त्वां समीक्ष्याभिनन्दिताः ॥ वशीकर्तुं प्रयत्नेन बोध
यिष्यन्ति पूर्ववत् ॥ तास्त्वपि जननीसंज्ञामुपस्थाप्य समाहितः ॥ सद्धर्मं समुपाख्याय सर्वास्ताः संप्रसादय ॥ तद्धर्मामृतं पीत्वा सर्वास्ताः संप्रसादिताः ॥ पूर्वोक्तं
महारत्नं संप्रदास्यन्ति ते ध्रुवं ॥ तत्समीक्ष्य समादाय ताः परिपृच्छ तद्गुणान् ॥ तद्गुणांस्ताः समाख्याय नन्दयिष्यन्ति ते मनः ॥ यथाताभिः समाख्यातं तथा कृत्वाभिनन्द
य ॥ सर्वांस्तान्परीष्टार्थैः संतोषय सुखं चर ॥ ततो गच्छ तृतीयं च किन्नरीनगरं तथा ॥ पश्चात् समेत्य तद्द्वारं त्रिधा कोषाद्युपाश्रय ॥ ततश्च निर्गताः कान्ताः षोडशकि
न्नरात्मजाः ॥ दिव्यरूपाः शुभांगाः सर्वकलाविचक्षणाः ॥ ताश्च सर्वाः समीक्ष्य त्वां प्रीतिक्रीडानुरागिताः ॥ वशीकर्तुं प्रयत्नेन नन्दयिष्यन्ति ते मनः ॥ तास्त्वपि भगिनीसंज्ञा

भ८
सु७

मुपस्थाप्य समाहितः ॥ सद्धर्मं समुपाख्यातैस्ताः सर्वा अभिबोधय ॥ ततः धर्मामृतं पीत्वा सर्वास्ता अभिबोधिताः ॥ महारत्नं प्रदास्यन्ति भद्रश्री सुखसंप्रदं ॥ तत्संप्रदत्तं समादाय
संपूज्य तद्गुणानिताः ॥ तद्गुणानि समाख्याय ऊर्ध्वं स्वास्ते भिबोधनं ॥ ताभिर्यथा समाख्यातं तं तथा हृत्वा समाहितः ॥ वाञ्छितार्थैर्निगान्सर्वान्संतोष्याभिनन्दय ॥ ततस्ते वाञ्छितं स
र्वं संसेवस्व तेप्रसाधितं ॥ ततः श्रीसर्वसंपत्तिसमापन्नः सुखेच्छ ॥ ततो गच्छ चतुर्थं च किन्नरनगरं तथा ॥ गत्वा समीक्ष्य तद्द्वारं त्रिधा कोष्ठ भूपाश्रय ॥ ततोपि च निश्चरी ध्व
नि हात्रिंशत्किन्नरात्मजाः ॥ रतिरूपा रमाकाराः सर्वकलाविचक्षणाः ॥ ता अपि त्वां समीक्ष्य नत्यः सर्वाः समन्तमोदिताः ॥ वशीकृत्य समीक्ष्ये पुरमितं सर्वदा सुखं ॥ तास्त्वपि त्वं स ३६२
तासंज्ञामुपस्थाप्य समाहितः ॥ सद्धर्मं समुपाख्याय सर्वास्ता अभिबोधय ॥ तास्ते धर्मामृतं पीत्वा सर्वाः समभिबोधिताः ॥ प्रदास्यन्ति महारत्नं भद्रश्री सुखसंप्रदं ॥ तत्संप्रदत्त
समादाय सर्वाश्चो कान्समीक्षितैः ॥ सर्वद्रव्यैः समापन्नान्कृत्वा समभिनन्दय ॥ एतद्धर्ममहत्कीर्तिं श्रीभद्रार्थसमृद्धिमान् ॥ सर्वसत्त्वहितं कृत्वा संचारस्व सदा सुखं ॥ ततस्ते सं
स्पतेः सर्वं समभिसाधितं ध्रुवं ॥ एतत्कर्मविपाकेन बोधिमपि समाप्नुयात् ॥ एवं सा देवतास्तस्मै सुप्रियाय यथाक्रमं ॥ सद्धर्मसाधनं धर्ममादिश्यान्तर्हिताभवत् ॥ एतत्सर्वं समाक

गपि सुप्रियैः संप्रसादितः ॥ प्रतिबुद्धः समुत्थाय प्रातरेवं व्यचिन्तयत् ॥ अहो सा देवतोपेत्य स्वप्ने मामेवमादिशत् ॥ एतत्सत्यं भवेन्नूनं तज्ज्ञात्वाहं विलोकये ॥ इति संचिन्त्य धी
मान्स तं सुवर्णनगरं गतः ॥ तद्द्वारमुपसंक्रम्य त्रिधा कोट्याभ्युपाश्रयत् ॥ ततोऽभिनिर्गताः कन्याश्चतस्रः किन्नरात्मजाः ॥ दिव्यातिसुन्दराः कान्ता कलाविद्याविचक्षणाः ॥ ताः
सर्वास्तं महासत्त्वं समभीक्ष्याभिनन्दिताः ॥ पुरतः समुपाश्रित्य पश्यन्त्य एवमूचिरे ॥ स्वागतं ते महासत्त्व कच्चित्सर्वत्र कौशलं ॥ समेत्य त्वं परं स्माकं मम पतीनां पतिर्भव ॥ इ
मानि यत्पुरस्थानि गृहाणि मन्दिराणि च ॥ संपन्नान्नेषु सर्वेषु संरमस्व यथासुखं ॥ एतान्यपि च सर्वाणि समीक्ष्यास्माहर ॥ सुरसपथ्यभोग्यानि पानानि विविधानि च ॥ विवि
धानि सुवस्त्राणि दिव्याभिशोभितान्यपि ॥ भूषणान्यपि सर्वाणि सन्त्येतानि भवन्तु ते ॥ धनद्रव्याणि सर्वाणि रत्नानि सकलान्यपि ॥ नवाधीनानि सर्वाणि प्रपश्यन् गृहाणि सन्त्र
ते ॥ उद्यानान्यपि विद्यन्ते सर्वर्तुपुष्पमण्डितैः ॥ सर्वौषधिफलानम्रैर्द्रुमैः संशोभितान्यलं ॥ पुष्करिण्योऽपि विद्यन्ते पद्मश्रीतास्तु पूरिताः ॥ हंसादिपक्षिभिः पूर्णाः पुष्पैः पद्मोत्प
लादिभिः ॥ तासु स्नात्वा यथाकामं भुक्त्वा भोग्यं सपानकं ॥ अस्माभिः सह संक्रीडरममानः सुखं चर ॥ एवं ताः किन्नरीकन्याः सर्वा अपि पुरः स्थिताः ॥ समीक्ष्य तं वशीकर्तुं प्रार्थय

भद्र
सुप्रि

नुमितुं सदा ॥ एवं संप्रार्थितैस्ताभिः श्रुत्वा स सुप्रियः सुधीः ॥ जननीरिव ताः सर्वाः पश्यन्स्वस्थो समाहितः ॥ अथ ताः सकलाः कान्ताः सुप्रियन्तं महामतिं ॥ श्रुत्वा प्रावेशयन्स्तत्र सौव
र्णे नगरे मुदा ॥ प्रवेश्य तत्र प्रासादे सममभिरोप्य शोभिते ॥ स्वासने संप्रतिष्ठाप्य प्रेक्षन्त्य उपतस्थिरे ॥ तत्र स सुदृशा पश्यन् सर्वास्ताः समुपस्थिताः ॥ दशपापान्विनिर्मुह्य कुशलान्
दशप्रादिशत ॥ शारीरं त्रिविधं पापं वाणीभवं चतुर्विधं ॥ त्रयं मानसिकं तद्वद् दशाकुशलिकं स्मृतं ॥ प्रादत्तादानहिंसा च काममिथ्या शरीरजं ॥ दीनस्त्वल्पायुषो वामाहीनमनेत्रेच
दुर्गतिः ॥ मृषावादश्च पैशुन्यं क्षोडं भिन्नं च वाचिकं ॥ कुष्ठकाय्यश्च मूर्खश्च भ्रान्त्यमानाजनोस्मितः ॥ अभिध्या च परद्रोहं मिथ्यादृष्टिश्च मानसं ॥ सर्वाप्रियस्तद्वोहत्वं हीनाङ्गं नरक
लं विदुः ॥ तानि त्यक्त्वा संचरध्वं कुशलान्दश मातरः ॥ सुकृतानीर्विकाघूर्णं संपन्नाः सुगतोद्भवे ॥ कामाश्रयान्प्रवेद्भेक्तान्स माख्यायाभिबोधयन् ॥ सर्वसत्वहिताधानं सद्धर्मं समुपादि ३६३
शत ॥ तास्तद्धर्मामृतं पीत्वा सर्वाः समनुबोधिताः ॥ संतुष्टास्तं महासत्वं प्रेक्षन्त्य एवमब्रुवन् ॥ धन्योसि त्वं महासत्व यत्सुवापि सुधीरकः ॥ नैव कामगुणारक्तः सद्धर्मगुणलालसः ॥ ए
वं ताः सकलाः कन्याः समाख्यायाभिनन्दिताः ॥ सो भासनं महात्मं सुप्रियायदत्सुदा ॥ समीक्ष्य तं महात्मं सुप्रियः सोभिनन्दितः ॥ समासायाभिपश्यन्स्ता तद्गुणं पर्यपृच्छत ॥ भो

भगिन्योऽस्य रत्नस्य कोऽनुभावः प्रचक्ष्यतां ॥ एतत्कृपानुभावेन कुर्या सर्वार्थसाधनं ॥ एवं तत्भाषितं श्रुत्वा सर्वा स्ताः संप्रसादिताः ॥ तस्मै तस्य सुरत्नस्य प्रभावं समुपादिशत् ॥ महासत्वा
स्य रत्नस्य प्रभावं महत्तरं ॥ समभिवांछितं सर्वं संपूरयेदयं यतः ॥ तस्मात्त्वात्वा पश्चाद्दक्षिणामुपोषधव्रतं चरेत ॥ इदं ध्वजाग्रे वारोप्य प्रार्थयस्व समीहितं ॥ तदा योजनविस्तारं सा
मन्तकं निरन्तरं ॥ यथाभिवांछितं द्रव्यं सर्वं तथाभिवर्षयेत ॥ इत्यस्यानुभावं हि मत्वा धृत्वा समाहितः ॥ समभिप्रार्थितैर्द्रव्यैः सर्वान् समभितोषया ॥ दत्वा दानं सदार्थिभ्यो
भुक्त्वा भोगं यथेप्सितं ॥ स्वयं चान्ससदा भद्रे लोकानपि प्रचारय ॥ एवं तत्भाषितं श्रुत्वा तथेति स प्रमोदितः ॥ तदनुज्ञां समासाद्य ततोऽचरद्विलोकयन् ॥ १ ॥ ततः स प्रचर
न्नाराद्दृष्ट्वा मयं महत्तरं ॥ कैन्नर्यं नगरं तं च संपश्यन् समुपाचरत् ॥ तद्दृष्ट्वानन्दितात्मा स संपश्यन् समुपासरत् ॥ प्रेक्ष्य तन्नगरद्वारं त्रिधा कोशाभ्यतिष्ठत ॥ तदा ष्टौ किन्नरीक
न्यारतिरूपातिसुन्दराः ॥ निर्ययुः श्रीसुभद्रांशाः सर्वकलाविचक्षणाः ॥ सर्वास्तास्तं समालोक्य समभिनन्दिताशयाः ॥ संमुखं समुपस्थित्वा पश्यन्त्य एवमब्रुवन् ॥ स्वा
गतं भो महासत्व कच्चित्ते कौशलं ननो ॥ समेहीदं मनोरम्यं पश्य रूप्यमयं पुरं ॥ इत्युक्त्वा तं पुरे नीत्वा प्रासादे ताः समादरात् ॥ स्वासने संप्रतिष्ठाप्य पश्यन्त्य एवमब्रुवन् ॥ अ

भद्र स्माकमपतीनां हि भर्त्ता स्वामी पतिर्भवेत्॥ प्रविश्यात्र समीक्षस्व सर्वत्र संचरन् क्रमात्॥ प्रासादान्यत्र विद्यन्ते रम्याणि मन्दिराणि च॥ एष्वस्माभिः सहारक्तः संरमस्व सदा सुखं॥
बुप्रि आरामाणि च संत्यत्र सर्वर्तुपुष्पितैर्द्रुमैः॥ सुपथ्यफलवृक्षैश्च संशोभितानि सर्वदा॥ पुष्करिण्योऽपि संत्यत्र शुद्धशीताम्बुपूरिताः॥ सर्वैर्जलरुहैः पुष्पैः संशोभिताश्च प
क्षिभिः॥ सर्वाणि सन्ति भोग्यानि पानानि विविधान्यपि॥ भुंक्ष्वैतानि यथाकामं संचरस्व सुखं सदा॥ द्रव्याणि संति सर्वाणि रत्नानि सकलान्यपि॥ एतान्यपि समालोक्य
समादत्स्व यथेच्छया॥ वस्त्राणि सन्ति सर्वाणि सुरंगरञ्जितान्यपि॥ एतान्यपि समादाय प्रावृत्य नैः सुखं चर॥ भूषणान्यपि संत्यत्र हेमरत्नमयानि च॥ सर्वाण्येतैरलंकृ ३६४
त्य सर्वांगशोभयं चर॥ अस्माभिः सह संरक्तो भुक्त्वा भोग्यं यथेप्सितं॥ रममाणो दिवानक्तं भुक्त्वानन्दं सुखं वस॥ एवं भुक्त्वा महासौख्यं प्रान्ते यायाः सुरालयं॥ एवं ताभिः
समाख्यातं श्रुत्वा स सुप्रियः सुधीः॥ जननीरिव ताः सर्वाः संपश्यन्नेवमब्रवीत्॥ दुहितरो न कामार्थी न च भोग्यानि लालसः॥ अपि तु सर्वलोकार्थं रत्नार्थी ह समाव्रजे॥ एवं
स सत्कृतिः प्रोक्त्वा सर्वास्ताः किन्नरीरपि॥ निवार्य दुष्टपापेभ्यः सद्धर्मं समुपादिशत्॥ तत्सद्धर्मामृतं पीत्वा सर्वास्ताः प्रमदा अपि॥ समनुबोधिताः सत्यमिति मत्वाऽनन्दि

रे॥ तत्स्तद्धर्मीभिप्रमोदिन्य सर्वास्तास्तं महामतिं॥ बहुभिः श्रीमहारत्नैः संपूज्चार्याभ्यनन्दयत्॥ तानि सर्वाणि रत्नानि समादाय समीश्वरः॥ दानमाहात्म्यमतुलं नाभ्यपृच्छदर्थममा
दिव्रात्॥ निधानमनुगं दानं चौराद्यैरगोचरं॥ भवाब्धिभ्रमनाशाय वाहनं सुखमुत्तमं॥ मुक्तावलीभूषितांगाः कौशेयप्रावृताः सदा॥ यद्गृहं हन्ति तां लक्ष्मीं तदपि दानलक्ष
णं॥ आयुः सुदीर्घं सुकुले जन्म कान्तं वपुर्गुणं॥ आरोग्यं निर्भयं द्रव्यं तत्सर्वं दानलक्षणः॥ यच्चक्रवर्त्ती भुजेषु श्रीसंप्रभिर्युतः॥ समुद्रसीमां निष्कण्टकां तदपि भूमिदा
नतः॥ रत्नस्य दानान्नैः पूर्णेऽब्धस्य कान्त्वैनेत्तथा॥ वासोभिर्वाससंनद्ध यद्दत्तं तद्धि वर्द्धितं॥ तस्यानुभावतो यूयं रत्नद्वीपसमुद्भवाः॥ सततं दिव्यसंवा भव्या दानदुःखवि
वर्जिताः॥ यस्य प्रभावादतुलं सौख्यं वर्द्धयतत्पुनः॥ संवर्द्धमाने तस्मिंस्तु सोपि वा वर्द्धयिष्यति॥ एवं त्वेन्थं यालयध्वं लोकान्दीनान्सुचेतसा॥ मौनीन्द्रवचनं स्मृत्वा सागा
तोस्मि समुद्रतः॥ रत्नार्थी दीनमुद्धर्त्तुं त्रिः सहायस्त्वदाज्ञया॥ इति तस्य वचः श्रुत्वा तं नत्वा संप्रसादिताः॥ भासमाना भिधं रत्नमदेयमपि संददुः॥ गृहाणेदं महाभाग ज
म्बुद्वीपे सुदुर्लभं॥ त्वया दिष्टं समाकर्ण्य संतुष्टा रानकामुकाः॥ यदा योजनवान्तुर्थं प्रवर्षयेदभीप्सितं॥ वासो न्नं द्रव्यरत्नं च राकायां ध्वजमाश्रयन्॥ इत्युक्त्वा प्रददुस्तस्मै

भद्र
सप्रि

स्वच्छनिर्मलमानसाः ॥ तद्गृहीत्वाशिषामाद्य पुनः प्राह प्रमोदितः ॥ विलसन्तु चतुर्वर्गोत्तमस्वरान्तारत्यात्मिकाः ॥ तदनुज्ञां समासाद्य ततोभिनन्दितोचरत् ॥ ततश्चारन्ददर्शा
राद्वैदूर्यनगरं पुनः ॥ तद्दृष्ट्वा विस्मयापन्नः सत्वरं समुपासरत् ॥ तत्र संसमुपाक्रान्तः समालोक्य समन्ततः ॥ तथा तन्नगरद्वारं त्रिधाकोशाभ्युपाश्रयत् ॥ ततोभिनिर्गताः
कन्याषोडशकिन्नरात्मजाः ॥ पूर्वातिसुन्दराः कान्ताः सर्वकलाविचक्षणाः ॥ रतिसन्निभसद्रूपाः सर्वलोकमनोहराः ॥ ताः सर्वास्तं महासत्वं समीक्ष्य समुपासरन् ॥
तत्र तं समुपासृत्य सर्वास्ताः संप्रसादिताः ॥ समीक्षन्त्यः प्रसन्नास्याः प्रत्युत्थाप्यैवमब्रुवन् ॥ स्वागतं स्वागतं साधो कच्चित्ते कौशलान्तं ॥ अस्माकमपतीनां हि स्वामी भर्ता पति ३६५
र्भव ॥ विद्यन्तेत्र मनोरम्याः प्रासादा मन्दिराणि च ॥ इमानि पश्य सर्वाणि संचरन्सर्वतः क्रमात् ॥ भोग्यानि सन्ति सर्वत्र पानानि विविधान्यपि ॥ चीनपट्टांशुकादीनि विचित्राण्य
म्बराणि च ॥ भूषणान्यपि सर्वाणि हेमरत्नमयानि च ॥ सर्वे च धातवः सन्ति द्रव्याणि सकलान्यपि ॥ उद्यानान्यपि सन्त्यत्र द्रुमैः सर्वर्तुपुष्पितैः ॥ सर्वौषधिफलान्नैः संशोभितानि
सर्वदा ॥ पुष्करिण्योपि सन्त्यत्र शुद्धश्रीनाम्बुपूरिताः ॥ पद्मोत्पलादिपुष्पाढ्याः शोभिताश्चापि पक्षिभिः ॥ स्नात्वैतासु सहास्माभिः शुद्धवस्त्रावृतः सदा ॥ भोग्यं भुक्त्वा यथाकामं संचर

स्वामन्नुदा ॥ एवमाख्यायताः सर्वा नीत्वा तं नगरं ततः ॥ प्रासादे स्वासने श्रेष्ठे संस्थाप्य समुपाश्रयन् ॥ ताः सर्वाः समुपासीना मातृरिव समीक्ष्य सः ॥ सुप्रियः सुप्रसन्नास्यः संप्रप
न्नेवमब्रवीत् ॥ मातरो हं न कामार्थी निर्भोग्यार्थमिहाव्रजे ॥ सर्वलोकहितार्थेन धर्मार्थमहमाचरि ॥ कामा मोहाश्रया दुष्टाः क्लेशमूलाः शुभान्तकाः ॥ तस्मात्यापपथं त्यक्त्वाच
रितव्यं शुभायने ॥ पापेन दुर्गतौ जाता सदा दुःखानुभोगिनः ॥ शुभेन सद्गतौ जाताः सदा सौख्यानुभोगिनः ॥ एवं सत्यं परिज्ञाय विहाय दशपातकान् ॥ सत्यधर्मानुसंरक्ताः सं
चरन्ते शुभार्थिनः ॥ एवं यूयमपि ज्ञात्वा विरम्य पापमार्गतः ॥ सद्धर्मसाधनं पुण्यं संसाधयितुमर्हथ ॥ एतत्पुण्यविपाकेन संजाता सद्गतौ सदा ॥ भुंजमाना महासौख्यं शान्तिस्व
र्गप्रयास्यथ ॥ तत्र दिव्याम्रतं भुक्त्वा रममाणाः सुरैः सह ॥ महानन्दसुखेनैव संचरिष्यथ सर्वदा ॥ एवं तत्समुपादिष्टं श्रुत्वा ताः संप्रबोधिताः ॥ तस्मै भोग्यानि रत्नानि समु
पाहृत्य प्रार्थयन् ॥ तानि भोग्यानि भुक्त्वा स समभिनन्दिताशयः ॥ सर्वाणि तानि रत्नानि पद्मवत्सु रासमादधौ ॥ ततः स सुप्रियो धीमान्स्ताभ्यश्च संप्रसादितः ॥ आदिम
ध्यान्तकल्याणं सद्धर्मं समुपादिशत् ॥ तत्सद्धर्मामृतं पीत्वा ताः सर्वा अभिनन्दिताः ॥ शुभास्ताभिर्ध्वं रत्नं प्रोत्तमं प्रादादुर्मुदा ॥ तद्रत्नं स समादाय सुप्रियो विस्मयान्वितः ॥

भद्र
सुधि

समभ्याययगणं तस्य मणौ स्त्रापरि पृच्छत ॥ मातरः कौतुभावास्य रत्नस्य श्रीशुभारवतः ॥ तत्तस्य वस्तुमुपादिश्य मां वोधयितुमर्हथ ॥ एतत्संप्रार्थितं श्रुत्वा सर्वास्ताः संप्रसादिताः ॥
सुप्रियं तं महाविज्ञं पश्यन्त्य एवमब्रुवन् ॥ इदं रत्नं महाभाग अस्माभिः समुपोषितः ॥ ध्वजोपरि समारोप्य प्रार्थयाभ्यर्च्य वाञ्छितं ॥ तदेदं दीयतां मया योजनेषु समन्ततः ॥ यथाभिवा
ञ्छितं द्रव्यं तथा सर्वं प्रवर्षयेत ॥ एतत्सत्यं परिज्ञाय कृत्स्नैवं ते समाहितः ॥ सर्वसम्पत्समापन्नाः कुरुध्वं सर्वमानवान् ॥ एतत्कर्मानुभावेन परिशुद्धेन्द्रियः कृती ॥ यद्यः श्रीशुभसंप
त्तिसमृद्धिमान् सुखी भवेः ॥ तथार्थिभ्यः सदा दानं कृत्वा भक्त्या यथेप्सितं ॥ संचारं स्वशुभैनैवं प्राप्ते या यात् सुगतालयं ॥ एवं ताभिः समाख्यातं निशम्य स तु मोदितः ॥ तद्रत्नं संसमासाद्य त ३६६
ताभिनन्दितोचरत ॥ ॥ ततो दूरात्स पश्यत्स चतुर्थं किन्नरीपुरं ॥ चतुरत्नमयं कान्तं रमणीयं समुत्तमं ॥ तदृष्ट्वा विस्मयापन्नः स्वान्तो भिसंमुखं गतः ॥ समुपासन्न्यन्त द्वारे स्थित्वाको
ध्याभ्यतिष्ठत ॥ तदा तत्र निर्गताः कन्याः द्वात्रिंशत्किन्नरात्मजाः ॥ दिव्या अतिसुन्दराः कान्ताः सर्वकलाविचक्षणाः ॥ तत्र तास्तं महासत्त्वं समीक्ष्य समभिनन्दिताः ॥ सर्वाः समभिपश्यन्त्यः
पुरः स्थित्वैवमब्रुवन् ॥ स्वागतं भो महासत्त्व कच्चित्ते कौशलं ततो ॥ इहैव प्रयत्र विद्यन्ते प्रासादा मन्दिराण्यपि ॥ मनोरमाणि सर्वाणि चतुरत्नमयान्यपि ॥ उद्यानान्यपि सन्त्यत्र सर्वर्तु

पुष्पितैर्द्रुमैः ॥ औषधीफलितैर्नम्रैः संछन्नानि सर्वदा ॥ पुष्करिण्योपि संत्यत्र पुष्पैः पद्मोत्पलादिभिः ॥ हंसादिपक्षिभिः पूर्णाः सुखशीतामलाम्बुभिः ॥ धातुद्रव्याणि सर्वाणि
रत्नानि सकलान्यपि ॥ वस्त्राण्यपि च सर्वाणि सन्त्यत्र विविधान्यपि ॥ भोग्यानि सन्ति सर्वाणि दिव्यामृतरसान्यपि ॥ विविधानि च पानानि सुपथ्यसुरसान्यपि ॥ भूषणान्यपि सं[illegible]स्वर्णरत्न
मयानि च ॥ एतान्यपि हि सर्वाणि स्वाधीनानि भवन्ति ते ॥ अप्सरोभिः सदा स्नात्वा विचित्रवाससावृतः ॥ सर्वांगं समलंकृत्य सुवर्णरत्नभूषणैः ॥ भुक्त्वा भोग्यानि पीत्वा च पानानि सुरसानि च
पदत्वा दानं सदार्थिभ्यः प्रासादमन्दिराश्रितः ॥ उद्यानेषु सदा स्त्रीभिर्ममाणो यथाक्रमं ॥ संपश्यन्सर्वतो रक्तः संचरस्व सदा सुखं ॥ एवं ताभिः समाख्यातं निशम्य स समाहितः ॥ पुरुहि
तृपरिवृताः सर्वाः संपश्यन्नेवमब्रवीत् ॥ दुहितारुहायामि नैव भोक्तुं सुखान्यहं ॥ अपि तु सर्वलोकार्थे रत्नत्रिसमाश्रये ॥ कामा हि सर्वदुःखानां क्लेशानां च सदाश्रयाः ॥ इति कामं परित्य
ज्य मनाश्चरन्ति सद्व्रते ॥ रत्नं सुरूपं वीर्यं च त्यक्त्वा मृत्युवशा जनाः ॥ परलोकं कर्मवायुसमीरिता व्रजन्ति ते ॥ तत्र पुण्यसहायश्चेत्सुकुले जननं सुखं ॥ पापश्चेद् दुर्गतौ दुःखं तत्सहायं व
बंकुरु ॥ न देकमनुगं मित्रं हितंकरं सदाक्षयं ॥ धनानां परमं द्रव्यं महार्घ्यं त्वाकृष्टमंपरैः ॥ सुमेरुमपि तं तासां विक्षिपन्ति दिशो दश ॥ सर्वं जीवायवस्तेपि पुण्यभंगाय नत्वलं ॥ नैके द

वेमेन =

भद्र
सुखि

मायान्निपुण्यंच चत्नरत्नसुधिवर्षिणा॥ संवर्ण्णोदककोषेन पंच्छाणामपिक्रेष्यते॥ द्वारश्रीकीनलेदीप्तिमत्पुण्येनैव दह्यते॥ संदह्यते क्षितिरियं प्रलयानलमिश्रितः॥ एतत्सत्यं परिज्ञा
यकामभोग्यसुखान्यपि॥ त्यक्त्वा धर्म्मं समाधाय प्रभिचारितुमर्हथ॥ पापेन दुर्गतौ जाताः सदा चरन्ति दुःखिताः॥ धर्म्मेण सद्गतौ जाता भवन्ति सुखिनः सदा॥ एवं मत्वा समाधाय विरम
पापमार्गतः॥ सद्धर्मसाधनारक्ताः संचरध्वं सदा शुभे॥ एतत्पुण्यविपाकेन संयास्यथ सुरालयं॥ तत्र दिव्यामृतं भुक्त्वा संचरध्वं सुरैः सह॥ एवं तत्समुपादिष्टं श्रुत्वा ताः प्रमदा अपि॥
सर्वाः समनुमोदित्वा प्राभ्यनन्दन्प्रबोधिताः॥ ततस्ताः सकलास्तस्मै सुप्रियाय प्रसादिताः॥ बहूनि भूषणरत्नानि प्रदत्वा समुपाश्रयन्॥ समीक्ष्य तानि सर्वाणि समादाय स सन्मतिः॥ भू
यस्ताभ्यः सदा भद्रं सद्धर्मं समुपादिशत्॥ प्राप्तुं स्थैर्यं पुण्यरत्नं प्रयतध्वं ददः सदा॥ किं प्रवक्ष्यामि विज्ञास्सु पुण्यास्सु पुण्यभूमिषु॥ किंत्वत्र स्त्रीजनाः सर्वा धनाढ्याः कृतकौशलाः॥ त ३६
दुर्लभं दानकर्मस्वयं दत्तं सुचेतसा॥ मा भवतो कृतायूयं सभाग्याः कृतकौशलाः॥ चत्नरत्नप्रेरजाता इति रागविमोहिताः॥ येन सर्ववर्द्धिताः सर्वाः भजते नं कृतज्ञताः॥ भूयस्तत्भजनात्
मोक्षं यास्यन्ति निर्विकल्पतः॥ जगद्धितसुकार्येषु प्रयतध्वं दिवानिशं॥ तत्काममार्गतिः कार्यक्षुरधारामृतोपमे॥ तद्विज्ञाय समभ्रात्तैरीनात्रामांविहाय तां॥ निःकामरागो रत्नार्थभागतो

स्मिन्निरातुरः ॥ ततस्तत्कर्मामृतं पीत्वा सर्वास्ता अपि नन्दिताः ॥ श्रीमहाजाख्यं महारत्नं ददुस्तास्तस्मै हितार्थिने ॥ समीक्ष्य तं महारत्नं सुप्रियः सोऽतिविस्मितः ॥ समादाय प्रसन्नास्यः प
रायस्ता एवमब्रवीत् ॥ दुहितरो मनोरथस्य कोऽनुभावो महानपि ॥ ततस्तत्संसमुपादिश्य प्रबोधयत मे मनः ॥ एवं तत्सुप्रार्थितं श्रुत्वा सर्वास्ताः संप्रसादिताः ॥ समीक्ष्य तं महासत्त्वं त
न्मनोरथगणमादिदृक्षत ॥ महासत्त्व मनोरथस्य प्रभावं शृणु कथ्यते ॥ यथास्माभिस्तथा कृत्वा सर्वान्समभिनन्दय ॥ प्रातः स्नात्वाभिशुद्धात्मा महाष्टम्यामुपोषितः ॥ ध्वजाग्रे इ
दं मनोरथं प्रार्थयस्वाभ्यवांछितं ॥ तदेदं श्रीमहारत्नं द्वादशयोजनविस्तरं ॥ सर्वाशाप्रार्थितार्थानि प्रवर्षयेन्निरन्तरं ॥ एवं त्वं सर्वलोकानां वाञ्छितान्यभिपूरयन् ॥ धर्मकीर्तिमहा
सौख्यसमृद्धिमान्भवेरपि ॥ यावज्जीवं सुखं भुक्त्वा प्रान्ते याया सुरालयं ॥ तत्र दिव्यामृतं भुक्त्वा संचरेरमरैः सह ॥ इत्युक्त्वा ताः प्रसन्नास्याः सर्वास्तं सुप्रियं मुदा ॥ समीक्ष्य तत्र्यः समामन्त्र्य
पुनरेवं भाषिरे ॥ निस्तीर्णास्मि महासत्त्व नदीसमुद्रपर्वताः ॥ कान्तारा अपि दुर्गम्याः सर्वेदुःखभयाश्रयाः ॥ सम्पूरिता प्रतिज्ञा ते सफलीभूत उद्यमः ॥ सर्वे संसाधिताः सिद्धा गो
पितान्यपि दियाराणि ॥ बदरद्वीपयात्रापि संसाधिताभिसिध्यते ॥ अधिगतानि रत्नानि त्वया धर्मानुभावतः ॥ धन्योऽसि त्वं महाभाग सर्वलोकहितोद्यतः ॥ भूयात्ते सर्वतो भद्रं सं

यस्मात्त्वं पुरं व्रज ॥ शृणु साधो महासत्त्व त्वत्पुरागमनाय ते ॥ सन्मार्गं व्युपदेक्ष्यामि निर्भयं निरुपद्रवं ॥ इतः पश्चिमदिग्भागे सप्त विलंघ्य पर्वतान् ॥ पर्वतोऽस्ति महानन्यो दुर्गम्योऽतिसमु-
च्छ्रितः ॥ तत्रास्ति राक्षसो रौद्रो लोहिताक्षोऽतिनिर्दयः ॥ सोऽन्धकारं महावायुं सविस्फुलिंगमुत्सृजेत् ॥ महारत्नमिदं तत्र समारोप्य ध्वजोपरि ॥ संपूज्य त्वा समाधाय संचारस्त्वाभिलो-
कयत् ॥ एतद्रत्नप्रभावाद्धि सर्वेऽपि विघ्नकारकाः ॥ उपसर्गा विनश्यन्ति तदानेन भयं क्वचित् ॥ तत्पर्वतमतिक्रम्य विघ्नेनत्यष्टपर्वतः ॥ तत्रास्त्यग्निमुखो नागो रौद्रोऽतिनिर्द-
यो महान् ॥ स तव गन्धमाघ्राय सप्तरात्रिदिनान्यपि ॥ अग्निं निपातयेत्तत्र रत्नगुहां समाश्रय ॥ सप्तरात्रिदिनान्ते स निद्राहतः स्वपिष्यति ॥ तदा तच्छैलमारुह्य संक्रमत्व समाहि- ३६८
तः ॥ तत्र पश्येस्त्वमे भूमिप्रदेशे तण्डुलं फलं ॥ सुगन्धिकमकृष्टोप्तसंभवमकणं शुचि ॥ तत्त्वभुक्त्वा सुकेशोऽश्वराजः शुक्लो महातनुः ॥ अष्टम्यां पंचदश्यां च समेत्यैवं व-
देत्स्वरः ॥ कः पारमितो गंतुं स्वपुरमभिवाञ्छति ॥ समेत्य पृष्ठ समारुह्य संतिष्ठस्व समाहितः ॥ तमितो हं क्षणान्नीत्वा स्वदेशं प्रेरयेयहि ॥ इति वदन्सुकेशोऽश्वराजः स समुपा-
सरेत् ॥ तं समीक्ष्य महासत्त्वमश्वराजं पुरोगतः ॥ संपश्यन्पादुके नत्वा वदस्वैवं कृताञ्जलिः ॥ इतो हं गन्तुमिच्छामि स्वदेशं सत्कृपानिधे ॥ तन्भवान्मामितो नीत्वा स्वदेशं प्रेषय

त्वरं ॥ त्वयैवं प्रार्थ्यमानः स महासत्वः कृपामतिः ॥ त्वां स्वपृष्ठे समारोप्य स्वदेशं प्रापये ध्रुवं ॥ एवं ताभिः समाख्यातं श्रुत्वा स सुप्रियः सुधीः ॥ तथेति संप्रसन्नात्मा गन्तुमैच्छ

त्स्वबोधितः ॥ ततः संप्रसन्नात्मानः सर्वाः कन्यका अपि ॥ संपश्यन्त्यान् वन्भूयस सद्धर्मं समुपादिशत् ॥ तत्सद्धर्मामृतं पीत्वा सर्वास्ताः संप्रसादिताः ॥ सुप्रसन्नमुखाम्भो

जाः प्राभ्यनन्द स्वबोधिताः ॥ ततः स सुप्रियो धीमान्महासत्वोभिनन्दितः ॥ तद्रत्नद्वीपं समासाद्य संप्रस्थितो मुदाचरन् ॥ ॥ ततः स संक्रमन्तत्र मार्गे पश्यन् समाहित

ः ॥ सप्त नगानतिक्रम्य महोच्चनगमारुहत् ॥ तं वीक्ष्य समुपायातं लोहिताक्षो निशाचरः ॥ सान्धकारं महावातं साग्निकणं व्यमुंचत ॥ तत्समीक्ष्य महासत्वः सुप्रियः स स

माहितः ॥ ध्वजाग्रे रत्नमारोप्य स्वस्तिना चाक्रमत्ततः ॥ अवतीर्य ततोन्यच्च पर्वतं महदुच्छ्रितं ॥ महद्वीर्यमहोत्साही शीघ्रारोह समाहितः ॥ तस्य गन्धं समाघ्राय नागोऽग्निमु

खउत्थितः ॥ समीक्ष्य तमुपायातं महाशनिं न्यपातयत् ॥ तद्वीक्ष्य स महासत्वः स्ववीर्यवान्समाहितः ॥ रत्नगुणां समाश्रित्य तस्थौ ध्यात्वेश्वरं स्मरन् ॥ एवं सप्त दिवारात्रीः

पातयित्वा महाशनिं ॥ ततोऽन्तेस महादुष्टः सुश्रापन्निर्विण्णेन्द्रियः ॥ तं शयितं स विज्ञाय सुप्रियः सुसमाहितः ॥ पर्वतं तं समारुह्य प्रचक्राम विलोकयन् ॥ ततः स संक्रमस्तत्र

वीरस्य समं महीतलं ॥ सम्पश्यत्सर्व्वनक्षत्रप्रचक्रमाभिनन्दितः ॥ नववनं प्रक्रमन्तं समुक्केशी तुरगाधिपः ॥ समीक्ष्य तत्र सोपेत्य सम्मुखस्त्रैवमब्रवीत् ॥ कइतः पारमासाद्य स्वदेशं गन्तुमिच्छ-
ति ॥ तमहं पृष्ठ आरोप्य नीत्वा पारं महोदधेः ॥ समनुप्रापयिष्यामि जम्बुद्वीपे निजालयं ॥ इति त्रिधा समाख्याय तं पश्यन्नत्य तिष्ठत ॥ एवं तन्नाषितं श्रुत्वा सुप्रियः स समीक्ष्य तं ॥
नत्वा प्रदक्षिणीकृत्वा प्रार्थयन्नैवमुत्सुरवं ॥ इतोहं गन्तुमिच्छामि जम्बुद्वीपे निजालयं ॥ तन्महासत्व मामाशु समभिनीय प्रापय ॥ एवं तत्प्रार्थितं श्रुत्वा स सुकेशी हयाधिपः ॥ सुप्रि-
यं तं महासत्वं सम्पश्यं स्त्रैवमब्रवीत् ॥ यदीच्छसि महासत्व गन्तुं निजालयं ध्रुवं ॥ तन्मम पृष्ठ आरुह्य संतिष्ठस्व समाहितः ॥ इत्युक्त्वा हयराजः स केशी तस्य स्व पृष्ठकं ॥ स समुन्ना ३६९
म्य संपश्यन्तु दधिमभ्यतिष्ठत ॥ ततः स सुप्रियो धीमान्नत्वा तच्चरणान्मुदा ॥ तस्य पृष्ठं समारुह्य समाहितोभ्यतिष्ठत ॥ ततः सोश्व महाराजस्तरसाशु विहायसा ॥ चारत्वाराणासी
नीत्वा तत्सुयाने व्यमुंचत ॥ तत्रावतीर्य तत्पृष्ठात्पादान्तस्य कृपानिधेः ॥ नत्वा प्रदक्षिणीकृत्य संपश्यन्नेवमाह तं ॥ धन्योसि त्वं महासत्व सर्वसत्वानुपालकः ॥ यत्भवत्कृपया
स्वस्ति संप्राप्तोहं निजालयं ॥ एतत्कर्मानुभावेन सर्वलोकाधिपो भवेः ॥ सदा ते मंगलं भूयादित्युक्त्वा प्रणनाम च ॥ प्रणमन्तं तमालोक्य सोश्वराजः प्रसादितः ॥ एवं संबोधयामास संपश्य

सुदाम्मुदा॥ साधु साधु महासत्त्व प्रतिज्ञा तेभिपूरिता॥ चरन्त्येवं महासत्त्वाः सर्वसत्त्वहितोद्यताः॥ ततः सोऽश्वमहाराजः समुत्क्रम्य विहायसि॥ वह्निरिव समुद्भासः प्राभ्यगच्छत्सिंहला
लयं॥ ततः स सुप्रियः श्रीमांस्तं समभिनन्दिताशयः॥ संपश्यन्त्यो रिकोद्द्योकाश्च ययौ स्वगृहं मुदा॥ ततः सुलपना साध्वी दृष्ट्वैवं तं पतिं स्वकं॥ स्नेहपाशाकर्षितेव गत्वाशान्त्स
हसापतत्॥ पतितां तां समालोक्य निःश्वस्य सुप्रियो द्रुतं॥ स्वांकमारोप्य तद्वक्त्रं तोयेन प्राभ्यषिंचत॥ तत्प्रभावात्स्वसंज्ञाप्य प्राणनाम प्रियं वरं॥ पादौ प्रक्षाल्य वन्दित्वा मातरं
सोऽभ्युपाश्रयत॥ निवेश्य निजवृजनं दृष्ट्वा रत्नानि सुप्रियः॥ पुत्रं प्रशंसयामास प्रियमङ्गाभिधाम्बिका॥ स्वगृहं तं समायान्तं समीक्ष्य ज्ञातयो मुदा॥ समेत्य कौशलं पृष्ट्वा
पर्युपतस्थिरे॥ तत्र सत्सुमतिर्ज्ञातीन्बन्धून्नत्वा यथाक्रमं॥ पुत्रमिस्वासने तस्थौ संपश्यन्तान्सबान्धवान्॥ तं दृष्ट्वा गृहेऽभ्येत्य सार्थवाहा महाजनाः॥ समे
त्य कौशलं पृष्ट्वा सर्वेऽपि समुपाश्रयत॥ तान्सर्वान्समुपासीनान्दृष्ट्वा स सुप्रियो मुदा॥ सर्वमेतत्प्रवृत्तान्तं स्वानुभूतं न्यवेदयत्॥ तत्समाकर्ण्य सर्वे ते ज्ञातिब
न्धुजनादयः॥ महाजना वणिक्संघाः पौराश्चैवं बभाषिरे॥ धन्योऽसि त्वं महाभाग प्रतिज्ञा तेभिपूरिता॥ यथा संसाधितं वीर्यैः सर्वं संसिद्धं तेन तथा॥ तद्धोकानां

हितं कृत्वा संसाधितं समीहितं ॥ दत्वाभिप्रेप्सितं भुक्त्वा संचार्य स्वसुखे सदा ॥ एवं संभाष्य ते सर्वे विस्मयापन्नमानसाः ॥ तद्वीर्यमनुसंश्रान्ताः स्वस्वगृहं मुदाचरन् ॥
ततः स सुप्रियो धीमान् धृत्वा रत्नमुपायनं ॥ नृपस्य प्रियदत्तस्य संद्रष्टुं प्रासरन्मुदा ॥ तत्रागत्वा पुरो राज्ञ उपस्थाप्य महामणिं ॥ नत्वा पार्श्वे स सत्रासः संपश्यन्समुपा
श्रयत् ॥ समीक्ष्य तमुपासीनं प्रियदत्तः स भूपतिः ॥ वीर्यवन्तं महासत्वं समपश्यन्नेवमादिशत् ॥ धन्योसि त्वं महासत्व सर्वसत्वहितोद्यतः ॥ संसिद्धं ते प्रतिज्ञातं सं
प्राप्तश्च समीहितं ॥ तद्यथा परिराधानं ते तथा संसाधयाधुना ॥ त्वं तु धर्मानुभावेन सर्वसिद्धे दविघ्नतः ॥ सत्वादानं सदार्थिभ्यो भुक्त्वा भोगं यथेप्सितं ॥ कृत्वा लो २७०
कहितार्थानि संचर स्वशुभे सुखं ॥ एवं राज्ञा समादिष्टं निशम्य सोभिनन्दितः ॥ तदाज्ञां समासाद्य स्वगृहं प्राचरन्मुदा ॥ ततश्चौरसहस्रं तत्सुप्रियं तं गृहागतं ॥ श्रुत्वा
सर्वे समेत्याशु संद्रष्टुं समुपासरन् ॥ तं समीक्ष्य पुरो गत्वा पृष्ट्वा चैकोद्गलं मुदा ॥ सर्वमपि सहस्रं तच्चौरमेवं बभाषिरे ॥ विजानीया महाभाग यदि सीरात्रधनाः स्म हि ॥ त
त्र भवान्नः पुनर्दत्तं महासंपदमर्हति ॥ इति तत्प्रार्थितं श्रुत्वा सुप्रियः सोभिनन्दितः ॥ सर्वं चौरसहस्रं तं तत्संपश्यन्नेवमब्रवीत् ॥ गत्वा सर्वे धनाय यूयं स्वस्वाश्रमे समा

श्रिताः॥ यदभिवाञ्छितं द्रव्यं प्रार्थयध्वं तदा नताः॥ अष्टम्यां महमन्त्रेदं ध्वजाग्रे श्रीमहामणिं॥ समारोप्य समभ्यर्च्य प्रार्थयिष्यामि संपदं॥ एवं तत्समुपादिष्टं निशा
म्य तत्सहस्रकं॥ सर्वचौरं तथेत्युक्त्वा स्वालयं मुदा सरन्॥ ततोष्टम्यामुषः स्नात्वा सुश्रियः सउपोषितः॥ ध्वजाग्रे तन्महारत्नं समारोप्य समर्च्चयन्॥ त्रिधा प्रदक्षि
णीकृत्य प्रणत्वा साञ्जलिर्मुदा॥ समुन्मुखः समालोक्य प्रार्थयदेवमादरात्॥ महामणे यदस्माभिः संप्रार्थितं धनार्थिभिः॥ तत्सर्वं सर्वलोकानां हितार्थं संप्रवर्षय॥ इति सं
प्रार्थितं तेन सुश्रियेन समीहितं॥ तदा योजनविस्तारं प्रावर्षयन्निरंतरं॥ तत्समीक्ष्य सहस्रं तच्चौरं संप्रमोदितं॥ यथाभिवाञ्छितं यावत्तावत्तदा देशे धनं॥ तथा सर्वेऽपि लो
कास्तत्समीक्ष्य प्राभिनन्दिताः॥ यथा तत्समीक्षितं द्रव्यं तत्तदात्रं समाददुः॥ तदा सर्वेऽपि ते लोकाः सर्वद्रव्यसमृद्धिताः॥ दत्वा दानं सदा भुक्त्वा भोग्यानि प्राचरन् सुखं॥ तदा सत्
पतीराजा प्रियदत्तो नराधिपः॥ सुरालयं गतैर्देवैः सहाभिनन्दितोऽरमत्॥ ततस्तन्मंत्रिणः सर्वे सुश्रियं तं यथाविधि॥ अभिषिंच्य नृपं कृत्वा प्रभेजिरेऽनुरागिताः॥ ततः
स सुश्रियः स्नात्वा पंचदश्यामुपोषितः॥ अलंकृतो विशुद्धात्मा शुचिवस्त्रसमावृतः॥ द्वितीयरत्नमारोप्य ध्वजाग्रेऽभ्यर्च्य साञ्जलिः॥ कृत्वा प्रदक्षिणां नत्वा प्रार्थयेदेव

भद मुक्तसुखः॥ ततो देवतन्महारत्नं चतुर्थं योजने ध्वजे॥ सर्वद्रव्याणि सर्वत्र प्रावर्षयन्निरन्तरं॥ तानि समीक्ष्य ते लोकाः सर्वेपि स्वेच्छया मुदा॥ समादाय समापूर्य कोष्ठागारे न्य
ऊषि धापयन्॥ तदा सर्वेपि ते लोकाः सर्वद्रव्यसमृद्धिताः॥ दत्वा दानं सदा भुक्त्वा भोग्यानि प्राचरन्सदा॥ ततः स सुखियो भूयः स्नात्वाष्टम्यामुपोषितः॥ शुक्लवस्त्रप्रावृतः शुद्धशीलः
संयमितेन्द्रियः॥ तृतीयं मणिमारोप्य ध्वजाग्रेभ्यर्च्य साञ्जलिः॥ त्रिधा प्रदक्षिणीकृत्य तत्वैवं प्रार्थयन्मुदा॥ महामणे त्वं सर्वत्र यद्यद्लोकाभिवांछितं॥ तत्तद्द्रव्यं सुरत्नादि
संवर्षय निरन्तरं॥ एवं संप्रार्थितं तेन योजनद्वादशोन्नथा॥ लोकैः संप्रार्थितं यद्यत्तत्तत्सर्वमवर्षयत्॥ तानि समीक्ष्य ते लोकाः सर्वे समभिनन्दिताः॥ संगृह्य स्वेच्छया स्वस्व ३२१
कोष्ठागारं समपूरयन्॥ तदा सर्वेपि ते लोकाः सर्वद्रव्यसमृद्धिताः॥ दत्वा दानं सदार्थिभ्यो भोग्यानि प्राचरन्सुखं॥ ततः स सुखियः स्नात्वा पूर्णिमास्यामुपोषितः॥ शुद्धशीलो विशुद्धा
त्मा शुक्लवस्त्रसमावृतः॥ तच्चतुर्थं महारत्नं समारोप्य ध्वजोपरि॥ त्रिधा प्रदक्षिणीकृत्य साञ्जलिः प्रार्थयन्मुदा॥ महारत्न सुरत्नादि प्रवर्षय निरन्तरं॥ एवं संप्रार्थितं तेन
सुखियेन हितार्थिना॥ तच्छ्रीमन्महारत्नं शतं योजनविस्तरं॥ सर्वरत्नसुवर्णादि सर्वद्रव्यं समन्ततः॥ सर्वैः संप्रार्थितं सर्वं प्रावर्षयन्निरन्तरं॥ तानि द्रव्याणि सर्वाणि स

वीर्यकारणान्यपि ॥ दृष्ट्वा सर्वे सुरालोकाः स्वस्थचित्तं समादधुः ॥ ततस्ते मानवाः सर्वे तत्र पर्यनिर्यासिनः ॥ सर्वे उद्यमसमापन्ना बभूवुः श्रीसमृद्धिताः ॥ ततस्तान्मानवान्स
र्वान्स्वपुरेषु समाश्रितान् ॥ सुप्रियः सुप्रसन्नात्मा समामंत्र्यैव मादिशत् ॥ भवन्तः श्रूयतां सर्वे यन्मयात्र प्रकथ्यते ॥ तत्सर्वेपि समाधाय श्रुत्वाचरन्तु सर्वदा ॥ यदहं वदर
द्वीपं गत्वा किन्नरीपुरं ॥ महच्छ्रेष्ठं दशरत्नानि प्राप्य प्रत्यागतो मुदा ॥ एतद्रत्नानि संपूज्य समारोप्य ध्वजोपरि ॥ तत्वाङ्व्यानि सर्वाणि संप्रार्थयं कृताञ्जलिः ॥ तद्दैतच्छ्री
महारत्नं प्रावर्षयन्निरन्तरं ॥ एतद्धनसमापन्नाः सर्वे यूयं समृद्धिताः ॥ समभिनन्दितात्मानः श्रीमन्तो भवथाधुना ॥ तदिदानीं सदा यूयं त्रिरत्नशरणाश्रिताः ॥ बोधिचर्याव्रतं
धृत्वा संचरध्वं सदा शुभे ॥ ये विशुद्धाशया भक्त्या त्रिरत्नशरणाश्रिताः ॥ बोधिचर्याव्रतं धृत्वा संचरन्ते समाहिताः ॥ दुर्गतिं ते न गच्छन्ति सञ्जाताः सद्गतौ सदा ॥ श्रीमन्तः सद्गुण
धरा भवन्ति सुखिनः सदा ॥ ततस्ते बोधिसंभारं पूरयित्वा यथाक्रमं ॥ अर्हन्तः प्राप्य संबोधिं सौगतिं पदमाप्नुयुः ॥ एवं तत्सुप्रियादिष्टं श्रुत्वा सर्वेपि ते नराः ॥ समभिनन्दिता
त्मानः प्रसेदिरे ऽभिबोधिताः ॥ तदा सर्वत्र लोकेषु सुप्रियस्य महामतेः ॥ धर्मकीर्त्तिसमाख्यानं प्रावर्त्तत निरन्तरं ॥ एवं स सुप्रियः श्रीमान्बोधिसत्वो हितार्थभृत् ॥ सर्वेषामपि लोका

दिमं=

भद्र
मुखि

नांम्नास्तात्रऋषिर्वाभवत् ॥ ततः समुप्रियो राजा वृद्धिं नु जीर्णो नितिप्रियः ॥ अभिषिंच्यात्मजं ज्येष्ठं राज्ये स्थाप्य नृपं व्यधात् ॥ ततः स जनको राज्यं हित्वा कामविरागितः ॥ गत्वाश्रमे
मुनीन्द्राणां ब्रह्मचर्यं समाचरन् ॥ ततो ब्रह्मविहारांस्स ध्यात्वेश्वरं समाहितः ॥ कार्यं त्यक्त्वा ततो ब्रह्मलोके ब्रह्मेश्वरो ऽभवत् ॥ यो ऽसौ श्रीमान्महासत्वो बोधिसत्वो ऽपि सुप्रियः ॥ अहमेव
मुनीन्द्रो ऽभूच्छाक्यसिंहो जगद्गुरुः ॥ यच्च चौरसहस्रं तत् तदेते भिक्षुसहस्रकं ॥ या पूर्वदेवताच्चैषा काश्यपो ऽभून्मुनीश्वरः ॥ यो मघः सार्थवाहो ऽभून्भिक्षुः शारद्वतीसुतः ॥ यो
नीलाक्षो महायक्ष आनन्दो ऽभूद्यतिस्तदा ॥ यो ऽसौ चन्द्रप्रभो यक्षो राहुलो निरहक्षो भवत्पतिः ॥ लोहिताक्षो महायक्षो देवदत्तो ऽभवत्तदा ॥ यो ऽग्निमुखो महानागो मारः कामाधिपो ऽ 322
भवत् ॥ यः सुकेशी महाश्वो ऽभून्मैत्रेयो बोधिचारभृत् ॥ मयैवं भिक्षवः पूर्वं सप्रबाहितमादधन् ॥ चौरसहस्रसंघेभ्यः परित्राता वणिग्जनाः ॥ तच्च चौरगणां सर्वं विदित्वात्तच्चा ऽ ना=
भितोषितं ॥ गत्वापि वदाक्षीपि साधयित्वान्नामरीतिन् ॥ तथा समुप्रियः श्रीमांस्तच्च चौरसहस्रकं ॥ यथाभिवाञ्छितैर्द्रव्यैः संतोषयित्वाभ्यनन्दयत् ॥ निवार्य पापमार्गेभ्यः स
द्धर्मे समचारयत् ॥ इत्यहं भिक्षवः सर्वे त्रिकल्पान्बोधिसाधनम् ॥ दुष्करशतमाहत्य बोधिचर्यं समाचरं ॥ लब्ध्वा शाक्यकुले जन्म चक्रवर्त्ती नृपो ऽभवत् ॥ सर्वाल्लोकाननुशात्वा

रान्नस्मीस्य बोधिमानसः ॥ एवं हित्वा गयाशीर्षे नगे गत्वा समाहितः ॥ बोधिवृक्षन्तलासीनश्चपित्वा दुष्करं तपः ॥ दृष्ट्वा मारगणान्सर्वान्विजित्य निर्मलेन्द्रियः ॥ संबोधिज्ञा-
नमासाद्य भवाम्यि भगवाञ्जिनः ॥ ततोहं त्रिजगच्छास्ता सर्वज्ञोर्हन्मुनीश्वरः ॥ सद्धर्मं समुपादेष्टुं प्रचराम्यत्र भासयन् ॥ ॥इति श्रीभद्रकल्पावदाने ऽशोकोपगुप्तसंभा-
षणोपप्रियः सार्थवाहजातकपरिवर्त्तो नाम द्वात्रिंशतितमोऽध्यायः ॥ ॥अथापरं गुरुः पप्रच्छुर्भिक्षवस्तं तथागतं ॥ प्रत्यागत्य पुराद्यौकैः साई सभासनाश्रि-
तं ॥ भदन्त भगवन्माता गौतमीया प्रजापती ॥ अन्धीभूतापि सा चैवं कथंभूता सुलोचना ॥ यदेतत्कारणं शास्तः सर्वलोकाभिबोधने ॥ तद्भवान्समुपादिश्य प्रबोधयतु नो ध-
ना ॥ इति संप्रार्थितं श्रुत्वा सर्वज्ञः करुणाकरः ॥ प्रबुद्धो दृनाथान्सत्यानत्रान्संपश्यन्निव मादिशत् ॥ शृणुत सकलाः सत्याः तच्छृणुत पूर्ववृत्तकं ॥ यथाभूतं प्रवक्ष्यामि सर्वलोका-
भिबोधने ॥ पुरापि मम माता सौ गौतम्याख्या प्रजायती ॥ अन्धीभूतापि सा चैवं पुनरासत्सुदर्शनी ॥ तद्यथाभूत्सुरापार्श्वे हिमवतो महागिरेः ॥ नगश्च राजुगिरिर्नाम तस्य पार्श्वे म-
हावने ॥ सर्ववृक्षसमाकीर्णे फलपुष्पप्रशोभिते ॥ शुद्धाम्बुपरिपूर्णैश्च तडागैः संप्रशोभिते ॥ सर्वौषधीसमुत्पन्ने रत्नैश्च समलंकृते ॥ नानाविहंगसंरावविगतेति मनोहरे ॥

भ८
गज

शुक्लाम्बुवाहिनीभिश्च अवनीभिर्विराजिते ॥ अभ्रंकषाद्रिकपाषाणरहिते मृदुभूतले ॥ चौरादिदुष्टसत्त्वानामगोचरे मनोरमे ॥ परिभुक्तोज्झितैः सल्लकीपल्लवैर्भिन्निर्विविते ॥ प्र
वंविराजिते सर्वनगाधिपमनोरमे ॥ निरुत्याते सदा भद्रमहोत्साहसुखाश्रये ॥ हस्तिराजो महासत्त्वो भद्रलक्षणमण्डितः ॥ गौरवर्णो महाकायो बभूव विनयी कृती ॥ सम्यक्शीलविशुद्धा
त्मा चतुर्ब्रह्मविहारिकः ॥ जननीं मातरं वृद्धां संपालयन्नुपाचरत् ॥ यत्स्वादुपथ्यं विशदं मनोज्ञं. सम्पन्नसत्त्वं सुगंधवच्च । स्वजातियोग्यं स्वयमाससाद. तेनैनमांत्रं तदुपानयत्सः ॥ परिश्रुतालकक
पाटलानि. सद्यश्च कोकोमलपल्लवानि । मनःशिलाभेददिपाण्डुवित्व ओदुम्बरं वा फलमात्तगंधं ॥ न्यग्रोधभंगं शुकगोगरागं. मम्माभिसिंचाम्भोजरजोहराणि ॥ स्वदन्तगौरांश्च बिसप्रवाला. संस्थे समांत्रप्र ३२३
दद्दौ विरूढः ॥ तिरोदधानाः कुमुदाकराणां. रूपं शशांकस्य च शारदस्य ॥ गुणाः क्षमास्तानदयोदयाद्या. सविस्मयं कस्य मनो न कुर्युः ॥ संसारदुर्गेष्ववि कारिमित्रं. परं समाश्वासपदं विपत्सु ॥ सुखस्य हेतुर्य
शसो निदानं. गुणाकराणां च परं प्रतिष्ठा । तथासौ परिशुद्धात्मा भद्रश्रीः सद्गुणाश्रयः । मातुः कृत्वा सदा सेवां सर्वं समन्वमोदयत् ॥ तथाभिनन्द्यमानोऽसौ हस्तियूथेन सन्मतिः ॥ नैष्क्रम्यसुखसं
सक्तः सुहृत्सङ्गोमुदारमत् । तदा तं गजेन्द्रोऽसौ सर्वान्सुहृत्सहायकान् ॥ समामन्त्र्य सुकल्याणं सद्धर्मं समुपादिशत् ॥ तत्सद्धर्मामृतं पीत्वा सर्वे ते तत्सुहृदो गजाः ॥ ॥ अ

= व्याकभी २

नुमोघप्रशस्त्रास्ते प्रात्यमन्दरवबोधिताः ॥ ततस्तान् सुहृदः सर्वान् विहायासौ गजाधिपः ॥ मातुराहारमादातुं पश्यन्नत्र वनेचरत् ॥ परिभुक्तेवनेत
स्मिन्बहुभिः कुरिभिः सदा ॥ आहारवर्जुनेवासौ सुखेन समुपद्यते ॥ पर्यन्ते स्फटरोधिभी रुरुचरैः संरुद्धनीराश्रयं · दृष्ट्वा प्रोज्झितमत्तषट्पद
वधूसंगीतिकोलाहलं ॥ मातङ्गैः स्फुटरोधसंहततरुं पंकावशेषं ह्रदं · संवेगः सुमहान्भूरुजपतेर्गत्वं च विध्येमनः ॥ शक्यं यापयितुं मयापीर
णानैः स्वयापाण्डुरागेरपि · स्फीतैः पर्णचयैः पयोभिरमलैः संतोषवृत्त्याचिरं ॥ मातः किं त्वधिदैवतं परित्राता क्षामेक्षणा दुःखिता · नेयपापधि
तुं क्षमेस्मत इतः प्राप्तुं प्रयातं मनः ॥ इति ध्यात्वा गजेन्द्रोसौ मातृभजनतत्परः ॥ ततो दक्षिणादिग्भागे चराडारणो वनेचरत् ॥ तत्रचापगत
स्तस्य गिरेरुपवनं वरं ॥ संपश्यन्समुपाश्रित्य मनसैवं व्यचिन्तयत् ॥ अत्र वनवरे रम्ये सर्ववृक्षैः प्रशोभिते ॥ अष्टाङ्गगुणसंपन्नजलपू
र्णैर्ह्रदैरपि ॥ मृदुशाद्वलसंकीर्णे सुकोमलमहीतले ॥ सर्वदापि निवासाय प्रतिरूपं भवेन्मम ॥ तद्वनं स समीक्ष्यैवं विचिन्तयन्मुहुर्मुदा ॥ वि

स्मयसमुपाक्रान्त श्चिह्नः स्वैवमगाघत ॥ किंचन्द्रस्य करांशुभि समुदिता हा वा ४ किमर्कीकृता ४। दग्धु ४ स्फाटिक दर्पकं किमथवा वप्र ४ हरस्यापा
ण्डुल ४॥ प्रालेयं न न पिण्डितं नहि नाहि जातं मयैवाधुना, तच्चैलाद्भुत मेति निर्झर मिदं प्रक्षोभगौरं पयः ॥ धाराधौतशिलातलोऽन्तगि
रि प्रक्षोभि गौर निर्झराः पुष्पोज्ज्वसमृतो वने विटपिनो भूः शाद्वलैरावृता ॥ स्पन्दिन्यः शुचि भूरि वारि निवहा वल्गुः स्वना पक्षिणो, मन्येनि
र्मितमेतदत्र मनसा स्थानं विधात्रामनः ॥ इति वदन्स नागेन्द्रः समन्ततो विलोकयन् ॥ अत्रार्थं प्राचरन्स्तत्र सर्वत्र समशोभयत् ॥ तत्रो २७४
पान्ते गिरेरस्य तरुच्छायां महत्तरं ॥ समाश्रित्य सुखासीनां मातरं जितेन्द्रियां ॥ समीक्ष्य सहसोपेत्य पादौ नत्वा मुदानतः ॥ यथेप्सिते
ःसदाहारैः स सन्तत्राभ्यपोषयत् ॥ तदैकस्मिन्दिने तत्र स समीक्षाभिनन्दितः ॥ क्रमेणादूरतो गत्वा तरुच्छायामुपाश्रयत् ॥ तदाकाशी
उगात्तत्र पुरुषः समुपागतः ॥ सार्थाद्भ्रष्टः परित्रस्तो विहरन्नैवमुत्सुकः ॥ प्रपातदुर्गे गगने वनान्ते, विवर्तमानस्य विवान्धवस्य। एकाकि

नोदुःखपरायणास्य· मत्तोंपरित्राममकोविदध्यात् ॥ दिङ्मोहेन विमारिणाहृतगतेः सप्ताहमेकाकिनः · संरुद्धा इव मे दिशास्तरुलतामाया
निवेतोधुना ॥ मज्जामीव विशाल शोकजलधौ विक्षिप्तधैर्यप्लवो· हा कष्टं जगदस्तमेति सकलं प्रध्यानशून्यस्य मे ॥ दिङ्मोहयोगादपथेन
यान्तं · दृष्ट्वा क्षुधा व्याकुलमानसं मां । सप्ताहमस्मिन्विपिने निमग्नं · कोभ्युद्धरिष्यत्यभयप्रदानैः ॥ इति तद्विलपितं श्रुत्वा संगजोविस्मयाहतः
॥ कः पुरुष इहायात एवं विलपते रुदन् ॥ नूनं सार्थात्परिभ्रष्टो नष्टमार्गोभित्राधितः ॥ दुर्गमेऽत्र महारण्ये भ्रान्तो विलपते रुदन् ॥ इति संचिन्त्य गो
गेन्द्रस्तद्विलापमनुद्रुतः ॥ समीक्ष्य प्रचरंस्तत्र दूरतस्तमपश्यत ॥ दृष्ट्वा तं पुरुषं तत्र संत्रासाहितहतेन्द्रियं ॥ संपश्यन्सर्वथात्रातं संमुखं समुपा
सरत् ॥ संमुखं तं समुपायातं समीक्ष्य सोभिमूर्छितः ॥ हा हतोस्मीति संत्रस्तः सहसोपासरत्ततः ॥ तं संत्रासाभिहतात्मानं विदित्वा स गजाधिपः ॥
सहसानुसरन्पश्यन्समाश्वास्यैवमब्रवीत् ॥ मत्तस्त्वेह न भयं भयहा तवाहं · माभैः समाश्वसिहि तिष्ठ करोमि रक्षां । कस्त्वं कुतः कथय के ·

भि:

८८. ननवोपदिष्ट.मेतद्वनं किमिह वा तवकृत्यमस्ति॥ एवं गजाधिपाख्यातं मनुष्यवाचा निशम्य सः॥ नरोभिविस्मितः पश्यन्कं गजमेवमब्रवीत् ॥अ
हं हि नागेन्द्र विमूढचेता.पथश्च्युतः शैलमिमंप्रपन्नः। नाथोममापि द्धि पयूथनाथ.कारुण्ययोगाज्जव भावितात्मन् ॥ ततः स तस्मै करुणायमा
नः फलानिमूलानिचतानि तानि॥ हत्वा मृणालान्सलिलंच शीतलं.विश्रम्यवान्नाश्व ददौमनोज्ञान्॥ पृष्ठं समारोप्यमतंगराजो.वेगेन संप्राप्य
वनाद्वनान्तं। शनैः शनैर्वनतत्तोवतार्य.क्षेमेण गच्छेति तमब्रवीच्च ॥ एवं स गजराजस्तमुपपाद्यस्वकं पुरं॥ ततः संहर्षितः पश्यन्त्वाश्रमं ३/५
सहसाचरत्॥ तत्रस्थाश्रममासाद्य मातरं तां यथासदा॥ तथाभिलषितैनाहारैः प्राभजत्समुपाचरत् ॥ ततः स पुरुषोगत्वा वाराणस्यांनि
जालयं॥ संप्राप्येतत्स्ववृत्तान्तं ज्ञातीनांपुरतोवदत्॥ तच्छ्रुत्वाज्ञातयः सर्वे विस्मयापन्नमानसाः॥ धन्योसौगजयूथेन्द्र इतिप्रशंसिरे
मुदा॥ तदातत्रनरेन्द्रस्य नरदन्तस्य सन्मतिः॥ औपवाह्यो महान्हस्ती मृतोयमालयं ययौ॥ तं करिणं मृतंश्रुत्वा नृपतिः सोनुशोचितः॥

अमात्यान्मंत्रिणो भृत्यान्समामंत्र्यैव मादिशत् ॥ भवन्तो मे महासाधुरोपवाह्यो महानाजः ॥ कालधर्मानुसंरक्तौ मांत्यक्त्वा व्रजते कुह ॥ तदी
दृक्षवरो हस्ती यत्रापि विद्यते ततः ॥ समानीय पुरो मेऽत्र दातुमर्हन्ति सर्वथा ॥ इत्यादिष्टं नरेन्द्रेण श्रुत्वा ते मंत्रिणो जनाः ॥ अमात्याः सह
सा तत्र धरायां घोषमचारयन् ॥ येनापि दृश्यते क्वापि राज्ञो योग्यो गजोवरः ॥ स आभ्र नृपतेरग्रे समुपागत्य भाषतां ॥ यो हि गजवरं राज्ञो नि
वेद्य हर्षयेन्मनः ॥ तस्मै प्रसादितो राजा संप्रदद्याद्धनं बहु ॥ तां घोषणामुपश्रुत्य पुरुषः सधनाशया ॥ सत्यधर्मं प्रतिक्षिप्य गत्वा राज्ञः पु
रो वदत् ॥ देवो मुत्र महारण्ये मया दृष्टो गजाधिपः ॥ प्रवरः सम्भवद्योग्य स्तत्र गत्वानुपश्यतां ॥ एवं तत्कथितं श्रुत्वा नरदत्तो नृपो मुदा ॥
सत्कृत्य बहुभिर्द्रव्यैः पुरुषं मत्यनन्दयत् ॥ तदामात्यैः सनागेन्द्रः कृत्वा शोवा यथेच्छया ॥ स्वयमाहारमाहर्त्तुं ततोन्यत्र मुदासरत् ॥ तत्र
समीक्ष्य सर्वत्र भक्ष्याहारं यथेप्सितं ॥ तरुच्छायां समाश्रित्य तस्थौ सद्धममानसः ॥ ततः समुदितो राजा सहमात्य सुहृज्जनान् ॥ सर्वानपि

भ.ड. वलाध्यक्षान्समामंत्र्यैवमब्रवीत् ॥ अमुकस्मिन्महारण्ये विद्यते प्रवरो गजः ॥ इत्यनेन परो मेत्र पुरुषेणापि कथ्यते॥ तत्र सर्वे वयं गत्वा स
र्वसैन्यगणान्विताः ॥ वलाध्यक्षान्पुरस्कृत्य पश्यामतं गजवरं ॥ यदि तत्र वने सोस्ति भद्रलक्षणमण्डितः॥ प्रयत्नेन समानीय समन्वाने
ष्यते पुरे ॥ तत्सर्वे यूयमायात स्वस्वसैन्यसमन्विताः ॥ सज्जीकृत्वा समाधाय गमिष्यामो वने द्रुतं॥ इत्यादिष्टं नरेन्द्रेण श्रुत्वामात्या
प्रमोदिताः॥ सज्जीकृत्वा समायाताः स्वस्ववलसमन्विताः॥ ततः सन्नृतिः सर्वे वलामात्यगणान्वितः॥ वलाध्यक्षान्पुरस्कृत्य मुदा ३७६
तत्र वने सरत् ॥ तत्र तं पुरुषं पश्यन्त्वरदृश्यो नृपो मुदा॥ सहसा समुपामंत्र्य पुरत एवमादिशत् ॥ कुत्रासौ तिष्ठते साधो संदृश्यतां गजाधिपः॥
समन्ततः समालोक्य पश्यामेत्र प्रचक्ष्यतां ॥ इत्यादिष्टं नरेन्द्रेण श्रुत्वा स पुरुषो मुदा ॥ तत्र समीक्ष्य दूरान्तं गजराजमपश्यत॥ तं गजं दूरतो वीक्ष्य
पुरुषः सुप्रमोदितः ॥ सहसोपेत्य राजेन्द्रं प्राश्रित्य एवमब्रवीत ॥ देवासौ प्रवरो हस्ती वने ऽमुत्र मनोरमे ॥ तरुच्छाया समाश्रित्य स तिष्ठते प्र

3

मोदितः॥ इतितेनाभिनिर्दिष्टं श्रुत्वाभिनन्दितोनृपः॥ वलाध्यक्षान्समामंत्र्य सर्वानेव समादिशत् ॥ भवन्तोसौगजेन्द्रोत्र तरुछायां समाश्रितः॥
भुक्ताहारं समाधाय संतिष्ठतेद्रिकूटवत् ॥ तत्सर्वेस्वयमाधाय पुरुषाःमिममग्रतः॥ गत्वातत्र वनेयत्नैः समानयतत न गजं ॥ इतिराज्ञास
मादिष्टं श्रुत्वामात्यैर्जनैः सह॥ सर्वेपितेवलाध्यक्षा स्तत्थागम्य समीक्षिरे॥ ततःसर्वेवलाध्यक्षाः सर्वामात्यगणान्विताः॥ पुरुषंतेपुरो
धाय तत्रगजान्तिके सरत् ॥ तत्रतंगजमालोक्य पाशविन्यासतत्पराः॥ पाशान्विन्यस्यसर्वत्र पुरुषाः समुपाश्रयत॥ ततःसर्वेवलाध्य
क्षाः सर्वामात्यगणान्विताः॥ नानास्त्रशस्त्रविभ्राणाः परिवृत्योपतस्थिरे॥ ततोराजा सुहृन्मित्र मंत्रिभृत्यगणान्वितः॥ तंगजाधिप
तिं पश्यन्नुपतस्थौ समाहितः॥ एवंतत्रजनाःसर्वे परिवृत्यसमन्ततः॥ महत्कोलाहलनिर्घोषं कुर्वन्तः समुपाश्रयन् ॥ तन्महा
ज्जनकायस्यनिर्घोषं सगजाधिपः॥ संश्रुत्वासहसोत्थाय समन्ततोव्यलोकयत्॥ किमिदमितिसंपश्य न्विस्मयाकुलमानसः॥पुन

भड. सैन्यपरिक्षिप्तं समन्ततोभ्यपश्यत॥ ततः स सर्वतो वीक्ष्य बहुलोकसमाश्रितं॥ हा कष्टमिति निध्याय चिरादेवं व्यचिन्तयत्॥ नूनं सर्वे इ
मे लोका मज्जिघांसार्थमागताः॥ तदत्र किं करिष्यामि दैवगतिर्भवेद्ध्रुवा॥ इहस्थितोहमालोक्य केनेभ्योपि निवेदितः॥ कथमत्र परित्राताः
केनात्राहं समाश्रितः॥ एक एव मया दृष्टः पुरुषोसौ विहागतः॥ नान्योहि दृश्यते कश्चिदिति ध्यात्वैवमालपत्॥ योसौ मया विसमृणा
लफलाम्बुमूलं दत्त्वा स्वपुरमधिराजमिवाभिरोप्य॥ संप्रापितो जनपदं किं जनानां जनस्मादिदं भयमुपागतमत्र नूनं॥ चित्रं यदे ३७
यमुपकारिणि मेत्र चित्ते सत्त्वार्थमेव मयि विप्रतिजन्म दुःखं॥ अज्ञानदोषमलिनीकृतचित्तवृत्तिर्द्रोहं करोति मनुजोपि कृतोपकारः॥
शक्तः सहस्रमपि दिग्गजयूथपानां दानाम्बुसेकसुरभीकृतगण्डभित्तिः॥ वातः शरज्जलदवृन्दमिवाशु दूरादेकोप्यहं शमयितुं समुपेत
रोषः॥ किं तु रोषवशीभूतमात्मानं कुर्वतो मम॥ सद्धर्मसाधनं शीलं विप्रखण्डितं भवेदपि॥ तद्वरं मे विनाशोपि हन्यमानस्य शत्रुभिः॥ न

४

नुधर्माश्रयंशीलं रक्षितुमुत्सहे खलु ॥ इत्यालापं प्रकुर्वन्स गजराजो महामतिः ॥ संबोधिप्रणिधिं धृत्वा तस्थौ निःकम्पितेन्द्रियः ॥ तमेवं सं
स्थितं दृष्ट्वा बलाध्यक्षाः ससैन्यकाः ॥ सर्वेपि ते महामात्रैः सहा ददातुमुपासरन् ॥ तान्सर्वान्समुपायातान्समीक्ष्य स गजः सुधीः ॥ निःक
म्पमानसस्तस्थौ सद्योगीव समाहितः ॥ एवं तस्य मनो भद्र दृष्ट्वा शीलसमाहितं ॥ ज्ञात्वा सर्वे महामात्राः समीक्ष्य तमुपाश्रयन् ॥ ततस्ति पुष्क
रं धृत्वा महामात्राः प्रमोदिताः ॥ तं गजेन्द्रं समादाय राजान्तिकमुपानयन् ॥ एहि भद्र प्रसीदात्र स्वामिना दर्शनं कुरु ॥ इत्युक्त्वा ते पुरो
नीत्वा नृपतेस्तमदर्शयन् ॥ तं गजेन्द्रमुपानीतं समीक्ष्य स नराधिपः ॥ अहो गजमिमं भद्रमित्युक्त्वा प्रात्यनन्दत ॥ तदा तस्य गजेन्द्रस्य माता स
त्र वने स्थिता ॥ समयेतिक्रमे पुत्रं स्मृत्वैवं साप्यचिन्तयत् ॥ हा मे पुत्रो गतः कुत्र सायमपीह नागतः ॥ कथं मद्विस्मृतो येव चरन्ते तिष्ठते
कुह ॥ नूनं मे सोसुभद्राङ्गो दयाप्रशान्ततेन्द्रियः ॥ वने दृष्ट्वा नरेन्द्रेण गृहीत्वानीयते पुरे ॥ शक्तोप्यसौ नरेन्द्रस्य सैन्यान्सबलानपि ॥ सिं

मद.

हृदूवमृगानेको नाशयितुं पुरीमपि ॥ न दुःखमपि कंचित्स्न नाशयन्ति कदाचन ॥ दयाकारुण्यभद्रात्मा सुहृद्भ्यः पश्यते जगत् ॥ हा कष्टं जीर्ण्णि
नांगाहं प्रियात्मजवियोगिता ॥ रोदनाश्रुविलिप्ताक्षी शोकदुःखाग्निदाहिता ॥ मन्दभाग्या शरण्यात्र निर्गतिरपरायणा ॥ यदात्मजम
पश्यन्ती श्रेजेयं मरणं ध्रुवं ॥ किं नु विश्वसुखोत्साहं कृत्वा मा दुःखभागिनीं ॥ यदहं मातृभक्तेन स्वात्मजेन वियोगिता ॥ शैलेऽस्मिन् श्रुत
निर्झराम्बुनिवहप्रक्षालितानातोपले· तिष्ठन्तीं स्वसुतोपनीतशालिलाहारेण संवर्द्धितां ॥ सर्वास्वस्थमनन्तदुःखनिहतामन्धामनाथां त्वमां· ३१८
हृक्षां पुत्रवियोगशोककृपणां कृत्वा विधेः किं सुखं ॥ ग्रहणामपि गतसनागवर्यः क्षितिपतियोग्यमपि प्रणीतमन्नं ॥ नरपतिनि
यतं प्रवृत्तशोकं· स्मरति ममैव तु धार्मिकोऽद्यनूनं ॥ पतितमपि पलाशं शाद्वलं पल्लवं वा· प्रियतनयवियुक्ता प्राप्तमप्यश्नामि ॥ क
थमहमुपनीतं तेन भक्त्यान्यदद्यां· भवतु मयि मृतायां प्रीतिचेता कृतान्तः ॥ नागोन्मूलितभग्नपादपलतं व्याधूतपुष्पोत्करं· भूय

सेन विनावनं कुसुमितैः संगम्यते शाखिभिः ॥ भूमिः क्रीडनपांसुना गजपतेः संरूढशस्यश्रिया. स्वच्छैश्चापि सरः पयोभिरनिशं तस्माह
पंकाविलं ॥ इत्येवं विलपन्ती सा माता स्मृत्वा तमात्मजं ॥ अनाहारानुशोचन्ती तरुतलेन्वषीदत ॥ तदात्मजः सखीशोपि मातृस्नेहवियार्दितः ॥
आहारे विरतोत्साहः पद्मस्त्रेवासरश्छन्नैः ॥ ततः सनन्दितो राजा सर्वजनसमन्वितः ॥ तं गजेन्द्रं पुरस्कृत्य महोत्साहैः सहाचरत् ॥ तं गजे
न्द्रं पुरोधाय नृपतिः प्राभिनन्दितः ॥ भद्रयात्रामहोत्साहैर्वाराणसीमुपासरत् ॥ तत्र तं गजमानीतं श्रुत्वा सर्वेपि पौरिकाः ॥ द्रष्टुं सम
नुमोदन्तः सहसा निर्ययुः पुरात् ॥ तत्र तं समुपानीतं दृष्ट्वा सर्वेपि तेमुदा ॥ अहो भद्रमिति प्रोक्त्वा समीक्षन्त प्रणेमिरे ॥ एवं चरन्तक
मेणासौ संप्रविष्टः प्रशोभयन् ॥ सर्वैः पुराश्रितैर्लोकैर्वन्द्यमानः प्रशंसितः ॥ मंगलविधिसत्कारैः पूज्यमानः समन्ततः ॥ प्रेक्ष्यमा
नो महोत्साहैः सह तत्र पुरे ययौ ॥ तं समीक्ष्य समायातं सर्वाः पुराश्रिताः स्त्रियः ॥ पुष्पलाजाक्षतैश्चापि प्रावकीर्य ववन्दिरे एवं

लोकाः गुरुमातापितृममदः

भद्र.
सर्वेपितेलोकाः समीक्ष्यतं गजाधिपं ॥ समभिमोदितात्मानो नाभिजग्मुर्गृहं समाययुः ॥ एवं सप्रवरो हस्ती सर्वान्लोकान्प्रमोदयन् ॥ क्रमे
णाभिगतस्तत्र राजकुलमुपाययौ ॥ तत्र सर्वे महामात्रास्तं गजेन्द्रं समादरान् ॥ समामंत्र्य समाधाय हस्तिशालामुपानयन् ॥ तत्रते तंमु
दानीय्या वस्त्रान्नानं समादरात् ॥ सुगंधिस्वच्छशीतांबुः पुरतः प्रत्युपढौकयन् ॥ ततसुगंधिजलं दृष्ट्वा मातरं सोभ्यनुस्मरन् ॥ ॥
गलदश्रुर्विलक्षात्मा पातुं नैवात्यवांछत ॥ ततसुगंधिजलं पातुमनीछंतं समीक्षपतं ॥ राजभोग्यान्युपस्थाप्य सर्वेतमेवमब्रुवन् ॥ इदं ३१९
नागेन्द्र सुस्वादु सुशीतलं जलंपिब ॥ भुंक्ष्वैतान्यपि भोग्यानि सुपथ्यसुरसानि हि ॥ एवं तैः प्रार्थ्यमानोपि सगजेन्द्रोप्रबोधितः ॥ जलंभो
ग्यानि सर्वाणि किंचिदपि नवांछत ॥ एवं तं विरताहारं दृष्ट्वा सर्वे निषादिनः ॥ आश्वासयित्वांकुशं धृत्वा भोजयितुं समुद्यताः ॥ तथाप्यसौ गजो
नैव पातुं भोक्तुमपश्यत ॥ ततः सर्वेपिते तस्य मृत्युशंकाभयान्विताः ॥ सहसा पुरतो गत्वा राजाग्रे वं न्यवेदयत ॥ स्वामिन्नयं गजेन्द्रोमु

किंचित्समागतम्

सुरभिस्वच्छशीतलं ॥प्रणीतंसुरसाहारं द्रष्टुमपिनवांछत ॥ तद्दृष्ट्वायंकथंजीवेदनाहारःक्षुधातुरः॥ तदुपायंनपश्यामोयेनभोग्यंसभोक्ष्यते॥ ए
वंनरुदितंश्रुत्वानृपतिर्विस्मयान्वितः ॥सतत्राशुस्वयंगत्वा ददर्शतगजाधिपं ॥ आहारविरतोत्साहं पानंचविरतोत्सुकं॥ समीक्ष्यपुरतस्स्थित्वा
संपश्यन्नेवमब्रवीत्॥ किंतेदुःखंगजेन्द्रात्र यदाहारंनवांछसि ॥ यदिजीवेच्छितेवांछा भुंक्ष्वभोग्यंजलंपिब ॥ गंधोदारिसदाश्रक्ष्णकीकिश
लयं भोज्यंचनानारसं। कस्मादत्सिनमोदकानिसुरभीण्यास्वादयुक्तानिच॥ मामानागगृहेचाग्रहाराः सलिलं स्नानायपानायवा. वी
च्छसिद्विपयूथपाधिपश्शुरं राज्यस्यगुर्वीमम॥ ॥एवंराज्ञासमादिष्टं निशम्यसगजाधिपः॥ प्राप्तंकालमिमंभूपं वोधयितु
मिहाधुना॥ इतिमत्वागजेन्द्रोसौ गम्भीरेणान्तवाचसा॥ नृपतिंतंसमालोक्य शनैरेवमभाषत॥ नरेन्द्रदुर्वलात्तृक्षाकरेणुजीर्णितेन्द्रिया॥ चरडार(?)रोमहा
रण्येनिवसन्तीममप्रसूः॥ स्वात्मजंमामनुस्मृत्य भ्रमन्तीसादिवानिशं॥ पतित्वाकराटकाकीर्णे स्वश्रेयायाश्रमालयं॥ इतिचिन्ताविषस्यान्मा मातुःस्मृ

भद्र. त्वादिवानिशं ॥ स्नेहदुःखाग्निसंतप्ता भोक्तुं पातुं च नोत्सहे ॥ तामदृष्ट्वा न पास्यामि जलं भोक्ष्यामि नाशनं ॥ अपि देहमिमं त्यक्त्वा यास्याम्यतो यमालयं ॥ ए
वं तद्भाषितं श्रुत्वा नृपोतिविस्मयान्वितः ॥ तमेवं सुदृशापश्यन्मनसैवं व्यचिन्तयेत् ॥ अहो चित्रं गजस्यास्य मातर्यैवं सुभक्तिता ॥ ईदृक्स्वमातरि स्नेहभ
क्तिर्नृणां न विद्यते ॥ तदेनं मातृसद्भक्तिमन्तं विमुच्य सांप्रतं ॥ प्रेषयेयं वने तत्र यत्र सा जननी स्थिता ॥ इति निश्चित्य भूमीन्द्रः सर्वान्स्तान् गजपालकान्
॥ महामात्रान्समामंत्र्य संपश्यन्नेवमादिशत् ॥ मुच्यतामेन मानोलोतक्षिप्रं मातृसुभक्तिभृत् ॥ स्नेहगौरवसत्कारैर्यः संपुष्णाति मातरं ॥ मात्रास २८०
मेतु नागोयं सहसर्वैश्च बांधवैः ॥ नूनं युक्तप्रवासेन मातुस्मरति सर्वदा ॥ इत्यादिष्टं नरेन्द्रेण श्रुत्वा सर्वे निषादिनः ॥ तं गजेन्द्रं महासत्वं मालानात्समुमुच
ईतं ॥ अथ स गजयूथेन्द्रो विमुक्तः प्राभिनन्दितः ॥ तं नृपतिं महीपालं सम्पश्यन्नेवमब्रवीत् ॥ नरनाथ यथा ब्रवन्धमोक्षात् स्वजनानन्दित
स्त्वयाहं । अविरलगिरि धर्मचेतनस्त्वं शरदां रमभोनथासहस्वं ॥ स्वस्मिन्स्त्रागात्यये पिपितारक्षितिपश्रयत्नैः श्रुश्रुपितव्यमथ मातरि चादरे

रा। तिर्यग्गतेषु नरदेव हृपैव कार्या. मैत्र्यं मनस्समनुकम्प्य यथा प्रजासु ॥ भृत्येषु बन्धुषु सुहृत्सु समाश्रितेषु. सैन्येषु मंत्रिषु यति द्विज दीक्षितेषु
। पौरेषु दीनकृपणाध्वगयाचकेषु. मैत्रीं यथात्मनि नरेन्द्र तथा कुरुष्व ॥ अतः परीक्ष्य बहुशः स्वयमेव राजन्. दण्डे परे स्वपरनेयमतिर्विदध्याः॥ नि
त्याप्रमत्तनिरतो विरतश्च पापात् धर्मेण आधिगणार्थे निखिलां धरित्रीं ॥ चण्डानिलोद्धतहुताशशिखाकलापं. मा भीषणं नरक रंक कृतान्धकारं॥
यस्मात्प्रुवन्ति नरकं नरवीर घोरं. सर्वं प्रमत्तचरितं तदुशन्ति सन्तः॥ यत्संहतिं जलमुचां परिपाटयन्तो. ध्वान्तं जसा समभिभूय बलैरुपेताः॥ ऐन्द्रीं
सभां नृपतयो नृप संप्रयाता. धर्मस्य तैर्नैर्देव कथयन्ति विजृम्भितं तत् ॥ धर्मार्थ शोनवविशांकुर गर्भगौरं. भूतिप्रसूत्व च सुखानि महान्ति धर्मति
॥ धर्मात्मकोहि मरणान्न बिभेति जन्तु. धर्मे रताः शमपुरीमुपयान्ति चान्ते॥ यान्तु द्विषस्तव वशं नृप धर्मयोगात्. नन्दन्तु ते स्वजननन्दन बान्धवाश्च
॥ मा भून्नयं च परचक्रकृतं प्रजासु. शश्वद्यशश्च भवतः समुपैतु वृद्धिं ॥ सत्वानामुपकार पारगमनव्यापारतात्पर्यवान्. कृत्स्नां सागर वारिभू

७८. रिनिचयक्ष्मामान्तले रवामिमां॥ उर्वी गर्वमपास्य याहि सततं धर्मानुयोगाच्चिरं। गत्वं देववनायमेनमतिधीः स्वस्यत्वलुबोगम्यते॥ ॥इत्येवंध
र्मवर्षेण संतोषितो नराधिपः॥ नगजेन्द्रं महासत्वं सत्पुत्रः पितरं यथा॥ आचार्यमिव सच्छिष्यः शास्तारं सद्गुणार्थिकः॥ नत्वा प्रदक्षिणीकृ
त्य क्षमयित्वा च नन्दयन्॥ वनाय प्रेषयामास मातुर्भजनसाधने॥ ततः सगजराजस्तं नरदत्तं नराधिपं॥ समामंत्र्य समालोक्य मुदा संप्रस्थि
तोऽचरत्॥ तत्र समीक्ष्यमानोसौ गजः सर्वैः पुराश्रितैः॥ सहसा संप्रयात स्तच्चगाररण्यमुपासरत्॥ तदा सा जननी पुत्रशोकाग्निदहितेछि ३८१
या॥ अन्धीभूता तरोर्मूले रुदती चैन्यसीदत॥ तदा तत्र प्रविष्टोसौ गजाधिपः समन्ततः॥ भ्रमन्सो मातरं द्रष्टुं प्रचचार विलोकयन्॥ अप
श्यन्मातरं तत्र सगजेन्द्रोतिशोकितः॥ अद्रिशिखरमारुह्य प्रोच्चैर्नादं समुञ्चत॥ तत्पुत्ररवमाकर्ण्य जननी सा समुत्थिता॥ तदात्म
जागतं मत्वा तथोच्चार्नादं समुञ्चत॥ तद्ध्वादं समाकर्ण्य मत्वा मातुररवं मुदा॥ सगजः सहसा तस्माच्छिखरात्समवातरत्॥ भूयोपि स तदु

नादं श्रुत्वा प्रानुसरद्द्रुतं ॥ प्रचरन्नसहसा तत्र ह्रदतीरमुपासरत् ॥ तत्र वृक्षतलासीनां मातरं तां समीक्ष्य सः ॥ गजेन्द्रः सहसोपेत्य प्रणात्वार
समुपाश्रयत् ॥ तं समुपाश्रितं मत्वा संस्पृश्य शान्ती करेणासा ॥ कोऽत्रायं समुपागत्य ममाग्रे समुपस्थितः ॥ शनैर्मन्दस्वरा स्पृष्ट्वा पप्रच्छैवं स
मादरात् ॥ एवं मात्रा परिस्पृष्ट्वा पृष्टं स नन्दनो गजः ॥ तवात्मजोऽहमायातस्त्वम्मानुरभिनन्द्यतु ॥ इति पुत्रोदितं श्रुत्वा जननी साभिनन्दिता
त्वा = ४ ॥ कुत्र गतो त्वमायासि साम्प्रतं मे पुरो वद ॥ इति मात्रोदितं श्रुत्वा स गजेन्द्रो यथाक्रमं ॥ एतत्सर्वं स्ववृत्तान्तं विस्तरेण न्यवेदयत् ॥ तदा
त्मजसमाख्यातं श्रुत्वा सा जननी मुदा ॥ दत्वा भद्राशिषं तस्मै नरेन्द्रायैवमब्रवीत् ॥ चिरंजीवतु राजासौ काशीपुराधिपो नृपः ॥ बंधनाद्येन मे
पुत्रो मुक्तो भूयः समागतः ॥ तथा स नृपतिर्मुक्तो भववाराभिबन्धनात् ॥ निःक्लेशः परिशुद्धात्मा ब्रह्मलोकेऽभिगच्छतु ॥ एवं सा वरुशोदत्वा भ
द्राशिषं महीभुजे ॥ आत्मजस्य शिरः स्पृष्ट्वा श्रयोडेन समनन्दत ॥ ततो मातुः शरीरं स समीक्ष्य रेणुरूक्षितं ॥ लताभिरभिमृज्यालं सर्वाङ्गं

भद्र.

समशोधयत् ॥ ततोहृदाम्बुधारौघेन समादाय मुहुर्मुहुः ॥ स्नापयित्वा तनुं मातु रक्षिणीसममार्जयत् ॥ ततोनिर्मलदृष्टाक्षीजननीसातमात्मजं ॥
मुदृष्ट्वासुचिरंप्रेक्ष्य सचिदानन्दमाययौ ॥ तथासनन्दनश्चापि समीक्ष्यतांसुलोचनां ॥ मातरंसुचिरंप्रेक्ष्य सचिदानन्दितोभवत् ॥ ततःस
नन्दनोमातुर्भोग्यंपानंयथेप्सितं ॥ संप्रदत्त्वादिवानक्तंप्रभेजेसमुपस्थितः ॥ एवंसगजराजोपि भोग्यंपानंयथेप्सितं ॥ भुक्त्वापीत्वास्वयंमा
तुःसेवांकृत्वासदाचरत् ॥ एवंसागौतमीमातापुत्रवियोगशोकिना ॥ अंधीभूतापुनःपुत्रमासाद्याभूत्सुलोचनी ॥ योसौगजेन्द्रमाताभूद्गौतमी ३८२
साप्रजापती ॥ योऽसौपुत्रोगजेन्द्रोभूदहमेवप्रमन्यतां ॥ योसौकाश्याधिपोराजानरदत्तोभवत्तदा ॥ नन्दाख्योयंममभ्रातापितृव्यनन्दनःखलु ॥
इहापिगौतमीमाताममशोकाग्निदाहिता ॥ अंधीभूतापिभूयोमां समागम्यसुनेत्रिका ॥ इतिशास्तमुनिप्रोक्तं श्रुत्वाभूपादयोनृपाः ॥ तथाहीति
प्रतिज्ञायप्राप्यनन्दत्सबोधिनाः ॥ ॥ इतिश्रीभद्रकल्पाभिधानावदानेमातृपोषहस्तिजातकपरिवर्तोनामत्रयस्त्रिंशतितमोध्यायः ॥ ३३ ॥

अथानन्दः स्मितास्योसौ न्यवेदयन्मुनीश्वरं ॥ प्रत्यागतं राजमार्गात्प्राज्ञलोकसमावृतं ॥ भवन्तया भवद्भार्या पतिव्रता यशोधरा ॥ यतिमपि भवन्तं त्वां स
मीक्ष्यात्यनुरागिना ॥ धृत्वा मोदकपात्रं य त्सर्वालंकारमण्डिता ॥ लोभयित्वा वशीकृत्वा चारयितुं गृहाश्रमे ॥ समीक्षन्ती प्रशत्रास्या नीलाम्बुजसु
लोचना ॥ पुरतः समुपाश्रित्य संतस्थे प्राभिनन्दिता ॥ एतद्धेतु समादिश्य सर्वान्त्रस्मान्प्रबोधय ॥ एवं संप्रार्थितं तेन श्रुत्वा सोर्हन्सुधीर्यतिः ॥ सविस्मयस
भालोक्य महितानन्दमादिशत् ॥ ॥ प्राग्जन्माभ्यासलीला दृतिसरसलसद्वासनामूलशेषा · त्रिःसंगस्यापि जन्तौ कमलकलनया जायते मानसेस्मि
न् ॥ रागः संभोगलीला परिमलपटला कृष्टसर्वेन्द्रियाणां . मेकत्रैवातिमात्रं सरसमधुलिहं बन्धनं यः करोति ॥ ॥ पुरापि त्वं ऋषिभूतं मां स
मीक्ष्य सानुरागिता ॥ यशोधरा वशीकर्तुं लोभयित्वा समोदकैः ॥ कृत्वा रागानुसंरक्तं बोधयन्ती प्रयत्नतः ॥ राज्याश्रमे प्रतिष्ठाप्य प्रारभ्य प्रश्रथे
प्सितं ॥ तद्यथाभूत्पुरा श्रीमान् काश्यराजो नराधिपः ॥ सर्वहितार्थसंभर्ता सर्वदुष्टप्रमर्द्दकः ॥ पुत्रार्थिनस्तस्य नृपः प्रयत्नैरेकैव कन्या नलि

भद्र. नीवभूव । प्रायःप्रजापालनसावलेपाः स्वल्पान्वया एव भवन्ति भूपाः ॥ अन्तंपुरे तां परिवर्द्धमानां · चिन्तेव चिन्तां नृपतिर्विचार्य । आहूय विद्वत्सु
खानमात्यान्प्रजागरयस्तरन्तिर्जगाद ॥ विस्तीर्णशाखंस्थिरवद्धमूलं मत्पुत्रतं सर्वजनोपजीव्यं ॥ आवैमि तुल्यं प्रसवाभिहीनं सुराक्षनं वृक्षमिवा
धिपत्यं । एकैव कन्यानलिनी ममास्ति · वयःप्रदानोचितमाश्रयन्ती ॥ तस्यां प्रयत्नेन वरार्थिनाया मपत्यतातत्वगुणायोपि दूरे । पारोप्रदीप्तामिव
दीपवर्त्तिं धर्त्तुं न शक्नोति जनः स्वकन्यां ॥ न्यासार्थतुल्या हि परार्प्पणीया · श्रिताकुलाप्तवकुलस्य कन्या ॥ न भृत्यदेया न च पौरयोग्या · दूरो ३८३
चिता एव नरेन्द्रकन्या । अज्ञाननित्याचरितस्य दूरे मृतस्य यातस्य च को विशेषः ॥ तस्मात्प्रयत्नेन मया सकश्चिज्जामातृभावे गुणवान्त्रियो
ज्य ॥ स्वदेशमुत्सृज्य ममात्र राज्ये · बिभर्त्ति यः पुत्र इवाधिपत्यं ॥ श्रुतं मया जकुसुतापवाह पुराणवदान्ते पलिनोपकरोठ । सहांजनी नाम्नि तपो
वनान्ते · राजर्षिरास्ते किल काश्यपाख्य ॥ तस्य श्रुतं प्रश्रवसोनवीजं · दैवोदयादस्मिन्सन्ततार्थे । तोयस्य हाज्ञी हिरणी निपीय · सुवर्णवर्णांसुषु

वे कुमारं ॥ वनेमृगीसून्यदिवर्द्धितोसौ . पित्रागृहीतो विहितव्रतश्च । नाम्नाप्रसिद्धऋश्यशृंगः संलक्ष्यमानांगुलमात्रशृंगः ॥ युवाचकुर्व्वन्‌प
रायणाश्च . सब्रह्मचारी विमलस्वभावः ॥ निःसंगवासाद्विषयानभिज्ञ स्तत्राकठोरार्करुचिश्चकास्ति ॥ सचेन्नलिन्याः पतितामुपैति तदेवयंत्राःप्रश
मंनयायात् । तेजोनिधेरानयनेतु तस्य . विचिंत्यतां काप्युपायपयुक्तिः ॥ श्रुत्वेति वाक्यं नृपतेरमात्या विचार्यसर्वे सुचिरान्नमूचुः । तदाश्रमोपा
न्तवनं विहर्तुं . विसृज्यतां संप्रतिराजपुत्री ॥ तथाबलुब्धानुमतेन राज्ञा . समीहितार्थं विनिवेद्यसर्वं । ययौ विसृष्टा ननिलीविहर्तुं . रतुंभ्रग
ल्भैवमुनेःकुमारं ॥ कान्तावनान्ते शनकैरवाप्य . लीलाभिरामाविजहारतन्वी ॥ वालानिलेनाकलितालकैव . संचारिणी चारुविलोचनासा ॥
विलासपुष्पावचयेनतस्या . भृंगोत्तरंगं विवलत्कुरंगं । वनंविलोक्य स्वतपोवनान्ता . त्समाययौ कौतुकवान्कुमारः ॥ ससन्नतांगीममनुष्यसंगस्त
रंगितां योवनविभ्रमेण । ददर्शतां विस्मयनिर्निमेषः स्फुरन्नीलोत्पललाक्षीं कमलायताक्षः ॥ विलोक्य कान्तां मृगलोचनानां . रामानभिज्ञोपि र

मड. मुनिर्जहर्ष: । नवासनाभ्यासविलीनमन्नं जहाति जंतुर्विषयाभिलाषं ॥ सुस्निग्धमग्र्यां विनिवेश्य दृष्टिं मृगीसुतस्तद्वदनारविन्दे । विद्याधरं
वा मुनिपुत्रकं वा विज्ञाय मां प्रीतिरसाद्बबन्धे ॥ प्रतिप्रणामावनताननाया: तस्याः प्रवालद्युतिनाधरेण । आच्छाद्यमानो भुवनेन रागं जया
हरागोप्यमलस्वभाव: ॥ मां स्वेदसीदत्तिलकालकान्तामुत्कम्पितांगीमवदत्कुमार: । सखेव कान्त्या मधुरस्वरेण स्मरोपचारेषु कृतोपदे
शां ॥ भो: स्वागतं ते मुनिपुत्र कश्चित्तपोवनान्ते कुशलं मृगाणां । सदा त्वदालोकननिश्चलानां स्थलीषु येषां विमल: प्रचार: ॥ इदं विलो ३५४
क्याद्य तवानवद्यं दिव्यव्रतस्यामृतवर्षिरूपं ॥ वपुर्जयद्वल्कलितं मुनीनां पुष्पकुमाराणाभिवतर्कयामि ॥ अयं नवस्निग्धजटाकलाप:
कृतोपकार: कुसुमैर्लताभि: । नवाभ्रसंभारविजृम्भमानमयूरबर्हप्रतिमां बिभर्ति ॥ इदं नवश्रीफलयुग्मशोभि वक्षोविनिक्षिप्तसिताक्षसूत्रं । आ
मृत्रयश्चालकुरंगनेत्रे वैविद्य मैत्रीमनसश्च कान्ति ॥ होमाग्निलग्नस्फुटविस्फुलिंगां मौञ्जीं दधानां नवपट्टवांकां । कुतूहलं बाललतेव तन्वी तनुस

११

वेयं न तनोति कस्य ॥ ब्रूहि प्रसन्नं क्व तपोवनं ते त्वत्पादविन्यासविकाशिनीभिः । यत्र प्रभाभिः सततं विभाति संचारिणी पंकजिनी स्थलीषु ॥ इति कृपा
णां ललनानभिज्ञं मृगस्वभावं तमवेत्य बाला । उत्सृज्य लज्जामविशंकमाना नियतप्रलीलाभरणा बभूव ॥ ततस्तमानन्दरसार्द्रचित्तं ध्यानैर्विभाव्य स्मे
दुभाषिणी सा । तपोवनस्यास्य समीपवर्ती ममाश्रमः स्वादुफलप्रसूनः ॥ उक्त्वेति खण्डस्मितमोदकैः सा तस्याथ कर्पूरपरागगर्भैः । चकार माधूर्य
चमत्क्रियार्हैः विलोभनं सत्कविसूक्ततुल्यैः ॥ तैर्मोदकैः सा रसनानुकूले श्रिन्नोत्सवैः प्रेममयैर्विलासैः । कर्णामृतैश्च प्रणयोक्तिबन्धैः स्वैवा
गुरेवार्य मृगं जहार ॥ तपोवनं दर्शय मे महार्ह मित्युक्तवन्तं भुजवल्लरीभ्यां । गाढं परिष्वज्य निमीलिताक्ष मेहीति तं राजसुता जगाद ॥ तं प्रस्थितं सा
कतिचित्पदानि गत्वा पुनस्तं गमनाय सज्जं । रथं समारुह्य विसार्य पाणि मारोहणायैव गिरान्वयुंक्त ॥ रथे तुरंगान्स विलोक्य युक्तान्मत्वाऽक
रंगान्विगलद्विशेषः । मृगीसुतोऽहं न मृगाग्रमेव स्पर्शाभिपश्यामिति तामुवाच ॥ रथेन गत्वाथ मनोजवेन मुनीन्द्रसूनुं मनसा वहन्ती ।

भऽ नरेन्द्रकन्यास्वपुरीमवाप्य न्यवेदयत्तच्चरितं नृपाय॥ राजापितस्यागमनेप्रयत्ना·दचिन्तयन्मंत्रिभिरभ्युपायं। हृत्प्रयुक्ताहरणाभियोगो· भीतः कृ
शानुप्रतिमान्महर्षेः॥ ततः कुमाराहरणे पुनस्तां· विलासवत्यौ विससर्ज्ज राजा। नौभिर्धियाबन्धकृताश्रमाभि· मन्दाकिनीकूलतपोवनान्तं। अत्रा
न्तरेत्यक्तसमस्तकृत्यं· नृपात्मजाध्याननिबद्धमौनं॥ नवाभिलाषव्रतमाकलय्य· एतं मुनिर्विस्मयनिश्चलोभूत्। पृष्टोथपित्रामुनिपुत्रकस्तं
प्रोवाच निश्वासपरम्पराभिः॥ समीपसत्काश्रममञ्जरीणां· दिशन्मृदुः पल्लवलास्यलीलां॥ तपोवने तातमयाद्यदृष्टः प्रमृष्टचन्द्रप्रति ३८५
बिम्बवक्त्रः। महर्षिसूनुर्नयनप्रभाभि र्दर्पापहारी हरिणांगनानां॥ वक्षःकटीमणिमेखलावशक्ता· विचित्रसूत्राणि विभान्ति तस्य। इन्द्रा
युधापत्यनिभानि सन्ति ममापि किं तात न तद्विधानि॥ अद्यापि मे नर्त्तनतीव तस्य· वाणीशनाशप्रति भापि यस्याः। श्रुता मया चूतवने
कदाचिन्न कोकिलानां न च षट्पदानां॥ मंदाकिनीसज्जनलीनफेना· समानभासा नववल्कलेन। तनीयसी तस्य तनुर्विभाति· नेदं

प्रियंवल्कलकं समाध्य ॥ निवेश्य वक्त्रं वदनारविन्दे · निपीअ दोर्भ्यां सुचिरं वपुर्मे । चकेज पद्मप्रस्फुरिताधरोसौ · हर्षामृतस्पर्शविशेषदीक्षा
न् ॥ नमेक्षमाकान्तविलक्षणेन · नैवं क्षणं नेन विनावनेस्मिन् । करोतिमेयत्कुतशासनेन · दृशोः पदं मोहसखेन निद्रा ॥ दृष्टिस्तदालो
कनमीहते मे श्रुतिर्विनातद्वचनं नचास्ते । तच्चिन्तयातान्यतिधीर्नितान्तं · मंत्रं नजानाति नतन्वथायाः ॥ श्रुत्वेतिकान्ताहृतमानसस्य · स
न्तापचिन्तो पिशुनं महर्षिः । पुत्रस्यवाक्यं नपसोन्तरायं · निपातभीरुः सुचिरं प्रदध्यौ ॥ कथं तपस्वी मृगशावकोयं · तीव्रेणापुष्पायुधस्म
रलुब्धकेन । वरांगनावागुरयाकयाक्षा · कृतावपातीसहसा निबद्धः ॥ क्षणं विचिन्त्येति मुनिर्मनीषी · मनोविकारं तनयस्य हर्तुं । त
मब्रवीत्कामभुजंगमुक्तं · विषं वहन्तं विषयाभिलाषं ॥ नैपुत्र साधुः समहर्षिसूनुः सा स्त्री मनोजन्मभुजंगरूपी । · तत्रक्षतं तीव्र
तरानुरागा · विषव्यथामेव बिभर्ति मूढः ॥ जनाः प्रसक्ताञ्जनकालकूटे · विद्धाः सुतीक्ष्णैः स्मरमार्गणकटाक्षैः । शोचन्ति योषिद्भुज

भ८.

पाशवद्धाः संसारकारासदने सदोषाः ॥ घनस्य संमोहमलीमसस्य · भवस्य मध्ये कुटिलाः स्फुरन्त्यः । कुर्वन्ति कान्ता नटिताः क्षणा
नाः पुंसां वियोगे भृशमन्धकारं ॥ एताभिरुत्तालकुटुम्बिनीभि· रुन्मादमूर्छाविभवश्वरीभिः । स्त्रीभिर्महामोहपिशाचिकाभिः सं
स्पृश्यमानः कुशलीन लोकः ॥ स्वस्थास्ततस्ते निवसन्ति संतः सन्तोषकान्तेषु तपोवनेषु । संतापनं स्त्रीनयनास्त्रशल्यं · येषां शितं चे
तसि नावसन्नं ॥ इति प्रयत्नाज्जनकेन तेन · विविक्तवाक्यैः प्रतिबोध्यमानः । नावुध्यतासौ मदनान्वितेन · लावण्यपानेन विघूर्णमा ३०६
नः ॥ अथापरेद्युर्विहितस्वकृत्ये · मुनौ फलेभ्याहरणाय याते । लीलावतीलोभयितुं कुमारं · नरेन्द्रकन्या पुनराजगाम ॥ दासीग
णानानुगतालतानां · पुष्पस्मितानां श्रियमाश्रयन्ती ॥ सांगं नवानंगमिवैकशृंगं · मासाद्य हृष्टा विवभौ नतांगी ॥ दिव्याचितं क
ल्पलताग्रलब्धैः · फलाभिरामं रुचिराश्रमं मे । द्रष्टुं त्वमेहीत्यभिधाय सा तं · निनाय तीरं त्रिदशापगायाः ॥ सततरत्नोज्ज्वलचित्र

पत्र·सुवर्णांवदृश्री फलपुष्परम्यं । तैर्भिर्द्धतं कृत्रिममाकलय्य·सुखाश्चर्यं हर्षमिवारुरोह ॥ संसारतुल्येन हृतः सतेन· सरित्प्रवाहेकप
शृक्रमेण । अज्ञाततत्त्वोप्यनुरक्तवृत्ति· र्वाराणशीं श्रीतिरिवाससाद ॥ अवाप्य काश्यपस्य स राजधानीं· महीमहेन्द्रस्य महार्हरत्नां । मेने मु
नीन्द्रैः कथितं कथासु· स्वर्गाङ्गणां दृष्टिपथं प्रयातं ॥ ततः प्रमोदाकुलितः क्षितीश·स्तस्मै मृगाक्षीं विधिना विधिज्ञः । प्रदक्षिणावर्तवि
लोलहारां· ददौ सुतां पूर्णमनोरथश्रीः ॥ नरेन्द्रकन्याकरसक्तपाणि· र्विवाहहव्यावहितं हुताशं । अमन्यतानन्यमतिः कुमारस्त
त्रापि होत्रस्य परं प्रकारं ॥ महोत्सवोत्साहरसाकुलेन· संपूज्यमानः प्रणयेन राज्ञा । स्थित्वा तपः संरतस्य वनत्र· जायासखः स्वं प्र
त्ययौ वनान्तं ॥ जायाद्वितीयं विजने व्रजन्तं· दृष्ट्वा सुतीनं जननी प्रहृष्टा । मुनिप्रसादान्न मनुष्यवाचा· कुतस्तवेयं ललनेत्युवाच ॥
सुतां प्रणाम्य प्रणया द्वभाषे· मातर्मयायं श्रुतिमान्ययस्य । प्राप्तः प्रयत्नात्स्पृहणीयरूपः सख्येन दीप्तानलसाक्षिकोऽन ॥ इति

भ.ड. कुमारांतमं वेत्य मुग्धं मृगीं विवाहादिकथानभिज्ञां । पतिव्रतानामथ तापसीनां तपोवनं सा शरणं कैर्निनाय ॥ धर्मानुगा ते सहचारिणीयं पत्नी
त्वमस्याः पतिरित्यशेषं । विवाहवृत्तं कथितं सतीभिः श्रुत्वा प्रियामेव विवेद जायां ॥ पित्रा प्रहर्षाद् पिकाश्यपेन विवाहधर्मे विहितोपदे
शः ॥ प्रणम्य तं तद्वच सा जगाम पुरीं सभार्यः श्वशुरस्य राज्ञः ॥ हर्षेन तेन स्वपदेभिषिक्तः सत्योज्वलं शान्तिपथं श्रितेन । शशास सामन्त
किरीटकोटिविश्रान्तपादः समहीमशेषां ॥ तदा सा नलिनी भर्तुरजं मृगीसुतं ॥ कृषिबीजसमुत्पन्नं मत्वैवं समचिन्तयेत ॥ तद्रूपं प ३८७
रिभ्रान्त्या निर्विकल्पो जितेन्द्रियः ॥ सद्धर्मसाधनोत्साही भवद्वृत्ति निरादरः ॥ नूनमेष परित्यज्य राज्याश्रमं वनाश्रमे ॥ गत्वैकान्तं स
माश्रित्य तपोव्रतं समाचरेत ॥ इत्यस्य कृपते श्चिन्तं राज्यधर्मे यथा रमेत ॥ तथाहं सुवशीकृत्य चारयेयं सदा सुखं ॥ इति निश्चित्य सा
भार्या नलिनी तं नृपं पतिं ॥ ससंगीतमहोत्साहैः प्रारमयद्दिवानिशं ॥ ततः सा नलिनी भार्या स्वामिनं च नराधिपं ॥ समेत्य समुपाम

न्प संप्रपन्नेवमब्रवीत् ॥ स्वामिन्नत्र पुरे नित्यं समारुह्य गजं हयं ॥ भ्रमित्वा पौरिकान्सर्वान्सम्यग्प्रपन्न भिनन्दय ॥ ततस्ते पौरिकाः सर्वे त्वां स
मीक्ष्याभिनन्दिताः ॥ देवराजं यथा देवाः प्रभजेयुः सदोद्गतान् ॥ इति भार्योदितं श्रुत्वा स नरेन्द्रोऽनुमोदितः ॥ तथा भ्रमन् पुरे लोकान्संमो
दयितुमैच्छत ॥ तथा स नृपती राजा समारुह्य गजं हयं ॥ भ्रमित्वा नगरे नित्यं पौरान्सम्यग्नोदयेत ॥ तत्रयाः प्रमदाः कान्ताः समीक्ष्य तं
नराधिपं ॥ तन्मुखाब्जामृतं पातुं सर्वास्ताः प्रववाञ्छिरे ॥ ततस्ताः प्रमदाः सर्वाः स्वस्व इतेन तं नृप ॥ कामक्रीडासुखं भोक्तुं प्रार्थयन्त स्मरोद्भ्रान्ता
॥ तैरितैः प्रार्थितं श्रुत्वा स नरेन्द्रोऽनुमोदितः ॥ तथा ताभि रतिक्रीडा सुखं भोक्तुं समैच्छत ॥ ततः स नृपती राजा सर्वास्ताः कामिनीः क्रमात् ॥ अन्तः
पुरे समागम्य प्ररमित्वात्यनन्दयत् ॥ ततस्ताः प्रमदाकान्ता नलिनीप्रमुखा अपि ॥ बभूवुर्गर्भिणाः सर्वाः पाण्डुवर्णाः कृशाङ्गिकाः ॥ ततः
सा समये सूत नलिनी युग्ममात्मजं ॥ एवं ताः प्रमदाः सर्वाः सुषुपुर्नन्दनं क्रमात् ॥ ते सर्वे शिशवः कान्ता भद्रलक्षणमण्डिताः ॥ दिव्याति

सुन्दराः कान्ता दर्शनीया मनोहरा ॥ तान्वीक्ष्य जनकः सर्वान्कान्दिव्यातिसुन्दरान् ॥ पश्यन्ननभिसंतुष्टस्तयौ निश्चलितेन्द्रियः ॥ ततः स जनकस्तेषां
कृत्वा जातिमहं क्रमात् ॥ नामधेयादिकं कृत्वा महानन्दं समाययौ ॥ ततस्ते बालकाः सर्वे धात्रीभिः प्रतिपालिताः ॥ प्रवर्द्धिताः सुप्रसांगा बभूवुरभि
सुन्दराः ॥ ततः सर्वे कुमारास्ते गुरुणा समुपाश्रिताः ॥ क्रमेण सर्वशास्त्राणां लघुपारं समाययुः ॥ ततो स्वशस्त्रविद्यानांऽन्तं पारं समागताः ॥ गज
हयमनुष्यादि रत्नलक्षणकोविदाः ॥ ततः सा समये भूभृन्नलिनी गर्भिता सती ॥ तथा च समये सूत दारकं युग्ममात्मजं ॥ एवं सा गर्भिणी भूता स ३८८
मये सूत दारकं ॥ अयं च भद्ररूपांगं राजलक्षणमण्डितं ॥ एवं तस्या महादेव्या नलिन्या गर्भसंभवा ॥ द्वात्रिंशद्यमला पुत्राः संप्रजाता निरंतरम् ॥ स
र्वे ते नलिनीपुत्रा भद्रलक्षणमण्डिताः ॥ दिव्यातिसुन्दरा कान्ता दर्शनीया मनोहराः ॥ तथान्यासां च पत्नीनां नृपस्य वीजसंभवं ॥ सहस्रमात्मजं पुत्रं
संप्रजातं यथाक्रमं ॥ ते पि च दारकाः सर्वे भद्रलक्षणमण्डिताः ॥ समानरूपिका कान्ता दर्शनीया मनोरमाः ॥ सर्वे पि ते महासत्वाः सर्वविद्याविच

सगणाः ॥ धीराविद्याविनीतामहद्गुणाः श्रीसाधनोद्यताः॥ सर्वेपि ते समागम्य समारुह्य गजान्हयान् ॥ अमितावानगरे पौरान्सम्पश्य नोत्यनन्दय
न् ॥ तान्सर्वान्सुप्रसन्नास्यान्सर्वालंकारभूषितान् ॥ सर्वे पौराः समालोक्य प्रशशंसुः प्रमोदिता ॥ देवा अपि च तान्दृष्ट्वा विस्मयाक्रान्तमा
नसाः ॥ प्रशंसित्वा समीक्षन्तः प्रात्यनन्दयन्साधिताः॥ ते पि सर्वे सदाभ्यर्च्य देवान्सर्वान्कुलाधिपान् ॥ सर्वार्थिभ्यः सदा दानं दत्वा यथेप्
सितं मुदा ॥ परस्परहितं कृत्वा परस्परानुरागिनः॥ सद्धर्मसाधनं कृत्वा प्ररेमिरभिनन्दिता ॥ एवं तान्स्वात्मजान्सर्वान्त्रीजिधर्मार्थसा
धकान् ॥ महासत्वान्समालोक्य प्रात्यनन्दत्पितान्नृपः ॥ सोपि राजा महादाता दत्वा दानं यथेप्सितं ॥ सर्वसत्वहितं कृत्वा सर्वाल्लोकानन्व
नोदयत् ॥ एवं सम्राडिह भूमीन्द्रः सर्वान्समभिनन्दयन् ॥ स्वात्मजानिव संपाल्य प्राचारयत्सदा सुखं ॥ तदा सः पृथिवीनाथः सर्वत्रापि म
हीतले ॥ घण्टाघोषं समुच्चार्य लोकानेवमचोदयत् ॥ सदात्र भूतले कश्चिन्न गोवधानकेनचित ॥ प्रमादाद्यदि वध्येत येन सोपि नि

भद्र. हन्यते॥ इत्यनुशासनं राज्ञः श्रुत्वा सर्वेपि मानवाः॥ मार्गं समीक्ष्य सर्वत्र संपालयन्तु सर्वदा॥ इत्यनुशासनं राज्ञः श्रुत्वा सर्वे नरा अपि॥ मार्गं
समीक्ष्य संरक्ष्य प्राचारयत यथासुखं॥ तदारभ्य सदा सर्वे मृगाः सर्वत्र भूतले॥ अन्नकाभिलाषितं भोग्यं संचेरिरे भिनन्दिताः॥ एवं तस्मिन्
महीपाले सर्वत्रापि महीतले॥ निरुत्पातं शुभोत्साहं प्रावर्त्तत निरन्तरं॥ ततः स नृपतिर्वृद्धो विषये विरतोत्सवः॥ राजधर्मे विरक्तात्मा
मुनिधर्माभिलाषितः॥ ततः स नन्दनं ज्येष्ठं अभिषिंच्य यथाविधि॥ नृपासने प्रतिष्ठाप्य चकार नृपतिं प्रभुं॥ ततो राज्याश्रमं त्यक्त्वा व २८८
नाश्रमे समाश्रयन्॥ मुनिचर्याव्रतं धृत्वा सञ्चचेर समाहितः॥ ततः कालसमाप्राप्ते मुनीन्द्रं समनुस्मरन्॥ समाहित तनुं त्यक्त्वा ब्र
ह्मलोकेभ्यगाछत॥ एवं सा नलिनी देवी कालेस्मृत्वा मुनीश्वरं॥ समाहिता तनुं त्यक्त्वा ब्रह्मलोकेभ्यगछत॥ यत्रर्षिः काश्यपोभूत्सरा
जा शुद्धोदनः खलु॥ या मृगी च तदाभूत्सा गौतमी हि प्रजापती॥ काश्यो राजा तदा योभूत् स राडपाशिरसौ खलु॥ एकशृंग ऋषिर्योभू

दहमेवमुनीश्वरः॥ नलिनीनृपकन्याया तदाभूत्साय शोधरा॥ एकश्रृंगसुताआसन् येते सर्वेपि भिक्षवः॥ तदापि सा समालोक्य मांमुनि
जयशोधरा॥ स्वात्मानं समलंकृत्य मोदकेन वशेनयत्॥ एतर्ह्यपिस्वमात्मान मलंकृत्ययशोधरा॥ मांमुनीन्द्रं वशीकर्त्तुं मोदकेनाभ्यलो
भयत्॥ ॥ इति श्रीभद्रकल्पावदाने अशोकोपगुप्त संभाषणे एकश्रृंगमुनि नलिनी काश्यप कन्याजात परिवर्त्तोचितनुत्रिंशति
तमोऽध्यायः॥ ३४ ॥ ०००००० ॥ अथनिमंत्रितोराज्ञा पूर्ववद्भिक्षुभिः सह॥ तस्माद्वनात्प्रस्थितोसौ पुनर्जगाम तत्पुरं॥ त
त्रपार्घ्यंगृहीत्वासौ क्रमाद्भिक्षुभिरन्वितः॥ स्वासने समुपाविश्य तस्थौ सम्भासयन्पुरं॥ शुद्धोदनोऽसौ भूपालः पूजयामास तंजि
नं॥ यथाविधि सहामात्यो भिक्षुसंघसमन्वितं॥ ततः क्षीरोदनैः पूर्णं पञ्चामृतसमन्वितैः॥ श्रीघनाय ददौ पात्रं सशिष्यायपि
तानृपः॥ ततः क्षमार्थनां कृत्वा गोतमीसहितो नृपः॥ नीचासनसमासीनस्तस्थौ मंत्रिजनान्वितः॥ अथश्रीभगवान्स्तस्मै दद

भद्र. वाशीस्समन्वितो ॥ चतुर्वर्गोपदेवानस्तु जगदुद्धारकामुकः ॥ इत्याशीर्वचसा भूपं सामात्यं नन्दयञ्जिनः ॥ भिक्षुसंघपरिवृतो जगामासौ पुन
र्वनं ॥ सद्धर्मश्रवणाकांक्षी भूपोप्यनुययौ मुदा ॥ पौरामात्यजनैः सार्द्धं नानावाद्यपुरस्कृतः ॥ तत्र धर्मासनासीन आनन्दादिपुरस्कृतः ॥
भूमीपालादिभिर्लोकैः परिवृतो जगद्गुरुः ॥ राहुलाद्याञ्जनान्बोधिचर्यायां योकुमुत्सकः ॥ समादिशत्समालोक्य तमानन्दं सभूमिपं ॥
आनन्द सकलायूयं निर्वाणपदमाश्रिताः ॥ गार्हस्थ्यं विषवत्यक्त्वा जन्ममृत्युजरान्तकाः ॥ क्लेशारिपरिभेत्तारो भवपञ्जलदारणाः ॥ २९०
शमितक्लेशनिचयाः संसाराब्धिपारगाः ॥ प्रव्रज्यासंवरं धृत्वा येचरन्ति निराकुलाः ॥ निरञ्जनास्ते निर्वान्ति चतुर्भयविमोचिताः ॥ प्र
व्राजयन्तु तान्सर्वान् राहुलाद्यान्कुमारकान् ॥ निर्वाणपदलाभाय जरारोगविनाशने ॥ यावद्गार्हस्थ्यचर्यायां तावद्दुःखायशोभयं ॥
जरानिधनजन्मादितरंगसंकुलं सदा ॥ कामपाशैः समाकृष्य दुर्यशोभयगह्वरे ॥ नीयन्ते तेन विज्ञोपि मारेणाग्रहधार्मिकः ॥ किंतु

१

जगद्धितार्थेन निर्वाणाय परायणाय च ॥ प्राप्तोस्मि दुर्लभां बोधिं तस्मात्प्रव्राजयन्तु नान् ॥ इत्युक्त्वा सर्वविन्नाथः पूर्वजातिमनुस्मरन् ॥ समादिशत्स्व
हसितः सुमनसोमावदानकम् ॥ श्रूयतां भिक्षवः सन्त्या सुदासनृपतेः कथां ॥ योलभदपवादत्त्वं कामरागसमुद्भवं ॥ तद्यथाभूत्पुराकाश्यां सुदा
साख्यो नराधिपः ॥ त्रिरत्नदासः सततं यः सुदास इवसेवकः ॥ शीलवाञ्छ्रुतवान्त्यागी दयावान्दान्तमानसः ॥ प्रतापवां क्षमी धीमान् धृति
वान्गुणवांस्तथा ॥ कान्तिकीर्त्तिद्युतिह्रीश्री दाक्षिण्यबलसंयुतः ॥ गुणालंकारमालाभिर्यौवनग्रथिनाकुला ॥ तस्मिंश्च सत्त्वे सकलाभ्यभ्
भिरे यथाशशीः ॥ रक्षणाद्रञ्जनाच्चापि विनयात्स्नेहतस्तथा ॥ पिताप्रजानां यश्चासीत् तासांतुजन्महेतवः ॥ प्रजापालनचातुर्यादानकर्मणि
तत्परः ॥ सुभाषितार्थश्रवणे प्रियो विद्वज्जने सदा ॥ एवं संपालयामास जनान्वाराणसीभुवान ॥ भक्ष्यवस्त्रप्रदानैश्च कल्पद्रुम इवाप
रः ॥ कपोतवक्षाः कमलायताक्षो महाभुजः शालविशालदेहः ॥ रक्तांशलो हस्तिसुहस्तपीवरः विम्बोष्ठ कुन्दद्युतिदन्तपंक्तिः ॥ स्वभाव

भ६. तुल्याविमलाच प्रज्ञा · प्रज्ञाभितुल्यागमस्तथयस्य ॥ आरंभएवागमतुल्यसत्वा · तथोदयारम्भसमानमेव ॥ प्रजाविभूत्यर्थमुदारबुद्धि · स्ताभ्योग्रही
न्नवलिमिवसाधुः ॥ रविर्यथादानसहस्रगोराणं · रसानगृह्णन्नसुरप्रत्ममगामी ॥ जुगोपचात्मानमनुत्रसोपि · भेजेचधर्मंपरिमुक्तरोगः ॥ अनीप्सुरे
प्यर्थरयंगृहीते · अनीप्सितोपिसुखभोगमन्वभूत् ॥ ज्ञानेचमौनंचतुरोगुणान्नो · शक्तौक्षमादानपरायणाश्च ॥ गुणानुबंधात्सततंचयस्य · गुणाःस
मस्ताःप्रसवाइवासन् ॥ स्थित्यर्थदण्डं विहितस्यतस्य · पत्नीसमेतस्यसुतान्नयेच ॥ धर्मार्थकामाःसततंगृहेषु · मिथस्तदासंश्रयतन्नरास्ते ॥ स ३८१
वींतिरिक्तेनबलेनचौर्य · तेजांसिसर्वाणिविभाविनायः ॥ सर्वाणिकृत्वासुकृतानितस्थौ · हिमाचलोमेरुरिवाद्रिराजः ॥ यस्यप्रजाधर्मपरायणा
स्तालेखाभिलेख्यात्परहृत्तिमाश्रयन् ॥ नचातिलोभाःपरद्रव्यकृत्यौ · नैमित्थितानीतिविचक्षणास्य ॥ यश्चाभवद्रूपगुणैःसुगम्य · अधृष्यरू
वंभयदैःस्वकान्तिभिः ॥ यादोस्यगम्भोरमणीयरत्नै · गम्यंसरत्नाकरवत्प्रपेदुः ॥ एवंसुदत्तोनृपतिर्बभूव · यशःसुपुण्यैःपरिनिर्मिते

व॥ विद्वत्सु विद्वान् सकलार्थवेत्ता । कलाकलाज्ञान मदनः स साक्षात्॥ किंत्वस्य दुष्टो मदनाभिरागात्कामेषु मिथ्याभिचरः स देकः॥ गुणेषु स
र्वेषु हि दोष एकः । वसिष्ठ नीन्दोः किरणेष्विवांकः॥ ॥ अथैकदा स दासौ कामक्रीडासमुत्सुकः॥ वसन्तर्तौ मनोरम्ये उद्याने रमितुं
मुदा॥ सान्तःपुरो हयारूढः सामात्यजनपौरिकः॥ वाद्यनृत्यमहोत्साहे वीरागास्यासमाचरन्॥ सर्वान्तःपुरिकालोकाः महोद्यानेयुर्मुदा॥ सर्व
र्तुपादपाकीर्णे पिककूलमनोरमे॥ अथ दैववशाद्राजा हयेनापहृतस्तदा॥ एकाकी प्राविशद्दुर्गं दूरे निर्जनकाननं॥ तदनुचराः सर्वे प्रत्याय
र्युर्निरुत्सुकाः॥ क्रीडित्वा तन्महोद्याने तस्थुः सामात्यपौरिकाः॥ चतुर्योजनमाक्रम्य तरसा सोऽनुरंगमः॥ महागहनमासाद्य श्रान्तस्तस्थौ तरो
स्तले॥ सोऽपि राजापरिश्रान्तो हयान्नौवतारच॥ वृक्षछायातृणासीनः क्षणं विश्रम्य तस्थिवान्॥ अनुचरान पश्यंश्च तत्रासंमोहमाययौ॥
पुनर्धैर्यं समालम्ब्य हयं प्राह रुषाकुलः॥ प्रियं वद तरं कृत्वा समरे त्वं हयाधिप॥ सांप्रतं प्राकरोः प्राणसंशयं भयमावहन्॥ किमर्थं

भद्र. मागतोसित्वं दूराद्दूरतरे वने ॥ केनवा प्रेषितोसित्वं नरस्त्रीचासि सांप्रतं ॥ किंस्मृत्वा किंतु संभोक्तुं पातुं कस्याशयात तथा ॥ एकाकिनं प्राह रे मां महाधन्यो
सि सांप्रतं ॥ त्वं किं न भक्ष्यते सिंहे द्वीपिभिर्व्यंगमानिति ॥ मामेव भक्षयिष्यन्ति त्वामारुह्य समागतं ॥ पुनरुह्य हनभयाज्जात दर्शो प्राह रे वने ॥ तरसावा
पुनर्लीन मां कशाघातदायिनं ॥ प्रभ्रम्येवं हयं राजा तथार्तो जलमैछत ॥ तस्मिन्न दृष्ट्वा पानीयं पुनः संमोहमाययौ ॥ पिपासितो हयो राजा
भ्रम्यमानसु दुस्तरं ॥ साश्रुनेत्रः सनिश्वासस्तस्थौ संविग्नमानसः ॥ ततः शीतलवातान्न चेतान्नृपस्तृषातुरः ॥ तस्मात्त्विहयं वद्धा जलार्थी वन ३९२
माविशत ॥ बुभुक्षितानां श्रान्तानां तृषितानां कुतो भयं ॥ सभयेपि भ्रमंस्तत्र नालभत्तत्र विज्जलं ॥ घर्माक्रान्तः परिश्रान्तः शनैर्विश्रम्य पा
दपे ॥ गत्वा दूरे प्रपाटस्य शब्दं शुश्राव भूमिपः ॥ श्रान्तोपि तद्रवं श्रुत्वा सहसा समुपाचरत् ॥ निपीय तद्रवं दूरात्कर्णाभ्यां संपिबन्निव ॥ त
त्र प्रपाते शाखासौ शीतछायासमन्विते ॥ स्थित्वा शिलातले शीतं जलं पपौ सुधारसं ॥ तथांगं स्नापयित्वा तैर्जलक्रीडां चकार सः ॥ गतप्रत्यागत

प्राणाः समन्वभूज्ज्वलेन हो ॥ शिलातले महच्छायां विश्राममप्रमोदितः ॥ सर्वर्त्तुवृक्षसंकीर्णं उद्यानं विस्मरन्निव ॥ गायनीतं सरस्काकी तच्छोभां द
र्शयन्मुदा ॥ पिपासितो मुहुः पीत्वा पयोश्चांगगुणान्वितं ॥ नानातरुसमाकीर्णं पुष्पफलसमन्वितं ॥ दृष्ट्वा सविस्मयस्तस्थौ भृङ्गावन्यिकरवं सु
रवं ॥ मकरन्दस्य पानेन मत्तानामलिनां रवं ॥ श्रुत्वा कामाग्निसंतप्तः सस्मार राजः पुरंजनं ॥ शीतच्छायाश्रितो वापि शीकराढ्येन वायुना ॥ स्पर्श
प्रपातान्मुकशोशागेन सोत्सुकदा हतः ॥ अन्तः पुरजनं स्मृत्वा पुनः संमोहमाययौ ॥ शीतवाताम्बुसंप्राप्त चेतनो विललापच ॥ हा प्रिये क्वस्थितासि
त्वं मां विहायाधुनावने ॥ उद्यानेरमितुं तत्र निर्गतोस्मिपुराप्रिये ॥ हयाधमेनापहृतो वियोगोद्य दिवात्वया ॥ निरन्तः प्रतिकेवात्र रागा
ग्निं काशमिष्यति ॥ कोकिलालिरवं श्रुत्वा रन्तुमुद्यानमन्दिरे ॥ वसन्तेद्यतिमुदितो निर्गतोस्मिजनान्वितः ॥ इत्येवं विलपन्स्मृत्वा भोगिनीस्तामुहुर्मुहुः ॥ राग
तापेन संदिग्धः पुनः संमोहमाययौ ॥ तस्मिन्नवसरे तत्र सिद्धैकाप्रागताश्रमन् ॥ तरुणीमदगोन्मत्तायुवानं पतिमिच्छुका ॥ हा प्रियेति रवं श्रुत्वा स

भ.ड. दिनान्तरमागता ॥ पुरुषस्यनिनादोयं यूनः प्रियावियोगिनः ॥ तेनसार्द्धं रमिष्यामि मर्त्यनापिसखभक्षिणा ॥ दुःसहरागवाणेन संदिग्धामदना
तुरा ॥ इतिविचिन्त्य सासिंही तत्समीपमगाद्रुतं ॥ द्विपरूपं समालोक्य रागेनमोहमाययौ ॥ सोपिमोहवशं प्राप्तं तां दृष्ट्वा भीतमानसः ॥ हाहाह
तोस्मिकान्तारे भक्ष्यमाणोन यतिच ॥ प्राह्वाथ चेतनां सिंही रागेन विह्वलाशया ॥ पतितं भूपतिं दृष्ट्वा नृवाचाप्रत्यबोधयत् ॥ उत्तिष्ठ नृकुमार त्वं मा
भैषीः मत्सकाशतः ॥ अहं कामातुरा मुग्धा त्वयुवा पुरुषोप्यसि ॥ त्वद्विलापरवं श्रुत्वा वियोगदुःसहं विभो ॥ प्रियाभवितुमिच्छन्ती यदृच्छयागतास् ३९३
म्यहं ॥ तत्कामरागदानेन संतर्पयचिरातुरां ॥ भागधेयान्महाभाग प्रालभं त्वां सुदुर्लभं ॥ तस्यामित्युच्यमानायामपिनाश्युत्थितोनृपः ॥ हाहतो
स्मीतिप्रवदन् तस्थौ निश्वासतत्परः ॥ मुहुरुच्चार्यमानायां यदानैवसमुत्थितः ॥ स्वयंभुजाभ्यामाश्लिष्य चुम्बित्वोत्थापयन्नृपं ॥ आश्लिष्य
मानः सतया चुम्ब्यमानोमुहुर्मुहुः ॥ तद्भयेनचरागेन विह्वलांगस्तरामभूत् ॥ सिंहीप्राहपुनर्भूपं कातराक्षं सुविह्वलं ॥ साश्रुनेत्रं साञ्जलिं

तं किंचिद्विह्वलमानसा ॥ माभीर्माभीर्युवन्मर्त्ये मनोनालिभयंप्रभो ॥ भोगामृतप्रदानेन मांजीवय कृपानिधे ॥ पुरुषार्थविभ्रमामि निर्जने
स्मिंवनेधुना ॥ कामरागाग्निसंतप्ताप्रोन्मत्ताइवजंगले ॥ देवाङ्गवजंप्राप्तोस्मि पुरुषं दिव्यरूपिणां ॥ तस्मान्निर्भीतितः सम्यक् कामयमां
प्रियाधिप ॥ इत्युक्तां तांसमालोक्य स्मितास्यः प्रावदन्नृपः ॥ कामाग्निनपितः सोपि स्वभावात्कामुकामुदा ॥ एह्येहि सुप्रिये भव्ये तोषयामि रसामृ
तैः ॥ दैवात्संमीलितश्चात्र सिंहीग्रोराक्योर्द्ध्रुवं ॥ इत्युक्त्वाश्लेषयामास कामुकः कामुकीं नृपः ॥ संयोगेन तरुणीयूनोः क्वजातिः क्वभयंप्रियं ॥ क्री
डान्ते सिंहिनी प्राह मुदिता भूपतिं प्रभुं ॥ इयत्र पार्वतीसाध्वी कामेवात्तृप्तमानसा ॥ प्रभो मानुषभर्त्तात्वं सदात्रस्थातुमर्हति ॥ पाषाणाको
ष्ठसंगुप्ते स्थापयामि महोज्वले ॥ गजेन्द्रमुक्तालंकारैः शोभयामि महत्तरैः ॥ मृगाद्धितरलं देव भोजयामि रसान्वितं ॥ हस्तिस्कन्दं समा
रुह्य क्रीडावनमुपाचर ॥ नृपेन्द्रतनयोसित्वं मृगेन्द्रतनयाप्यहं ॥ नेदावयोर्विवाहत्वं युक्तमेव महीपते ॥ यथासमाश्रिताः पूर्याप्रजा

भड़. त्वांमानयन्तिताः॥ तथावनचराः सर्वे ममतानं वनाधिपं॥ पालयसियथात्वंतानीतिविज्ञानतत्परः॥जनकोमेससचिवोन्यायतः प्रात्युपालयत्॥ दे
वान्त्रौसंगमोजातो राजकुलाभिजन्मनोः॥ तन्मांमा मातृपज विभो त्वत्यादौ हि गतिर्मम॥ इत्युक्त्वा तत्पदाम्भोजे पूजयामास मालया॥ कृत्वा प्रद
क्षिणांचापि वन्दित्वा सा हरेः सुता॥ प्रत्युवाच सुदासोसौ मुदातां संस्मिताननः॥ गजेन्द्रमुक्तिलाभाय दोलायमानसः सुधीः॥ महाभाग्यतया
दैवाज्जातः संगम आवयोः॥ कृतोहं मान मत्त्वषणुः त्वं कृतो हरिशावका॥ भाग्यतो लभ्यते येषां सिंहानां दर्शनं वने॥ तयासार्द्धं रतिक्रीडा ममा ३९४
तोभाग्यसंततिः॥ किंत्वत्र नैव वत्स्यामि सभये ऽगोचरे नृणां॥ तव भर्त्तायदा सिंहः आगच्छेत् श्वास्यते कुह॥ इति यास्यामि नगरं प्रायामि पु
नरंतिके॥ मय्यस्त्वनुग्रहश्चेत्तु देहि गजेन्द्रमौक्तिकान्॥ इत्युक्त्वा वनं प्रत्याह पुनर्हर्यक्षनन्दना॥ तद्वियोगविषावाप्ता साश्रुनेत्रा स
गद्गदा॥ अभर्तृकास्मि वालाहं त्वमेकः पतिरीश्वरः॥ तस्माच्छंकां समुत्सृज्य विहरस्वात्र कानने॥ माता पिता प्रभो चाहं त्रयः सन्ति म

हावने ॥ भवद्राज्ये भवान्यद्वत्तद्वदेकः पिता मम ॥ भवत्सुतान्यत्रविषये देयान्नृपात्मजायच ॥ तथास्तु दूरे सिंहस्य सुतायदीयते मनु ॥
किंतु सर्वत्र गहने वृन्दाः सन्ति सहस्रशः ॥ मृगानांच करीणांच महिषानांच घृष्टिनां ॥ हरिः प्रतिवनं किंवा वसत्येको वनाधिपः ॥ यथैको
गगणे चन्द्रो नक्षत्राणीव हन्तिनि ॥ व्याघ्रादयो वनचरा मृत्यवः परिचारिकाः ॥ पौरा यथा महीपानां भवतां चक्रवर्तिनां ॥ तनयां ते यथा पौरा
कामयेयुर्न मानिनां ॥ वनाधिपसुतां तद्वद् व्याघ्रादयो वनेचराः ॥ तद्दुहन्त्र भर्तरं भोगं तनयाया हरेर्मम ॥ तस्माद्दयां पुरस्कृत्य सदा वसि
तुमर्हसि ॥ इति तस्या वचः श्रुत्वा प्रत्याह भीतमानसः ॥ प्रत्यागन्तुं तां बोधयितुं छद्मना स महीपतिः ॥ मणिमालां समादाय प्रागच्छ प्रिय
वध्वस्भे ॥ यावदश्वं नयिष्यामि तावज्जीर्ज्यं च साधय ॥ इत्युक्ते सिंघिनी प्रीता ययौ त्वमाश्रये तथा ॥ तस्मै भोज्याय मांसादि ग्रहणाभि
नन्दिता ॥ तस्मिन् नक्षणे सोऽपि दासोऽसौ तरसा तत्र प्रायये ॥ अश्वमारुह्य सभया वनान्निर्गच्छते द्रुतं ॥ पूर्ववज्जरसा सोपि कशापात भया

भद्र.

दपि ॥ प्राधावत्तत्क्षणाद्वेगी तद्भयात्कोपितोयथा ॥ यदाहरसिमामश्व वेगवानसित्वं तदा ॥ सांप्रतं कातरोसीति राज्ञा संचोदितो मुहुः ॥ प्रत्या
गतो वनात्तस्माद्न्यकाननमाप्तवान् ॥ तथापि सभयोद्विग्नः संचोदयति तं मुहुः ॥ दैवान्मार्गं समासाद्य ददर्श स्वस्वसैन्यकान् ॥ प्रत्याग
नगात्तत्रारोधीरेरोवाचरन्नृपः ॥ ततः सायंतनुध्याने प्राप्तो विश्रान्तमाचरन् ॥ विस्मापयामास जनान्त्रिगर्थनिजहट्टिकं ॥ सिद्धिन्यास
ह्याक्रीडा कथयामास नैवतां ॥ कथितुं मत्स्यकश्चापि स्मृत्वैवतत्राशविह्वलः ॥ क्रीडित्वान्नः पुरजनैः संक्षेपात्स्वगृहं भूपतिः ॥ प्रत्याप्ययो ३९५
ह्याकुलः परं मोक्षिजनान्वितः ॥ तत्राद्दृश्यसिद्धिनीतं साश्रुनेत्राभ्रमद्वने ॥ सर्वत्रान्विष्यमाणापि तमप्राप्य मुमूर्छ सा ॥ हा मन्दभाग्या धा
वामि कुत्र यास्यामि सांप्रतं ॥ क्व गताप्रेषयित्वा मां कुत्र यास्यसि भूमिप ॥ विलपित्वा मुहुर्मुग्धा निराशा स्वगृहं ययौ ॥ विनिद्रा रात्रिमा
नीय विवश्रान्तद्गतस्तनः ॥ दैवात्सा गर्भिणी भूता कामरागाभिमोहिता ॥ मुहुर्मुहुर्ददर्शाशु स्वर्णं प्रालभ मद्दनकर्जके ॥ तदारभ्य सुदसा ऽ

सो वह्निर्नैव ययौ स्वतः ॥ तां मुहुः संस्मरन् भीतो हीहीकारमुदाहरन् ॥ पितृभ्यां प्रत्यमानासा गर्भाक्रान्ता हरेः सुता ॥ त्यक्त्वा जन्मवनं प्राप्ता द
न्यत्र तत्समागमे ॥ प्राप्ते प्रसमये ऽसूत सिंघिनी मानुषं सुतं ॥ राजलक्षणसम्पन्नं दिव्यातिसुन्दरं सुखं ॥ नरावयवसंपूर्णं पूर्णचन्द्रान
नं वरं ॥ सुदासवीजनिष्पन्नं सुदाससदृशोभितं ॥ तस्यैव रूपवीर्यं च शरीरावयवं तथा ॥ प्रवर्त्तितः प्रदीपात्स्य दीप इव समांशिकः ॥ ता दृष्ट्वा
पुत्रमालोक्य परं शोकमुपाययौ ॥ हाहा कीदृक्सुतो जातो नररूपोऽतिसुन्दरः ॥ नरा हि भक्ष्याः सिंहानां गजाशिनामपि द्विषां ॥ स्वभावतः सिं
ह्यो निर्दया क्रूरमानसाः ॥ पौत्रश्चायमिति दयां परस्य त्वाभिपालयेत् ॥ मातापिता किं क्रूरात्मा नररूपं ममात्मजं ॥ मुहुः पुत्रमुखं
दृष्ट्वा विषादसंकुलेति सा ॥ साश्चर्या पालयामास पाययित्वा स्तनोद्भवं ॥ ततः प्राप्ते द्वादशाहे स्कन्धं आरोप्य बालकं ॥ इतस्ततो वि
भ्रमित्वा वणिक्मार्गमुपासरत् ॥ तत्र मार्गे समासाद्य पाययित्वा स्तनं सुतं ॥ विश्रामं तरुच्छायां दर्शयन्ती वणिग्जनान् ॥ तस्मिन्न

भद्र॰ वसरेतत्र वैरागजनाः समागताः॥ प्रत्यागता वैराग्यन्ते स्तद्धनं समुपायय्युः॥ तत्रमार्गे समायाता ददृशुस्तां सुतान्वितां॥ किंचित्तत्समीपमागत्य
दृष्ट्वार्भकं विस्मितास्मये॥ अहोसिंहीसुतोमर्त्यः कदाचिच्छ्रूयतेनहि॥ सिंघिनीदृश्यतेनापिप्रत्यक्षतः कदाचन॥ इतिविस्मयमापन्ना स्तस्थुः संभाड्
वेक्षणाः॥ सभयाअपिछायायां विश्रश्रुम वैरागजनाः॥ तांवैराजः समालोक्य सलज्जा[illegible]सिंघिनी॥ दानंतमर्भकंतेभ्य इव दूरं वनेययौ॥ तांप
लायिता दृष्ट्वा गत्वा तदन्तिके मुदा॥ सुदासवद्धि राजत्वं ददृशुस्तमर्भकंनरं॥ तमंकमासेप्रजनाः सर्वेऽप्यभिलोकयन्॥ मिथः संभाषणांचक्रु ३९६
ःसाश्चर्यभयमाकुलाः॥ अहोयं बालकोनूनं सुदासांशात्समुद्भवः॥ सिंघिनीगर्भसंजातो दिव्यातिसुन्दराकृती॥ कयाचित्त्यक्तः पापिन्याजाल
गर्भसमुद्भवः॥ सिंघिन्याजायतेमर्त्यः कथमितिसमालपन्॥ सुदासवीजसंजातो बालकोयंभवेद्ध्रुवं॥ दैवाधीनमिदंसर्वं किंकिंनाभूद्भवेद्भुवं
॥ केचिदाहुर्निश्चयंतदित्यस्माभिः श्रुतंतदा॥ अश्वेनापहृतोराजा एकाकी वनमाविशत्॥ सोऽस्माकंकामुकोभूपो नूनंसिंह्यासहारमत॥

कामातुराणां भीतिर्वा त्रपा वा जायते कुतः॥ तदद्भुतमयं बालं नेष्यामो भूपतिं प्रति॥ विस्मयध्यात्यसौ राजा नरसिंहं समीक्ष्यतं॥ सिंघिन्या भ
क्ष्यते किं तु पुष्टांगो यं सुतो पिवा॥ यावद्युवा न भवति सम्यक्तं पालयिष्यति॥ प्रतिपाल्य यथास्माभिः पुष्टांगा भक्ष्यते क्रमात्॥ अजादयः स्वयं ह
त्वा नयासौ भक्ष्यते ध्रुवं॥ इत्यस्माभिः समावाह्य नेष्यामो नगरं प्रति॥ पालयिष्यामि धर्मेण धर्मपुत्रो ह्ययं शिशुः॥ इति संभाष्य ते सर्वे शिबिका
मुपरोपयन्॥ तरसा वनमास्तीर्य पुरान्तिकमुपाययुः॥ ततः काशीमुपाविश्य स्वस्वमन्दिरमाविशन्॥ स्वस्वपित्रोः पदाम्भोजप्रणामप्रमो
दितः॥ ततः प्रातः समुत्थाय संमील्य ते वणिग्जनाः॥ धृत्वार्भकं सरत्नांकं राजद्वारमुपाययुः॥ नत्वा भूपं पुरः स्थाप्य सबालं रत्नप्राभृतं॥ चक्रु
र्विज्ञापनां सर्वे तद्धनं विस्मरान्मुदा॥ तत्प्रवृत्तान्तमाकर्ण्य स्वपुत्रोयमिति स्मरन्॥ तान्प्रशंस्य बालकं तं स्वक्रोडे स्थापयन्मुदा॥ अपुत्रोहं वणि
ग्लोका धर्मपुत्रोस्तु चार्भकः॥ सन्ततिस्थिरतां याति यः स्वपुत्र इव सदा॥ ततः संपालयामास क्रमात्तु स्वांगमात्रकं॥ यथाविधिजातकर्म

भ.ड्र. प्रभृतीन्प्राकरोन्मुदा॥ सौदासनरसिंहेति नाम्नाचकारतंनृपः॥ क्रमात्प्रवर्द्धितो बालो बलवन्नरविक्रमी॥ पुत्रांगवयवाबीरविरराजदिने दिने॥ ततो
यौवनभूतंतं समीक्ष्यापुत्रभूपतिः॥ विवाहकरणोऽमात्यैः संमतंप्राकरोत्तदा॥ यथाविधिविवाहित्वा यौवराज्याभिषेकतः॥ युवराजपदे पुत्रं स्थाप
यामासभूपतिः॥ ततः सुदासोऽभीष्टोऽसौ तमारोप्यस्वके पदे॥ ययौ मुनिवनं पत्नीसहितश्चाश्रयन्नपः॥ सौदासनरसिंहोऽसौ राज्यंप्राप्य
प्रमत्तनः॥ यथाकामंमुदारेमे भूपालक्रूरमानसः॥ प्राप्तेऽथसमये हर्म्यां मान्नदोषप्रभावतः॥ मान्साभिलाषीञ्जनरां बभूवबहुभोजनः ३८७
॥ हत्वाहत्वा स्वयं नित्यं पशून्वगान्प्रमोदितः॥ पक्कासुरससंपर्कं बुभुंजे मान्समुन्मना॥ राजभोग्यादिकं नैष्णुः केवलंमान्सभुक्सदा॥ न
थाप्यतृप्तोसौदासः सद्योमान्समभोजत॥ एवंप्रतिदिनंसद्योमान्सभुक्त्वाबहुज्जरं॥ पीत्वाचौषधानि रक्तानि शरीरमपुष्टयम्॥ सर्वेषामपिमान्सानिभु
क्त्वास्वादमवापसः॥ तथाप्यतृप्तक्रूरात्मा प्रोन्मत्तवत्समाचरत्॥ वनंगत्वाशरं धृत्वा हत्वासर्वान्वनेचरान्॥ स्थित्वातत्रैवबुभुंजे रात्रिंचरइवापरः॥

सर्पा व्याघ्रजलचरान्हत्वा पक्त्वा तथैव च॥ स्वादमासाद्य सौदासः परां मुदमवाप सः॥ कथमेव वरं भोग्यं सुस्वादं पोषकं नरां॥ यदारभ्य तदाहारं श
रीरस्य पुष्टिमाप्नुयां॥ एवं प्रतिदिनं गत्वा वनाशी सचिवैः सह॥ हत्वा वनचरान्सद्यो मान्सं प्राप्याशु भक्षितः॥ न्यवेदयन्मंत्रिणस्ते भीतास्तत्कर्मतो
मुहुः॥ स यस्तरलभोक्तारं निशाचरमिवापरं॥ किमभ्यासि महीपाल सद्यो मान्सं विहंगमत्॥ सुस्वादुरसहीनं तद्दृष्टोसि कथं ननु॥ सद्यो मा
न्सं मनुष्याणां अभक्ष्यं कथितं बुधैः॥ तस्मात्पक्त्वा सोरसाढ्यं भक्षय यथेप्सितं नृप॥ बहवः सूपकारास्ते सन्ति पाकविदो जनाः॥ इत्याकर्ण्य वच
स्तेषां साहंकारः समब्रवीत्॥ किमात्थ सोरसं भोग्यं तदेव बलवर्द्धनं॥ भक्ष्यं पक्वं तथा मान्सं विरसं बलहानिकृत्॥ सद्यो मान्सप्रभोक्तारं प
श्यमां बलवत्तमं॥ तदेव मानिशं भोक्ष्ये शरीरपुष्टिकृद्यतः॥ न श्रुयं लोकि भुवने गजभक्ष्या मृगाधिपाः॥ सद्यो मान्सबलेनैव विक्रमिनः कृशा
अपि॥ तत्रापि नरकव्यंतन्सर्वमान्से बलं मतं॥ सुस्वादुरससंपन्नं यज्ञक्ष्या राक्षसा बलाः॥ शत्रुभिः सह योद्धुं तज्जेतुं मिछामि मंत्रिणाः॥ स

वैकल्परसास्वादी वीरविक्रमिनां वरः॥ इतिब्रुवाणां तं दृष्ट्वा भीतास्तस्थुसकौतुकाः॥ पञ्चास्यतनुजः सोयं इत्युक्तं वणिजेः श्रुतं॥ मानवानपि भक्षेत्सो मातृदोष
विपाकतः॥ मान्साशिन्या ह्ययं पुत्रः प्रनीतासां प्रतं ध्रुवं॥ इति विचिन्त्य सचिवाः सविषादाययुर्गृहान्॥ तस्यामेव निशायां सःऽपुत्रं मान्सभोजने॥ज
नेप्रसुप्ते वैकाकी कोष्ठागाराद्विनिस्सरन्॥ लोकापवादतो भीतः कारागारमुपासरत्॥ जनान्निद्राहतान्दृष्ट्वा हत्वापराधिनं हतं॥ भुक्ता तत्राभितो
मान्सं प्रत्याययावत्नृपतितः॥ प्रभातेऽथ जनानां दृष्ट्वा तस्यास्थिके शसंकुलं॥ साधुनाः श्रावयामासु मंत्रिणः संशयाकुलान्॥ कारागारे ख्यान्विषु
गत्वा सोनरमान्सभुक्॥ प्रतिक्षेपं स्वयं हत्वा उभुजे मान्समुन्मनाः॥ ददर्श मान्सभोक्तारं कदाचिज्जाग्रतो जनः॥ नृपं मत्वा भयोद्विग्नः पलायपी ३९८
कृतं ततः॥ तत्क्षं निवेदयामास रहसि मंत्रिणां जनः॥ संप्रतीतो भवत्सोपि श्रुत्वा स्मृत्वाच तत्कथां॥ संमील्य मंत्रिणो राज्ञी तज्जं संन्यवेदयत्॥
वनेयाते वनिपतौ मृगया मान्सभोक्तरि॥ शृणु देवि परं गुह्यं भवद्विश्वासिनीपरं॥ तेनेत्युक्तं गृह्णतया मान्समश्नान्महीपतिः॥ स्वयं हत्वा

प्रतिनिशं कारागारापराधिनं ॥ प्रतीतास्मो वयं देवि श्रुत्वा भूपस्य तद्वचः ॥ नृमांसमपि भोक्ष्यामि सुस्वादु मितिमानिति ॥ सद्यः क्रव्यभ्रभीकारं द
ष्टापूर्वं सकौतुकाः ॥ नूनं प्राप्भान्नृमांसं स अस्मत्स्वामी निनिः कृपः ॥ किं नु वणिग्गुपानीतः सिंही सुतो वनान्नज ॥ श्रुतोऽस्माभिस्तथा दृष्टः सुदासः
प्रतिपालितः ॥ बहवः प्रहतास्तेन वधितास्तेऽपराधिनः ॥ वनचराणां कासंख्या पक्षिणां चाम्बुचारिणां ॥ हत्वा सर्वाः प्रजाश्चास्मान् त्वामपि भोक्ष्यति
ध्रुवं ॥ परीक्षस्व महादेवि निशायां जागृतारहः ॥ समाकर्ण्य वचस्तेषां धर्मगज्ञाभिधा मुहुः ॥ संत्रासविह्वलोवाच स्वजीवितनिराशिता ॥ श्रु
तं मयापि सचिवाः सखीभ्यो हरिज इति ॥ कारागारस्य विंशोऽसौ दृष्टस्तथैक धानिशि ॥ भवद्वाक्यं तथ्यमेव यतश्च सहसा तथा ॥ यथाय्यं
राजभोग्याशीत्यक्त्वा मांसं नृणां ननु ॥ वनात्प्रत्यागतं भूपं क्रुवनं वनरञ्जकं ॥ वहुधामुकं नरलं स्वयं हत्वा वने चरान् ॥ न्यवेदयन्मंत्रिरास्ते कृताञ्ज
लिपुटा रहः ॥ क्षन्तव्यमपराधं नो विज्ञप्तिं भ्रणु भूपते ॥ माभ्रु हि कव्यमित्थं तन्ते गृहद्रवद्दिवानिशं ॥ नानास्वादरसापन्नं राजभोग्यं प्रभुज्यतां

भ.ड. न ॥ धर्मपत्नी महादेवी इत्यस्मात्प्रब्रवीन्मुहुः ॥ निवारयन्महीपालं मांसभोग्यातिलालसं ॥ भक्षिष्यति क्रमादित्थं नृमांसमपि लोलुभः ॥ भं
विष्यति महोत्पातं देशेस्मिन्नित्यध्रुवं ॥ तस्मान्माकुरुतद्भोग्यं पापमश्रूपभोजनं ॥ यतो निरामिषाहारो राजश्च धर्ममूलकं ॥ स ग्राममांसप्र
भोक्तारं दृष्ट्वान्यच्चादृशोस्त्वमः ॥ रोगी प्रागात्यहन्त्वैतान् समश्नादपराधिनः ॥ कदुष्णमोदकं योग्यं कुलधर्मे समाचर ॥ कृतप्रणयाक्रुद्धा
योमिकाशीक्षत्रेमहत्तने ॥ स्वयं तान्कान्तकारं मांसाशिनं प्रवंचय ॥ वन्यं नेतस्यभूपाल अथवा मांसमादिश ॥ इति नर्मिरम्याकरापे प्रह ३९९
सितः स मब्रवीत ॥ तत्र कथं त्यज्यते भोग्यं यच्छुष्कं हरिणा सदा ॥ ये पक्षुद्रा मंत्रिणास्ते भोक्तारोत्र कशांगिकाः ॥ मृगास्तु तत्प्रभोक्तारश्चा
नकाश्चात्रभक्षिनः ॥ व्याघ्रो बलवान्व्याघ्रस्तथा सिंहो वनाधिपः ॥ ये ये ऽधिपा भाग्यवन्तस्ते ते व्याघ्रिनस्तथा ॥ वीरविक्रमिनां भो
ग्यं मांसभक्षनचापरं ॥ किन्त्वक्षीनाकृशावीनामयं वध्यं निधि ॥ नृमांसाशी कथं दुष्टाय प्राप्तिः स्वल्पवीर्यकैः ॥ कस्मान्माहत्य शंकात्रकं

कर्णव्याख्यास्यमानमेनः॥ ॐ मितस्ययवबधुत्वा सामपर्याः प्रयपुष्कफल॥ सर्वसंमीलपनहरि विदक्षमंमनंमनः॥ तोलवकः समाश्रय प्रतिबाध्रिंम
हायूभाः॥ हत्वाऽऽगमनंसदर्दं गिष्ठ ध्वंमत्लनीऊ्राहे॥ मूाफकायीयदिन्पाहनिघ्य स्पपबाधिनं॥ मदानिष्का भयंदस्माद्धलादीपनयाभिमं
॥ तूपा त्वापिसापबाधेमद्रं देह्मनीतिमर्नोत्तिवंदं॥ दहसहस्त्रीत्विदंहा गर्धनऊहीघ्यातिदूष्टीश॥ मत्येतिबाजोमंग स्थूसच्छ प्रतिद्राहना ऊना
॥ वहिःस्थिमे वर्द्रतेः स्वेः स्वे निर्निरुद्ध स्तायूधेक्षफ॥ मान्मातिलोथीमादामी इष्टानां कः प्रतिडिमां॥ कोस्तुगमबाधिनेस्कुन्यकान्तोगमना
न्तिकयेषा॥ प्रमूफाकोमसमालोक्य मसेभयात्यविक्रयत्र॥ मत्रापबाधिनंहत्वा वृद्धस्वच्छयाघृही॥ पीत्वापिपातिमायकंक्रयाद्रुष्ट
वरीघद्यः॥ नहहत्वा बाऊनाश्वर्व समाहृत्यत्वकाऊ्रनान्॥ पूर्वस्त्रूयमहादवीं पथिवृस्यसमकुवन॥ वध्यमांबाऊसंस्थं सन्तु घामिनंमू
ढः॥ निष्कामयपत्राक्षापि वान्धित्वानिऊनिवन॥ ममंश्राहमलाङ्गः ऊपिनःसहसायुधा॥ मंत्रिस्तोहंमहीपालः कुमध्येस्वपाधकं

८६. गजादिगंतमाकर्ण्य प्रत्याहर्तुं इवाभयं ॥ इत्याग्रहाद्यथाशीर्जननी त समाश्रिता ॥ स्थित्वा मात्रा मृदा सर्वं सुकाकर्थ्यं समाचर ॥ नीत्व
दर्शं च पापिष्ठं नेत्राहारचकुर्मम सदा ॥ दग्धग्रकृत्तं तूपलि नपि मांस्या भी ताक्रशायत: ॥ निष्कासनीयावकृष्ठ गाज्यमान पदे पदे ॥ ७९ ॥ श्रयं
जल्पमाना सा निष्कासिता बलात् जनै: ॥ पुरान्निर्गमनं मत्वा यामंन भूपासनं तु ॥ तदा स्थित्वं मृदूंजल्पं प्राप्तकमं छिद्रंधां जना: ॥ सं
बाध्यमाना गहनं प्राप्य पयस्कुर्यात्तत: ॥ वनदूरं गतं गत्वा हत्वा मृगं पक्षिण: ॥ वनादनं पवित्रम्य सिंहं बलिं तथा इवनम ॥ ग ८००
त: कालवशात् दृष्ट्वा हर्यक्षा निर्गमबन ॥ विक्रमिना स्वजनेनी मृगयाचरणाशुचा ॥ इष्ट्वा वाल्या: समुत्पन्ना प्रीति: स्म तस्मिन् स्वपुत्रके ॥
ततोऽब्रवीत्सिंहिनामा मृगमान्यार्शिनं नवं ॥ मानवकुलस्त्राशाभि:कृत: मातुरुक्मदा ॥ कथं निहींतमिह वन सिंहानां बसतां नन ॥
८० हि गजितं माकर्ण्य स्थित: प्रत्याह निर्दय: ॥ निहींतास्मिंहविस्म न सिंहकुलवनश्रिया ॥ सिंहात्मजा महावीर स्वजवशीकृपाधि

पः॥ पुष्टांगः सद्यमान्साशी सिंहाधिक महाबली॥ इत्युक्त्वा वनं प्रत्याह मृगराजसुतासुतं॥ त्वं मे पुत्रः समागच्छ किमागतोसि जंगले॥ त्वर
त्वा वाराणाशीं रम्यां सभोग्यां भोग्यभाक् सुत॥ कुशलस्ते पिता यातो मद्भयाद्या पलायितः॥ इत्युक्त्वा निजवृत्तं तत्कथयामास सांप्रतं॥ त
त्प्रवृत्तान्तमाकर्ण्य विस्मयार्जितमानसा॥ कराभ्यां सहसागृह्य मृगमान्समभोजयत्॥ हृष्टस्तां मातरं नत्वा स्वोदन्तं प्राब्रवीत्ततः॥ कथ्यतां भूप
तिं मां तज्जनको मां यथा व्यरत॥ संपालयाम्यहं सर्वाः पितृशिक्षासमन्वितः॥ ताभिः समानितत्रं दन्तसर्वैर्भवत्येव सुखान्वितः॥ नव दोषे राजून्तिर
मान्साशी प्रत्यहं वने॥ मृगयाभिरतो राज भोग्यं समुत्सृजं ततः॥ मान्साविलत्प्रनतरलं प्राभक्षं मानुषं तथा॥ ततोनिष्कासितः सर्वैः स्ववा
माद पिमन्त्रिभिः॥ प्राप्नंत्वद्दर्शनं देवाद्भ्रमता सर्वतोऽधुना॥ जनकत्यज्यमानेन तत्पालयनिजं सुतं॥ प्रत्यब्रवीत्सकृतुका भृगुर्याघ्यात्मजं निःकु
प॥ श्रीतैर्नृपकुमाराणां वलिंदत्वामखं कुरु॥ तुष्टास्तेन तन सकला निर्गच्छन्ते स्वदेहतः॥ त्व इह माश्रिता भूता नदात्व स्वस्थमाप्नुया

म.इ. त ॥ वीरसेनस्ततः प्रीतिदिनं समानीयन्नृपात्मजं ॥ मृगयाभिगतो नित्यं स्यापयामीचरे वने ॥ यत्रास्ते गच्छतात्कापि नृपेभ्यो ग्यपरमुत्सुकः ॥ द्रष्टा
निरामिषाहारं मानयेयुः प्रजास्ततः ॥ दिक्पालरूपं च नृप पदं नात्मज दुष्करं सुत ॥ श्रीधुंधुजं महीपार्थ यावदन्नान्योऽनुपाभवेत् ॥ तस्मात्निर्गि
छ सर्वत्र नान्वेषु कुमारकान् ॥ अस्मिन्नेवागमिष्यन्ति यतो हीनं नृगादिभिः ॥ त्वारश्योनाशिवल्लावान् नृपवीजसमुद्भवान् ॥ मत्गर्भ
माश्रितत्वाच्च नरा महातिविक्रमी ॥ योऽद्य त्वया न शक्यन्ते वलवद्भिर्नृपात्मजैः ॥ यथा मयाम्मदोन्मत्तो हडिकूटसमे गजैः ॥ मान्यास्त्वया ८०२
तय कृशानौ माश्वापि प्रजामुत्पुत्रान् ॥ यावच्छूतपारिमितं नप्राप्तमाभिधानय ॥ जननी गिरमासाद्य तथेति संप्रमोदितः ॥ समनुत्सुके
मनासक्त कृत्वाना मातर ययौ ॥ ततोऽत्यन्तं वनेस्थित्वाजनपदस्य सन्निधौ ॥ कुरंगादिभिः सकीर्णे कुमारान्वेषणोऽभवत् ॥ अथैक
स्मिन्महोदार दैवीय भूमिपात्मजः ॥ विहंगराजनामासौ मृगयाकेलिकौतुकः ॥ हयारूढो बलैः सार्द्धं आचरत्संप्रमोदितः ॥ नृगद

ह्येना पहृत स्त्काकी प्राप नन्दनं ॥ वाजिपृष्ठं समारूढं दृष्ट्वागतं प्रमोदितः ॥ हत्वा मृगौ स तुरस्थः समब्रवीन्नृपात्मजं ॥ हे नाराजकुमार
स्तवं मृगयामिदिने दिने ॥ दैवात्वाज्ञासि मञ्चन्ति काल सूत्राभिकर्षितः ॥ प्रोक्ते तिविह्वलांगं तं पातयित्वाच तं हयात् ॥ कस्मात्सहसा न्ट
ल स्कन्दं आरोप्य प्रासरत् ॥ कंसरकादि समाकीर्णो नहशाखवान मोहते ॥ उर्गमेद्दश जंतूनां गह्वरे स्थो पश्यन्ततः ॥ दृढरज्जुभिरा बध्य तरु
स्कन्धे कृताञ्जलि ॥ गलदश्रुमुखं प्राह युवराज रुषाकुलः ॥ सोदनतोस्मि महीपालः कथायो वीर विक्रमी ॥ त्वा दृश्या ना शान्त यन्त्रं कौरि
धुभूर्तनयानये ॥ यावच्छत्त पारिमितं मांसं भक्षि लगह्वरे ॥ शरीरपोष माधाय निर्वियाद नृपात्मज ॥ श्रुतवानीति तत्वाक्यं विललाप मु
हुर्मुहुः ॥ क्षतां प्रदृश्योनिश्चेता नारकीय इवापरः ॥ विधायक रात्काकारां गह्वरे चान्य दुर्गमे ॥ ततोन्यत्र वने दु ष्ट अन्वेष्टुं प्रासर
द्रुतं ॥ सैन्य घोष समाकर्ण्यापि नरसाभिगतो वली ॥ युवराज समान्तीका मुदितः समुपासरत् ॥ तमायातं जना दृष्ट्वा भीताः केचिन्

३८. पनास्यग् ॥ नृपात्मजोपि वेगेन विमुक्तो भूयसावनत् ॥ समागत्य प्रवाविताश्व वस्मन्समगुरुधान् ॥ स्कन्धवारागयते नीतं तनेव कानिनायसः ॥ मज्जयित्वा नृ
गं नाम तत्स्थाने खावयन्स्वकं ॥ सुखायन्तत्ततोयोऽसौ मानसासतं कुक्षितः कि थो ॥ अथैतापहृतेनकोऽपि शुभधामाधायकाष्ठं ॥ ... मानोदयादौ
त्सहवंचनयावालं ॥ एकान्तमात सरव्यान्तान्नृपात्मजान्निवीक्य च ॥ मुदितश्च कमाहत्तु नतौ नयत्र वने वरं तं ॥ सिंहनादसमग्रं च माञ्चमोदीमो ह नृपाग
नं ॥ इत्युद्दतं प्रख्यातं राजजनपदस्य सन्निधौ ॥ तस्मिन्नवसरे राजा कोरवाभुवनाधिपः ॥ सुतसानामिधः श्रीमान्सर्वनृसमगुणाश्रयः ॥ शीलश्रुत ८९२
त्यागसत्यागदयादमानामेकः क्षमाधीः इति सक्रतीना ॥ अनुन्नति ह्री धृति कान्तिकीर्ति दाक्षिण्यनवाव लभ्र क्रतानां ॥ तस्यान्तेवासंसगुणोदयानां मल
कतानामिव यौवनेन ॥ विशुद्धसौदार्यमतां हवाणां चन्द्रः कलानामिव संश्रयो भूत् ॥ अतश्च वेदित राजा लोकपालनतत्परः ॥ प्रौढ राजा विमृश्य
श्री सत्कृत्या समयाजयत् ॥ विघ्नतानाउरती तस्य प्रियाभिश्च मार्गितानि ॥ आनन्दं पूजातिशायेरतस्तं सुमापितैरेव नृपागमं

यः॥ कदाचित्स महासत्त्वो मधुमासे मनोरमे॥ पुरोन्तिकवनोद्यानं क्रीडितुं सज्जनो ऽव्रजत्॥ स तत्र पुंस्कोकिलनादिते वने मनोहरोद्यानविमानभूषिते। वि-
चारपुष्पान्वितचित्रपादपे प्रियासहायः सुकृतीननन्द॥ गीतस्वने मधुरतूर्यरवान्विते नृत्ये च हावचतुरैर्ललिताङ्गहारैः॥ स्त्रीगणमध्यपरिवृत्या-
च विलासलक्ष्म्या रेमे स तत्र वनचारुतया तथा च॥ तत्रस्थं तं महासत्त्वं विज्ञायान्यतमो द्विजः॥ सुभाषितसमाख्यायी मुदितः समुपासरत्॥ कृ-
तोपकारसत्कारं कृत्वा मुदिताशयः॥ संपश्यन्स महासत्त्वं तत्राभ्यु समुपाविशत्॥ तं द्विजं समुपासीनं समीक्ष्य स महामतिः॥ कोऽयमात्मा हमे वि-
ज्ञात्वा पप्रच्छैवं समादरात्॥ किमर्थं त्वमिहायासि भिक्षो तन्मे पुरो वद॥ यदभिवाञ्छितं द्रव्यं तत्ते दास्याम्यहं ध्रुवं॥ इति तत्समुपादिष्टं भु-
त्वा स भिक्षुरुत्सुकः॥ संपश्यंस्तं महासत्त्वं पुरस्थस्एवमब्रवीत्॥ साधुभूराज महासत्त्व यदर्थेहमिहाव्रजेत॥ तदेव तां पुरो वक्ष्ये जयश्रीदसु-
भाषितं॥ इति तद्भिक्षुणा प्रोक्तं निशम्य स महामतिः॥ पुनर्भिक्षुं महाप्राज्ञं समपश्यन्नेवमब्रवीत्॥ सद्गुरो श्रोतुमिच्छामि तदद स्वसुभा-

THE INSTITUTE FOR ADVANCED STUDIES OF WORLD RELIGIONS

FILM—STRIP NO.
MBB—1971— 8-3,4,5,6,7,8,9

BUDDHIST SANSKRIT MANUSCRIPTS

षितं॥ इति तदुक्तमाकर्ण्य स भिक्षुर्वक्तुमारभत्॥ तदा तत्र महोत्पात कोलाहलभयस्वनं॥ संगीतादिमहोत्साह हर्तृप्रोदचरद्वने॥ तच्छ्रुत्वा
स महासत्वः सुतसोमोभिशंकितः॥ किमेतत्ज्ञायतां शब्दमिति जनान्समादिशत्॥ तच्छ्रुत्वा सहसा तस्य दौवारिका विनोदिताः॥ प्रचरंतो
वने दूरात्सौदासं ददृशुर्नृपं॥ समीक्ष्य तमुपायातं सर्वे दौवारिकास्ततः॥ सहसा समुपागत्य स्वामिनोग्रे वभाषिरे॥ स्वामिन्नसावितायातः
सौदासो नरमांसभुक्॥ नूनमत्रापि प्रागत्य यस्मिन्नः समाव्रजेत्॥ तैरेवं गदितं श्रुत्वा स तं सुतसोमो महीपतिः॥ संजातरुषितान्सर्वान्सं
पश्यन्नेवमब्रवीत्॥ कः सौदासो नृपोन्मादः क्रूरात्मा निर्दयो वली॥ किमर्थमिह प्रागच्छत्तच्छद्ध्वं पुरो मम॥ इति तत्कथितं श्रुत्वा सर्वे ४०३
दौवारिकाश्च ते॥ भर्तुस्तस्य पुरः स्थित्वा पश्यन्तस्त्वेवमब्रुवन्॥ कथं न ज्ञायते स्वामिन्सौदास इति विश्रुतं॥ श्रूयतां सन्मते स्वामिन् वक्ष्यते
भवतां पुरः॥ तद्यथा नृपतीराजा मृगयानिर्गतो वने॥ तत्र सोपहृतोश्वेन प्रविष्टो गहने वने॥ तं दृष्ट्वा कामसंरक्ता सिंही तत्समुपाचरत्॥

तांसमीक्ष्यसराजापि कामरागाग्नितापितः॥ दैवात्सिंह्यातयासार्द्धं रतिभोग्यंसमाययौ॥ ततआपन्नसत्वासा सिंहीबभूवगर्भिणी॥ ततः
सासमयेसूत कुमारं तन्नृपांशिकं॥ नृपांशिकंकुमारं तं वीक्ष्यवनचरामुदा॥ समादायसुदासाय क्षितिपायसमर्प्पयत्॥ सुदासोजनकी
बालं तंसमीक्ष्यनृपांशिकं॥ अपुत्रोहमितिप्रीतो गृहीत्वासमपालयत्॥ ततस्संपाल्यमानोसौक्रमेणापि विवर्द्धितः॥ सुपुत्रांगःकुमारत्वसंप्रा
प्तश्चाचरन्मुदा॥ ततःसगुरुभिःसद्भिः शिक्ष्यमाणोयथाक्रमं॥ सर्वविद्यासुसंप्राप्तः श्रीमान् विचक्षणोभवत्॥ यदाराजासुदासोऽसौ वृ
द्धोमृतोदिवंगतः॥ तदातद्राज्यमासाद्य सौदासः सनृपोऽभवत्॥ ततःसनृपतिःक्रूरो मांसदोषानुरंजितः॥ आमिषेष्वतिसंरक्तो रक्षोधि
पश्वाचरत्॥ इदमिदंरसश्रेष्ठं मांसमितिसमानुषं॥ आस्वाद्यपौरिकान्हत्वा हत्वाभक्षितुमैच्छत॥ एवंतंपौरिकाहन्तुमभीक्ष्णंतंसमी
क्ष्यते॥ सर्वेपिपौरिकास्तस्य वधोद्योगंप्रचक्रिरे॥ तद्विज्ञायससौदासस्ततःसंत्रासिताशयः॥ राज्यंहित्वावनेगत्वा दुर्गमेजंगलेवसत्॥ तत्रभीतः

ऽनेकान्तत्वात्तत्वापि योगपं र

भ.ऽः सम्भूतेभ्यो नृमांस रुधिरैर्वलिं ॥ दातुमिच्छन्ति भूत्य मनसैवं व्यचिन्तयत् ॥ यदाहं संकटादस्मात्परिमुक्तः सदा खलु ॥ भूतयज्ञं करिष्यामि ग्रामे राज
कुमारकैः ॥ तद्राजकुमारान्स जित्वाऽनेकैर्बलैरपि ॥ अपहृत्याभिबंधित्वा बन्धने स्थापये वने ॥ भवन्तमपि भूमीन्द्र उपहर्तुमिहागतः ॥ तज्ज्ञे
तुं यदि शक्तोसि प्रोत्सहस्व समाहितः ॥ तत्समीक्ष्य स्वमात्मानं रक्षितुं यदि वांछसि ॥ अत्रस्थानं पुरे गन्तुं भवानेव प्रमाणिकः ॥ तच्छ्रुत्वा समहा
सत्वो विदितशीलविभ्रमः ॥ कारुण्यपात्रस्य दोश्चिकं चिकित्सितुं समैच्छतः ॥ ततस्तस्य मनःशान्तिं कर्तुं सामर्थ्यमात्मनः ॥ प्रीतः स तदुपा ४०४
यात संपश्यन्नेवमब्रवीत् ॥ राज्याच्युतेस्मिन्नरमांसलोभाः दुष्टा देवक्रव्य इव स्वतंत्रे । त्यक्तस्वधर्मे हतपराप की जैः शोच्यादशामित्यनुवर्तमानं
॥ कोविक्रमस्यात्र मया वकाशः एवं गताशुभयसंभ्रमस्य । अपलसंरम्भपराक्रमेण पाप्मानमस्य प्रसभं निहन्यां ॥ गत्वापि योनाम मया न कं
पो - मन्त्र गोचरे सत्वयम भूपतेः ॥ यत्कर्मया तिथ्यमतोस्य कर्तुमेवं हि सन्तो निधिप्रवृत्ता ॥ तद्यथाधिकारं सर्वे भवंत्वत्र समाहिताः ॥ अहं तं सं

मतिं कर्त्तुमुपयास्यामि संमुखं ॥ इति स ताञ्जनान्सर्वान्नृपुरावचारिकान् ॥ अनुशिष्य प्रशान्तात्मा स्नातुं समुपाचरत् ॥ तत्र स रमणीकान्ता स्नान
याकुलितेन्द्रियाः ॥ समुपेत्य समाश्वास्य सर्वास्तानोन्यवर्त्तयत् ॥ ततः समीक्ष्य संप्राप्तो यत्र कोलाहलरवं ॥ तत्र समीक्ष्य सौवीर्य्यं स सौदासमुपाहरत्
॥ दृष्ट्वा स तं विरूक्षाङ्गं मलिनवसनावृतं ॥ श्मश्रुधूमान्धकारास्यं रेणुव्याकुलमूर्द्धजं ॥ रोषव्यावृत्तरौद्राक्षं सैन्यसंघमुपद्रुतं ॥ विगतसाध्वसः
पश्यन्समाजुहाव संमुखं ॥ अरेरे सुत सोमोऽहं त्वां वीक्ष्य समुपासरे ॥ त्वमपि मां समालोक्य प्रागच्छात्र नृपान्तक ॥ किमेवं हृपरात्म श्रीकान्त
र्तुं प्रचरसे वने ॥ यदि ते विद्यते वीर्य्यमिहागच्छ पुरो मम ॥ एवं तत्समुपाह्वानशब्दं श्रुत्वातिदर्पितः ॥ स तं पश्यन्महासत्त्वं संमुखं समुपासरत्
॥ स तमेकाकिनं वीक्ष्य निःशङ्कं सौम्यदर्शनं ॥ बोधिसत्त्वं महासत्त्वं समुपेत्यैवमब्रवीत् ॥ अहं त्वां मृगयाम्यत्र दैवात्पश्यामि सांप्रतं ॥ तदा
गच्छ मया सार्द्धं संचर त्वममाश्रये ॥ इति प्रोक्तः स सौदासो निर्विशङ्कः समीक्ष्य तं ॥ सुप्रसन्नमुखाम्भोजं समादातुमुपारभत् ॥ तमेवं स

भ८:

मुपायातं रक्षोतिविकृताननं॥ पश्यन्नपिसुधीरोसौ संतस्थे निश्चलेन्द्रियः॥ तमेवं संस्थितं प्रेक्ष्य ससाहंकारनन्दितः॥ कराभ्यां सहसागृह्य स्कन्धे
आरोप्य प्रासरत्॥ बोधिसत्त्वोपितं मत्वा प्रामर्षोद्भ्रान्तमानसं॥ अस्यानुशिष्टिकालोयं नेतुमुपेक्षां चकार सः॥ सौदासः प्रेप्सितं लब्ध्वा सम्भिन्न
न्दितोऽद्भुतं॥ प्रचरन्दुर्गमेरण्ये प्रविवेश निजाश्रमे॥ तत्र हतनृमांसास्रग्भूषितरौद्रभूतले॥ अशिवैर्जम्बुकोन्नादैः श्मशान इव भीषणे॥ प्रे
तनर्त्तनबीभत्से कीर्णगृध्रादिपक्षिभिः॥ चिताधूमविवर्णैश्च शीर्णपर्णैर्महीरुहैः॥ अवतार्य स तं वीक्ष्य तद्रूपाभिनिविष्टदृक्॥ नृशंसत्वेस ४०५
माश्रित्य विश्रामान्तिविस्मितः॥ तत्रानुस्मृत्य तं भिक्षुं सुभाषितमुपायनं॥ श्रुत्वागमनमल्पस्यार्थं धीमान्स इत्यचिन्तयत्॥ हा हा सुभाषितोपायं श्रु
त्वाऽव्याशयागतः॥ सम्भामेवं हृतं श्रुत्वा भिक्षुः किं किं करिष्यति॥ आशाविघातात्प्रपरीतचेता सत्वमप्यतो प्रेणापरिश्रमेण। विनिःश्वसि
ष्यत्यनुशोच्य वा मां स्वभाग्यनिन्दां प्रति पत्स्यते वा॥ इति चिन्तयतस्तस्य न दुःखन्न च चेतसः॥ कारुण्याच्चक्षुषाश्रूणि प्रावर्त्तन्त निरन्तरं॥ तं सा

32

श्रुनयनं वीक्ष्य संसीदासौ दुराशयः॥ बोधिसत्वं समालोक्य प्रहसन्नेवमब्रवीत॥ अरे धीरोसि विख्यात स्नैस्नैस्त्वं शोभितो गुणैः॥ अद्यात्वम
दशांप्राप्य त्वमप्यश्रूणि मुञ्चसि॥ आपत्सु निष्फलं धैर्यं शोके श्रुतं निरर्थकं॥ नहितक्षियते दुःखं राहतोयोनकम्पते॥ यच्छ्रीरेपि महावीर का
तरोसीव सांप्रतं॥ तत्तावन्मे पुरः सत्यं समभिवक्तुमर्हसि॥ प्राणान्प्रियानथ धनं सुखसाधनं वा· वंधून्नराधिपतिनाम थवानुशोचन्। पुत्रीप्रि
यंचाश्रुमुखीं सुतां वा· स्मृत्वैव साश्रुनयनत्वमुपागतोसि॥ ॥ नत्वञ्च त्वा समहासत्वः सुतसोमः सुवीर्य्यवान्॥ निःकम्पं तं महादुःखं सं
पश्यन्नेवमब्रवीत्॥ नप्राणान्पितरौ नचापि तनया न्बन्धून्नदारांश्च। नैवैश्वर्यसुखानि संस्मृतवतो वाष्पोद्गतोयं मम॥ आशाबोन्मुख
भाषितैरभिगतः श्रुत्वाहतंमां द्विजः। नैराश्येन सदह्यते ध्रुवमिति स्मृत्वास्मि साश्रेक्षणः॥ तस्माद्विसर्जयितुमर्हसि तस्य यावद्· आशाविघा
तमथितं हृदयं द्विजस्य। सम्मानना मुपरिषिक नवं करोमि· तस्मान्सुभाषितमधुनि च संविभजस्व॥ प्राप्येवमान्नुपमहं द्विजस्य गत्वा

भड. स्मिभूयोनृशंसतांनवापि । इत्यागमास्वीनकृतेक्षणाभ्यां · निरीक्ष्यमाणोभवदीक्षणाभ्यां ॥ माचापयातव्यनयोयमस्मे · त्येवंविधंकाङ्कलमानसोऽ
भूः । अन्योहिमार्गोनृपमण्डितानां · मन्यादृशस्त्वन्यजनाभिपन्नः ॥ इतितज्जदितंश्रुत्वा ससौदासोनबोधितः ॥ सुतसोमंतमालोक्य प्रहसं
श्चैवमब्रवीत् ॥ ॥ इदंत्वयात्याहृतमुच्यमानं · श्रद्धीयतांनैवकथंचिदेतत् । कोनाममृत्योर्वदनाद्विमुक्तः स्वस्थःस्थितस्तत्पुनरभ्युपे
यात् ॥ इतितज्जल्पितंश्रुत्वा बोधिसत्वः ससन्मतिः ॥ सौदासंतंसमालोक्य संस्मितस्एवमादिशत् ॥ कथमेवंमहाराज ममागमनकार ४०६
णं ॥ इदंभवान्महीन्द्रोपि नैवसमवबुध्यत ॥ ननुकथंप्रतिज्ञाय नागमिष्याम्यहंध्रुवं ॥ तस्मात्वशंकनीयोपि सुतसोमोस्मिखल्वहं ॥ लो
भेनमृत्योश्चभयेनसत्यं · सत्यंयदेकेतृणवत्त्यजन्ति । सतांतुसत्यंतुसुजीवितंच · कृच्छ्रेप्यतस्तन्नपरित्यजन्ति ॥ नजीवितंयत्सुखमैहि
कंवा · सत्याच्युतंरक्षतिदुर्गतिभ्यः ॥ सत्यंविजह्यादितिकस्तदर्थं · यच्चाकरःस्तुतियशःसुखानां ॥ संदृश्यमानव्यभिचारमार्गे · त्व

इष्टकल्याणपराक्रमेवा । श्रुत्रेयतां नैतिश्रुभंतथाच॰ किंवीक्ष्यशंकातवमय्यप्रीति ॥ त्वत्तोभयंयदिविनाममभाविष्य त्संगः सुखेषु करुणा
विकलंमनोवा ॥ विख्यातरौद्रचरितं ननुवीरमानी॰ त्वामुक्तप्रहरणावरणोपपेयं ॥ त्वत्संस्तवः स्वयमभीप्सितएवमस्मा॰ त्तस्यद्विजस्य
सफलश्रमतांविधाय । एष्याम्यहंपुनरपिस्वयमन्तिकंते॰ नास्मद्विधाहिवितथांगिरमुद्गिरंति ॥ एवंतेनसुधीरेण प्रभाषितंनिशम्यसः ॥
सौदासोमृष्यमानस्तुध्यात्वैवंसमचिंतयत् ॥ सुखस्वयमत्रापि सत्यवादितयात्मनः ॥ सद्धार्मिकतयाचैवं विकत्थतपुरोमम ॥ तावद्
स्यात्रपक्षेयं सत्यधर्मानुरागतां ॥ किमेकेनममानेन निष्टेनसाधुनापिहि ॥ अस्तिस्वभुजवीर्यस्य प्रभावान्मेवशीकृतं ॥ शतंतत्पकु
माराणामेतैर्यज्ञं करिष्यते ॥ इतिनिश्चित्यसौदासः सत्यधर्मानुरागतां ॥ द्रष्टुंतस्यसमामंत्र्य सम्यक्पत्रेवमब्रवीत् ॥ ॥तत्रगच्छ
तवपक्षेयं सत्यधर्मानुरागतां ॥ तस्यसुभाषितंश्रुत्वा समेत्यमेपुरोवद ॥ गत्वाकृत्वाचतस्यत्वं द्विजस्ययदभीप्सितं ॥ शीघ्रमायाहि

भद्र.

यास्ये चितां सज्जीकरोम्यहं ॥ एवं तत्‌ भाषितं श्रुत्वा प्रतिश्रुत्य तथेति सः ॥ बोधिसत्वः प्रशान्तात्मा सहसा स्वपुरे चरत्‌ ॥ बोधिसत्वं तमायान्तं
तत्समीक्ष्य सहायकाः ॥ ज्ञातयो मंत्रिणो मात्याः सर्वे पौराश्च सेवकाः ॥ प्रणत्वा तं महासत्वं पुरोधायाभिनन्दिताः ॥ राजकुले महोत्साहैः प्रा
वेशयन्‌ जिनालये ॥ तत्र प्रविष्ट आलोक्य पित्रोः स समुपव्रजेत्‌ ॥ पादान्नत्वा प्रसन्नास्यः संपश्यन्समुपाश्रयत्‌ ॥ तत्र तं समुपाविष्टं समीक्ष्य
स कलामुदा ॥ रम्भामत्सपदाम्भोजे प्रणत्वा समुपाश्रयत्‌ ॥ तदा स जनकः पश्यन्महाबलं तमात्मजं ॥ तन्निवृत्त प्रष्टजागं पप्रछ विस्मयान्वि
तः ॥ साधु पुत्र समागत्वा हि यत्त्वं हतोपि शत्रुना ॥ जित्वा तं तद्विमुक्तो वा समागछसि तत्कथं ॥ इति पित्राभिसंपृष्टे बोधिसत्वः स सन्मतिः ॥ ४०७
संपश्यञ्जनकं सर्वा ध्रोकांश्चैवमभाषत ॥ तात हं तं महादुष्टं सत्यं कृत्वाभिबोधयन्‌ ॥ भिक्षुं स भाषितं श्रोतुं तत्प्रमुक्त इहाव्रजे ॥ सर्वमेतत्प्र
वृत्तान्तं विस्तरेणानिवेदयत्‌ सः ॥ महाभाजनकं सर्वा ध्रोकांश्च प्रात्यनन्दयन्‌ ॥ ततस्स बोधिसत्वस्तं भिक्षुमाहूय सादरं ॥ सुदत्त भाषितं श्री

तुं संपश्यन्नेवमब्रवीत् ॥ सद्गुरोत्र यदर्थे त्वं समायासि पुरो मम ॥ मद्धितार्थं समाख्याहि सद्धर्मगुणसाधनं ॥ एवं तत्प्रार्थितं श्रुत्वा स भिक्षुः
प्राभिनन्दितः ॥ सुभाषितचतुर्गाथाः पश्यन्तं प्राह सन्मतिं ॥ शृणु साधो महाभाग गाथा इमाश्चतुष्टयी ॥ प्रवदामि भवाञ्छ्रुत्वा संबोधितोभिन
न्दतु ॥ य इच्छयाप्युपनीतं सत्कृत्सज्जन संगतं ॥ भवत्यचलमत्यन्तं नाभ्यासक्रममीक्ष्यते ॥ न सज्जना दूरचरः क्वचिद्भवे-द्भजेच्च साधून्विनय
क्रमानुगः । स्वप्रयत्नेन हि तत्समीपगं विसर्प्पिणा सद्गुणपुष्परेणवः ॥ यथा नराणां मणिहेमभूषणा. जनि देहाश्च जरा विरूपतां ।
सतां तु धर्मं न जरामिवर्त्तते. स्थिरोत्तमा हि गुणोपसाधवः ॥ नभश्च दूरे वसुधातलाच्च पारादपारं च महार्णवस्य । अस्ताच्चलेन्द्रादुदयस्त
तोपि धर्मः सतां दूरतरे सतां तु ॥ ॥ एताः सदा समुच्चार्य सर्वलोकान्प्रबोधयन् ॥ धर्मश्रीसाधनं कृत्वा संचरस्व सुखं भवे ॥ एतत्सु
भाषितं श्रुत्वा महासत्वः सबोधितः ॥ गाथासाहस्रिकीः कृत्वा संराधयन्प्रसादितः ॥ सद्गुरुं तं महाविज्ञं प्रियवाक्यपरस्सरैः ॥ सत्कृ

४६. त्वं वांछितार्थेन संपूज्य समतोषयत् ॥ ततस्समीक्ष्य पिता तस्य पुत्रस्यातिप्रदानतां ॥ निवारणार्थमामंत्र्य तं पुत्रमेवमब्रवीत् ॥ तात महाज
नो नित्यं भर्जव्यस्ते महीपतेः ॥ तत्सुभाषितपूजार्थं साधुमात्रं प्रदीयतां ॥ राजश्रीर्हि महाकोशसम्पदपेक्षिणी सदा ॥ तत्सुभाषितपूजा
र्थं दक्षिणामात्रमर्पयेत् ॥ अतिप्रदातुर्हि कियच्चिरं भवेद्धनेश्वरस्यापि धनेश्वरच्युते । अतः सदा श्रीस्थिरतां यदीच्छसि · भोग्यार्थ
मात्रेण प्रमाणय त्वं ॥ एतत्समुक्तं जनकेन श्रुत्वा · धीमान्स सत्वमेघगुणाभिलाषी । नराधिपस्तं जनकं सुदृष्ट्वा · पश्यन्मुदैवं पुनरप्यभा ४०८
षत् ॥ अर्धप्रमाणं यदि नाम कर्त्तुं · शक्यं भवेद्देव सुभाषितानां । स्वकं न तेवा कथं व्रजेयं · तन्निःक्रयं राज्यमपि प्रयछन् ॥ श्रुत्वैव यत्रा
स्म मनःप्रसादं श्रेयोनुरागः स्थिरतां च याति ॥ प्रज्ञाभिवृध्याविततमस्कतां च · कथं न तुष्यादपि तत्स्वमान्सैः ॥ दीपः श्रुतं मोहतमःप्रमा
थी चौराद्यहार्यं परमं धनं च ॥ संमोहशत्रुव्यथनाय शस्त्रं · नयोपदेष्टा परमश्च मंत्री ॥ आपद्गतस्याप्यविकारिमित्रं · मपीडनी श्रो

करुजश्चिकित्सा ॥ बलं महद्दोषबलावमर्द्दि परं निधानं यशसः श्रियश्च ॥ ॥ विनीतदीप्तप्रतिभोज्वलस्य प्रसह्यकीर्त्तिप्रति
बोधनस्य ॥ वाक्कोशवस्यापि विशेषहेतु योगात्प्रसन्नार्थगतिः श्रुतश्रीः ॥ श्रुत्वा च वैरोधिकदोषमुक्तं त्रिवर्गमार्गं समुपाश्रयन्ते ॥
श्रुतानुसारप्रतिपत्तिसारा स्तरन्त्यकृच्छ्रेण च जन्मदुर्गं ॥ गुणैरनेकैरिति विश्रुतानि प्राज्ञाम्यहं प्राभृतवद्धनानि ॥ शक्तः कथं ना
मनपूजयेयं मात्तां कथं वा तव लङ्घयेम ॥ यास्यामि सौदाससमीपमस्मा दर्थंनिमे राज्यपरिश्रमेण ॥ निवृत्तसंकेतरणोपमर्द्दं ल
ब्धश्रयो देवपथानुदृत्य ॥ एवं तद्भाषितं श्रुत्वा पिता स्नेहाकुलाशयः ॥ तमात्मजं महासत्त्वं संपश्यन्नेवमब्रवीत् ॥ मयैवमुच्यते ता
त हितार्थापेक्षिणा तव ॥ तदलमत्र ते मन्युवशगं मा कृथा मनः ॥ तदत्र सुखसंपन्नः संचर स्वशुभार्थभृत् ॥ द्विषन्तस्तव सौदास वधं
यान्तु दुराशयाः ॥ अथ त्वया प्रतिज्ञातं तत्समीपगमनं प्रति ॥ अतः सत्यानुरक्षी त्वं पादयितुमिच्छसि ॥ अनृतमपि वक्तव्यं स्व

भ६ प्राणापरिरक्षणे ॥ गुरूणामपरिरक्षार्थमितिवेदेनिगद्यते ॥ कोऽर्थः संस्यक्ष्यते मे तत्परिहारश्रमेण तु ॥ अर्थकामविरोधं यदनर्थं धर्मसंश्रयं ॥ व्य
सनमपिसर्वेषां महीपानां प्रचक्षते ॥ तदनेनतवस्वार्थनिरपेक्षेणकर्मणा ॥ निर्बंधेनालमस्माकं मनोभितापिनासदा ॥ यत्प्रतिज्ञाविसंवाद
नंतत्यधर्मविरोधनं ॥ अनुचितं विधातुं न त्वमिति स्तेन व्यवस्यति ॥ इदं विमोक्षणार्थं न त्वमहत्सैन्यगणान्वितः ॥ गत्वाभिवोधयन्यत्नैर्जित्वा तं स्व व
शीकुरु ॥ यदिते वचनं श्रुत्वा वशेस्थातुं नवाञ्छति ॥ ततोनिर्जित्यतं दुष्टं प्रापयस्व यमालयं ॥ एवं कृत्वा प्रसिद्धास्यात्प्रतिज्ञा सर्वथा तव ॥ ४०९
आत्मरक्षापि ते नूनं भवेद्यशोमहत्तरं ॥ इति मे वचनं श्रुत्वा तथा त्वं गन्तुमर्हसि ॥ इति पित्रा समादिष्टं निशम्य स महामतिः ॥ जनकं तं महीपा
लं संपश्यन्नेवमादिशात् ॥ नाहं देव प्रतिज्ञातमन्यथा कर्तुमुत्सहे ॥ तत्सत्यपरिरक्षार्थमहमेव व्रजेय हि ॥ ग्रोक्लेषु दुःखतप्तेषु नरकाभि
मुखेषु च ॥ त्यक्तेषु स्वजनैश्चापि प्रहरेयं कथं नृप ॥ दुष्करं पुरुषो दोसाव्दारं चाकरो न्मयि ॥ मद्वचः प्रत्यया श्रीमां व्यसृज क्षमामागतं ॥

लब्धं तत्कारणाच्चेदं तात मया सुभाषितं ॥ उपकारी विशेषेण सोनुकंपी मयायतः ॥ मात्र देवाभिकर्त्तव्या सदत्पये विषादता ॥ काशक्तिर्विद्यते तस्य
मांहर्त्तुं समुपागतं ॥ एवं बहुप्रकारैस्तं जनकमनुनीय सः ॥ महासत्वो जनं सर्वं विनिवर्त्य सहागतं ॥ एकाकी विगतातंको निःशस्त्रावरणो मुदा ॥ स
त्यधर्मानुरक्तः स सौदासं समुपासरत् ॥ सौदासस्तं समालोक्य दूरादेव समागतं ॥ विस्मयाभिसमाक्रान्तचित्त एवं व्यचिन्तयत् ॥ अहो हीदं महच्चित्रं अद्भुतानां
महाद्भुतं ॥ सत्योदार्यं नृपस्येदं मतिमानुषदैवतं ॥ मृत्युरौद्रस्वभावं मां विनीतभयसंभ्रमः ॥ इति स्वयमुपगतोयं ही धैर्यं साधु सन्यता ॥ स्थाने खल्वस्य
विख्यातं सत्यवादितयायतः ॥ इति प्राणान्स्वराज्यं च सत्यार्थं यो यमत्यजत् ॥ एवं तं विस्मयापन्नं चिन्तं तं वीक्ष्य सन्मतिः ॥ बोधिसत्वः प्रसन्नास्यः सं पश्य
न्नेवमब्रवीत् ॥ सुभाषितधनं प्राप्तं मयार्थी चापि पूजितः ॥ गतं शीतिमनश्चापि भवत्कृपाप्रसादतः ॥ प्राप्नोयदस्मयं चात्र तन्मांभुक्ष्व यथेप्सितं ॥
मम पश्च व्रतं चापि यथायवास मादिश ॥ इति तद्भाषितं श्रुत्वा स सौदासोति विस्मितः ॥ सत्यधर्मा जिसं रुष्ट तं पश्यन्नेवमब्रवीत् ॥ नात्येति कालो

भ.ड. ममखादितुंत्वां. धूमाकुलानावदिर्यचिताषि । विधूमपक्कंनरलंरहथ्यं. श्रमस्तदेतानि सुभाषितानि ॥ तदुक्तमितिसश्रुत्वा बोधिसत्वः समीक्ष्यतं
॥ सौदासंनरमान्सादं प्रहसन्नेवमब्रवीत् ॥ इत्थंगतस्यनेकोऽर्थः श्रुत्वासुभाषितान्यपि ॥ एक्तमान्साभिरक्तानामश्रुतैर्नाभितोषणं ॥ इमामव
स्थामुदरस्यहेतोः प्राप्तोसिसत्यक्तघृणः प्रजासु । इमाश्चधर्मंप्रवदन्तिगाथाः समेत्यधर्मेणायतोनधर्मः ॥ रक्षोतिक्रूरदृतस्य संत्यक्तार्यपथस्यते ॥
नास्तिसत्यंकुतोधर्मः किंश्रुतेनकरिष्यसि ॥ इतितद्भाषितंश्रुत्वा सौदासः सोभिरोषितः ॥ तद्वचोमृष्यमाणास्तं बोधिसत्वंतथाब्रवीत् ॥ कोसोनृ ४१०
पः कथययोनसमुपस्थितास्त्वं क्रीडावनेवनमृगोदयितान्निहन्ति । नहन्तिहन्मिमनुजानपिदृष्टिहेतो. राधर्मिकः किलनतोस्मिननेमृगघ्नाः ॥ स
तज्जगदितंश्रुत्वा बोधिसत्वः ससस्मितः ॥ सौदासंतंनृमान्सादं संपश्यंश्चैवमादिशत् ॥ धर्मस्थितानखलुतेपिनमन्तियेषां भीतद्रुतेष्वपिमृगेषु
शरासनानि । तेभ्योपिनिन्द्यतरएवनराशनस्तु. जात्याछिन्नाहिपुरुषानचभक्षणीयाः ॥ एवंतत्कर्कशंवाक्यं श्रुत्वाक्रूराशयोपिसः ॥ मैत्री

भावप्रसन्नात्मा प्रहसन्नेवमब्रवीत् ॥ सुतोमयानामसमेत्यगेहं. स मन्ततोराज्यविभूतिरम्यं । यन्मत्समीपं पुनरागतस्त्वं .ननीतिमार्गेकुशलोसितस्मा
त् ॥ एतत्तत्कथितं श्रुत्वा वोधिसत्वोमहामतिः॥ सौदासंतंमहादुष्टं सम्पश्यन्नेव मादिशत् ॥ नैतदस्मदहमेवात्रकुशलोनीतिवर्त्मनि॥ यदेनंसुप्रस
न्नात्मा प्रतिपन्नमिहाव्रजे ॥यन्नामप्रतिपन्नस्य धर्मादिकान्निकीर्त्तितः॥ नतुप्रसिद्धिःसौख्यस्य तत्र किंनाम कौशलं॥ येनीतिमार्गप्रतिपन्नधीराःप्रा
येणातेप्रेत्यपतन्त्यपायान् ।अपास्यजिह्मानितिनीतिमार्गान्सत्यानुरक्षीपुनरागतोस्मि ॥अतश्चनीतौकुशलोहमेव. त्यक्त्वानृतंयोभिरतोस्मिस
त्ये ।नैतत्तुनीतंहिवदन्तितज्ज्ञायत्रानुवध्नन्तियशःसुखार्थं ॥ इतितद्भाषितं श्रुत्वा सौदासः सोप्रसादितः ॥ वोधिसत्वं पुनः पश्यन्व्यहसन्नेवम
ब्रवीत् ॥प्राणान्प्रियास्वजनमप्यसुखंचहित्वा. राज्याश्रयाणिच सुखानि मनोहराणि । काममर्थसिद्धिमनुपश्यसि सत्यवाक्ये. तदक्षरार्थमपि
मायदुपागतोसि॥ एतत्तत् गदितं श्रुत्वा वोधिसत्वाभिनन्दितः॥ सुप्रसन्नमुखाम्भोजः पुनरेवमभाषत ॥ वहवः सद्गुणाः सन्तिसत्यधर्मा

३ अन्येनरामहशगाभवन्ति॰ दैन्यापरात्राशविक्लवस्यैयो ।संत्यज्यसेर्त्वं न धैर्यलक्ष्म्या॰ मन्येन नते मृत्युभयंनरेन्द्र ॥ इतितस्य वचः श्रुत्वा बोधिसत्वोभिनन्दितः ॥ तमभिबोधितंमत्वासंप्रश्रयस्त्रेवमब्रवीत् ॥ ३

भद्र. श्रया अपि ॥ तत्संक्षेपाद्वक्ष्यते ग्रेत्वयासंश्रूयतांमुदा ॥ माल्पश्रियं ह्यनतयातिशेते॰ सर्वान्रसान्स्वादुतयाचसत्यं । श्रमादतेपुरायगुणाप्रसिद्ध्या॰ तपांसि तीर्थाभिगमश्रमांश्च ॥ कीर्तेर्जगद्व्याप्तिकृताक्षराया॰ मार्गस्त्रिलोकाक्रमणायसत्यं । द्वारंप्रवेशायसुरालयस्य॰संसारदुर्गोत्तरणायसेतुः ॥ एवंतद्भाषितंश्रुत्वा सौदासः सोभिबोधितः ॥ साधुयुक्तमितिप्रोच्य प्रशंसंश्चैवमब्रवीत् ॥ महतापिप्रयत्नेन यच्छक्यंना निवर्तितुं ॥ प्रतीकारासमर्थेन भयक्लैव्येन तत्र किं ॥ पापप्रसंगाद्धत तप्यमानाः शुभेष्व कर्मस्वकृतश्रमाश्च ॥ आशंकमानाः परलोकदुःखं मर्त्यव्यसन्त्राशजडाभवन्ति ॥ तदेवकर्तुं नतु संस्मरामि॰ भवेद्यतोमेमनसानुतापं ॥ सात्मीकृतं कर्मच शुक्लमस्मा॰ धर्मे स्थितः कोमरणाद्बिभीयात् ॥ नचस्मराम्यर्थिजिनोपयानं॰ यत्र प्रहर्षोयममार्थिनांवा ॥ इति प्रदानैः समवाप्ततुष्टि॰ धर्मेस्थितःकोमरणाद्बिभीयात् ॥ चिरंविचिन्त्यापिनचैवपापे॰ मनःपदन्यासमनुस्मरामि ॥ विशोधितस्वर्गपथोहमेवं॰ मृत्योः किमर्थं भयमभ्युपेयां ॥ विप्रेषु बन्धुषु सुहृत्सु समाश्रितेषु॰ ८११

दीनेजनेयतिषुचाश्रमभूषणेषु । न्यस्तंमयावसुधनंददतायथार्हं· कृत्यंचयस्ययदभूत्तदकारितस्य ॥ श्रीमन्तिकीर्त्तनशतानिनिवेशितानि· सत्राजि
राश्रमपदानिसभाःप्रपाश्च । मृत्योर्नमेभयमतस्तदवाप्ततुष्टेः· यज्ञायतन्समुपकल्पयभंक्षवामां ॥ एवंतन्नाषितंश्रुत्वा सौदासः संप्रसादितः
॥ सुप्रसन्नमुखाम्भोजो विश्रान्तक्रूरतामसः ॥ तंसमीक्ष्यमहासत्त्वं बोधिसत्वंविचक्षणं ॥ समभिनन्दितस्वान्तः सम्प्रपन्नेवमब्रवीत् ॥अ
याचिषं स खलु हालहलप्रजातन्नाशीविषंप्रकुपितंज्वलदायसंवा । मूर्द्धापितस्यशतधाहृदयंचयाया· यस्त्वद्विधस्यनृपपुंगवपापमिच्छे
त् ॥ तदर्हतिभवान्वानिवक्तुंसुभाषितानिमे ॥ तच्छ्रुत्वाभवदाख्यातं मनोभिनन्दितोभवेत् ॥ दृष्टामेचरितच्छाया वैरूप्यं धर्मदर्पणे ॥अति
नाम्नागतावेगं स्यान्मेधर्मोत्सुकंमनः ॥ एतत्तत्कथितंश्रुत्वा बोधिसत्वः समीक्ष्यतं ॥ पात्रीभूतंसुधर्मस्य संपश्यन्नेवमब्रवीत् ॥ येनभद्रार्थिना
धर्मश्रोतुंसमभिवांछ्यते ॥ श्रोतव्यंसादरंतेन समाहितेनचेतसा ॥ नीचैस्तरासनास्थानाद्विबोध्यविनयश्रिया ॥ प्रीत्यर्पिताभ्यांचक्षुर्भ्यां

भद्र. वाङ्मध्वास्वादयन्निव ॥ गौरवावर्जितकायप्रसन्नामलमानसः ॥ सत्कृत्य शृणुयाद्धर्मं भिषग्वाक्यमिवातुरः ॥ एवं तत्समुपादिष्टं श्रुत्वा समभिबोधितः
॥ स्वोत्तरीयेणास्तीर्य महच्छिलातलं मुदा ॥ तत्राधिरोप्य तं प्राज्ञं बोधिसत्त्वं ससन्मतिः ॥ स्वयं भूमीतले स्थित्वा संपश्यन्नेवमब्रवीत् ॥ ब्रूहीदानीं म
हासत्त्व तानि सुभाषितानि मे ॥ यथाभवत्समादिष्टं श्रुत्वाहं बोद्धुमुत्सहे ॥ एवं तत्प्रार्थितं श्रुत्वा बोधिसत्त्वोभिनन्दितः ॥ उच्चैर्मधुरशब्देन सम्पश्य
न्नमभाषत ॥ यदृच्छयाभिसंप्राप्तं सकृत्सज्जनसंगमं ॥ भवत्यचलमत्यन्तं नाभ्यासक्रममीक्षते ॥ तन्निशम्य स सौदासः समनुबोधितो मुदा ॥ ४१२
साधु साध्विति संराध्य बोधिसत्त्वमुवाच च ॥ इदं सुभाषितं श्रुत्वा मनो मे प्राभिमोदितं ॥ तद्भूयोपि भवानेवं समुपाख्यातुमर्हति ॥ इति तत्प्रार्थि
तं श्रुत्वा बोधिसत्त्वोनुमोदितः ॥ तमभिमोदितं मत्वा संपश्यन्नेवमादिशत् ॥ न सज्जनाद्दूरचरः कथञ्चिद्भवेत् भजेच्च साधून्विनयक्रमानुगः । स्पृशत्य
यत्नं नहि तत्समीपगं विसर्पिणास्तत्कुसुमापुष्परेणवः ॥ एवं तत्गदितं श्रुत्वा सौदासः संप्रमोदितः ॥ बोधिसत्त्वं महाविज्ञं संपश्यन्नेवमब्रवीत् ॥

सुभाषितान्यर्चयता साधो सर्वात्मनात्वया ॥ स्थाने खलु नियुक्तार्थी स्थानरावेक्षित श्रमः ॥ एतत्सुभाषितेनापि मनो मे संप्रहर्षितं ॥ तथान्यदपि भू
योमे संप्रभाषितुमर्हति ॥ एवं च प्रार्थितं तेन बोधिसत्वो निशम्य सः ॥ तमनुहर्षितं मत्वा संपश्यश्चैवमब्रवीत् ॥ यथा नराणां मणिहेमभूषणा• व्रजन्ति दे
हाश्च जराविरूपतां ॥ सतां तु धर्मं न जराभिवर्त्तते • स्थिरानुरागा हि गुणेषु साधवः ॥ अमृतवर्षवत्त्वल्विद महासंतर्पितास्म्यहं ॥ ततोन्यच्च महाप्राज्ञ
संप्रभाषितुमर्हति ॥ एवं तद्भाषितं श्रुत्वा बोधिसत्वोभिनन्दितः ॥ तमभिनन्दितं मत्वा संपश्यश्चैवमादिशत् ॥ नभः सुदूरे वसुधा नलाच्च • पारेदवार्
चमहार्णवस्य ॥ अस्ताचलेन्द्रादुदयाद्रिरेव • धर्मः सतां दूरतरे सतां तु ॥ इति श्रुत्वा स सौदासः सुप्रशस्ताशयो मुदा ॥ बोधिसत्वं महाप्राज्ञं संपश्य
न्नेवमब्रवीत् ॥ चित्राभिधानातिशयोज्वलार्था • गाथास्त्वदेता मधुरा निशम्य । आनन्दितस्त्वत्प्रतिपूजनार्थं वरान्नहं तच्चतुरो वदामि ॥ तद्वृणीष्व म
हासत्व यद्यन्मनोभिवाञ्छसि ॥ तत्तत्सर्वं अहं दद्यामिति सर्वं प्रमीयतां ॥ एवं तद्भाषितं श्रुत्वा बोधिसत्वोपि विस्मितः ॥ तं सौदासं प्रशस्तास्यं संपश्य

भ६. त्रैवमादिशत् ॥ यस्याशिनात्मन्यपिते प्रभुत्वं मकार्यसंरागपराजितस्य। सत्वंवरंदास्यसिकंपरस्मै. अभ्यप्रवृत्तेर पवृत्तभावः॥ अहंचदेहीतिवरंवदेयं म
नश्च दित्सा शिथिलंनवस्यात्। तदत्ययंकः सघृणोभ्युपेया न्देताव देवालमलंयतोनः॥ इतितज्जदितंश्रुत्वा सौदासोव्रीडितानन:॥ तंसमीक्ष्यमहा
सत्वं सादरमेवमब्रवीत्॥ मात्रशंकात्वयाकार्या दातुंमनोभिवाञ्छसि॥ इतिसत्यंपरिज्ञाय याचयच्छदभीप्सितं॥ प्राणानपिपरित्यज्य दास्याम्ये
तानहंवरान्॥ विश्रब्धंतद्वृणीष्वत्वं यद्यदिच्छसिभूमिप॥ एवंतज्जल्पितंश्रुत्वा बोधिसत्वःस्मितानन:॥ सौदासंतंसमालोक्य सादरमेवमा ४१३
दिशत्॥ सत्यव्रतोभवविसर्जयसत्वहिंसां बन्दीकृतंजनमशेषमिमंविमुञ्च। अश्नानचैवनरवीर मनुष्यमांस मेतान्वराननवरांश्चतुरांप्रयच्छ॥
एतत्तेनसमादिष्टं श्रुत्वालज्जाहताशयः॥ सौदासस्तंमहासत्वं नतास्यश्चैवमब्रवीत्॥ ददामिपूर्वौभवतेवरौ द्वौ नन्यच्चतुर्थंतुवरंवृणीष्व। अवे
षिकिंनत्वमिदंयथाहं मीशोविरन्तुं नमनुष्यमांसात्॥ एवंतस्योक्तमाकर्ण्य बोधिसत्वः ससन्मतिः॥ सौदासंतमसत्प्रकांक्ष प्रहसंश्चैवमब्रवीत्॥

हन्नैतत्तवसंकृत्तं नतुमया नथोच्यते ॥ कस्त्वं वरप्रदानेन यद्वरं दातुमिच्छसि ॥ सत्यव्रतं कथं स्या स्त्वं स्यादहिंसकताचते ॥ अपरित्यजतो राजन् म
नुष्येपिशिताशितां ॥ ननूक्तं भवता पूर्वं दास्याम्येतानहं वरान् ॥ प्राणामपि परित्यक्तं न दिष्टं जायतेन्यथा ॥ कुतोहिंसकताचापि मान्सार्थं ते घ्नतानरा
न् ॥ सत्येवं कथमेतत्ता भवतास्तु वराद्वय: ॥ एवं तेन समादिष्टं श्रुत्वासोभिनतानन: ॥ सौदासस्तं महासत्वं पुनरेवमभाषत ॥ त्यक्त्वा राज्यं वनेवासोयस्य हे
नोसदाममं ॥ हतोधर्मक्षता कीर्ति स्तपश्यामितदिदं कथं ॥ इतितत्कथितं श्रुत्वा बोधिसत्वो महामति: ॥ सौदासंतं महासुढं प्रहस्यैवमादिशत् ॥ धर्मादर्थात्
सुखात्कीर्त्ते भ्रंशोयस्य कृते भवान् ॥ अनर्थायतनं ताद्दृक्कथं नत्यक्तुमर्हति ॥ दयानुशयिताचेय मनोदर्यहते जने ॥ निरता सा कथं नाम त्वाम पभिभ
वेदिति ॥ तदलं तन्महापापं भक्तेह भ्रमितुं सदा ॥ अवबोद्धुं स्वमात्मानं सर्वथार्हति भूमिप ॥ सौदासस्त्वं महावीर: सर्वभूपाधिपोनृप: ॥ तन्नवान्वै
र्यमालम्ब्य संचरस्वसमाहित: ॥ वैशेषिकानि अशलेरूपकल्पितानि । ग्राम्यान्यरूपमजेलान्यथजांगलानि । मान्सानि सन्ति करुते हृदयस्य तुष्टिं ।

भ८. निद्रावहाद्विरमसाधुमनुष्यमान्सात् ॥ भूर्यस्वनान्सजलतोयदनादधीरान्, गीतस्वनंचनिशिराज्यसुखंचतत्तत् । बन्धून्सुतान्परिजनंचमनोनुकूलं
हित्वाकथंनुरमसेत्रवनेविविक्ते ॥ चिन्तस्यनार्हतिनरेन्द्रवशेनगन्तुं, धर्मार्थयोरनुपरोधपथंभजस्व । एकान्नृपान्युधिविजित्यसमस्तसैन्यान्, मा
चिन्ताविग्रहविधौपरिकातरोभूः ॥ लोकःपरोपिमनुजाधिपनन्वपेक्ष्य स्वस्मात्प्रियंयदहितंचरनन्नियेवं । यत्स्यान्तुकीर्त्यैनुपरोपिमनोज्ञमार्गं
तद्धिप्रियंयदपिभैषजवज्जस्व ॥ एतच्छ्रुत्वाससौदासोमुदश्रुव्याप्तलोचनः ॥ समभिनन्दितस्वान्तःसहर्षगद्गदस्वनः ॥ समभिस्तत्पसंपश्यन्बो ४१४
धिसत्वस्यसम्मतेः ॥ नत्वापादौपरिष्वज्यसादरमेवमब्रवीत् ॥ गुणाकुसुमरजोभिःपुण्यगन्धैःसमन्ता जगदिदमवकीर्णं कारणोत्वद्यशोभिः
॥ इतिविचरतिपापे मृत्युदूरायदूतो, त्वमिवहिकइवान्यःसानुकंपोमयिस्यात् ॥ आस्तामुरुश्रममदैवतमेवचत्वं, मूर्ध्नावचान्स्यहममूनितवा
चयामि । भोक्ष्येनचैवसुतसोममनुष्यमान्सं, यन्मांयथावदसितस्त्वतथाकरिष्ये ॥ नृपात्मजोयज्ञनिमित्तमाहृतो, मयात्वयेवन्धनखेदपीडिताः

।हतत्विषः शोकपरीतमानसा स्वदेहमुत्स्राव सहैव तानपि॥ ॥एवं समुदितं तेन संप्रसादाभिनन्दिना॥ निशम्य बोधिसत्वोपि मुदा तथेत्यभाष
त॥ ततः स बोधिसत्वस्तं परिबोध्यानुबोधयन्। यत्र नृपसुतास्तत्र तेन सहमुदाचरत्॥ दृष्ट्वा तं समुपायातं सुतसोमं नृपात्मजाः॥ सर्वे ते विस्मयाक्रान्
स्वान्ता स्तस्थुर्विषादिताः॥ तत्र तं समुपायातं सुप्रशान्तमुखाम्बुजं॥ प्रेक्ष्य नृपात्मजास्ते च सर्वे पि सम्प्रसादिरे॥ विरेजिरे ते सुतसोमदर्शनात्त्वरेन्दुपत्रा
:स्फुटहासकान्तयः। शरन्मुखे चन्द्रकरावतंसिका. विजृम्भमानाः कुमुदाकरा इव॥ ततः समीक्ष्य सर्वान्स्तान्नृपात्मजान्प्रसादितान्॥ बोधिसत्वः
समाश्वास्य संपश्यंश्चैवमब्रवीत्॥ भवन्तो दृश्यतामत्र सुतसोमोहमागतः। तन्मेत्रवचनं श्रुत्वा सत्यं संधातुमर्हत॥ यदिमे वचनं धृत्वा सत्यधर्म
समाहिताः॥ सर्वसत्वहितं कृत्वा सदाचरितुमिच्छत॥ तदा तो बन्धनात्सर्वान् युष्मान्विमुच्य सांप्रतं॥ स्वस्वराज्याश्रमं प्रेक्ष्य चारयेयमहं ध्रुवं॥ तच्छ्रु
त्वामे वचः सत्यं सौदासस्यात्र दुष्टता॥ क्षन्तव्या सर्वदा क्वापि कर्त्तव्या मापकारता॥ एवं तेन समादिष्टं निशम्य ते नृपात्मजाः॥ सर्वे पि ते महासत्वं प्र

४८. णात्वैवंवभाषिरे ॥ धन्योभवान्महासत्वयदस्मान्वन्धनादिह ॥ विमोचयितुमायातस्त्वंसिअनुवांछितं ॥ यथात्रभवतादिष्टं तथासर्वेवयंसदा ॥ तवात्र
सासनं धृत्वा संचरिष्यामहेध्रुवं ॥ सदातेशरणेस्थित्वा धृत्वाज्ञां शिरसामुदा ॥ सत्यधर्मानुसंरक्षा श्चरिष्यामःसमाहिताः ॥ इत्यस्माकं वचःसत्यं मत्वाभ
वानकृपोदयो॥ सर्वान्नोवन्धनादेभ्यः संमोचयितुमर्हति ॥ इतिसंप्रार्थितंसर्वैं स्तैर्नृपात्मजैर्मुदा ॥ निशम्यसमहासत्वः प्रतिसंमोद्यसन्मतिः ॥ सौदासंमैत्रसं
वन्धसंरतास्तान्नृपान्व्यधात् ॥ ततस्सवोधिसत्वस्तान्सर्वानपिनृपात्मजान् ॥ शपथंकारयित्वातद्बन्धनादत्यमोचयत् ॥ ततःससुतसोमस्तैः सर्वैर्नृ ४१५
पात्मजैः सह ॥ सौदासंतंपुरोधाय संप्रस्थितोमुदाचरत् ॥ एवंसवोधिसत्वस्तैः सर्वभूपैःसमन्वितः ॥ समभिनन्द्यश्लोकान्स्वपुरंसमुपाययौ
॥ श्रुत्वातंसुतमायातं पितानृपोभिनन्दितः ॥ प्रत्युद्गतोमहोत्साहैर्मुदाप्रावेशयत्पुरं ॥ तत्रतंसमुपायातं ससौदासनृपात्मजं ॥ समीक्ष्यपौरिकालो
काः सर्वेप्राभिननन्दिरे ॥ ततःसभासनासीनो वोधिसत्वः समीक्ष्यतान् ॥ सर्वान्नृपात्मजान्तंच सौदासमेवमादिशत् ॥ भवन्तःश्रूयतांसर्वैर्यन्म

याहितमुच्यते॥ इदंश्रुत्वासमाधाय संचरध्वंसदाशुभे॥ यत्सत्यंसर्वधर्माणां मूलंसद्धर्मसाधनं॥ भद्रश्रीसद्गुणाधार मितिप्राहुर्मुनीश्वराः॥ तत्सत्यं
सुदृढंकृत्वा यदिसद्धर्ममिछथ॥ बोधिचर्याव्रतंधृत्वासंचरध्वंसदाशुभं॥ एतत्पुण्यानुभावेनपरिशुद्धत्रिमण्डलाः॥ बोधिसत्वोमहासत्वोभवेयुःश्रीगुणा
श्रयाः॥ ततोहिबोधिसम्भारं पूरयित्वायथाक्रमं॥ अर्हन्तोबोधिमासाद्यसंबुद्धपदमाप्नुयुः॥ इतिमत्वासदासत्यंत्यक्तुंक्वापिनार्हथ॥ सत्यवान्
पुरुषःश्रीमान्सर्वत्रापिविराजते॥ तस्मात्सत्यंसदारक्ष्यं धर्मश्रीसद्गुणार्थिभिः॥ स्वजीवेरक्षणार्थेपि त्यक्तव्यंनैवसर्वदा॥ सत्यमेवसदास्थैर्यंस
र्वत्रिभुवनेष्वपि॥ जीवितक्षणसंपत्तिः क्षणविध्वंसिनीभवे॥ सत्यंविनाकिमेवापि तीर्थसेवातपोव्रतैः॥ एतैर्विनापिसंयान्तिसत्येनैकेनसत्
गतिं॥ एवंतेनसमादिष्टं निशम्यतेनृपात्मजाः॥ सौदासप्रमुखाःसर्वे प्रात्यनन्दन्प्रबोधिताः॥ ततस्तान्नृपतीन्सर्वान्बोधिसत्वःसमादरात्॥ स
त्कृत्वानन्दितान्कृत्वा स्वस्वराज्येनप्रैषयत्॥ ततोभिनन्दितात्मानः सर्वेपितेनृपात्मजाः॥ प्रणत्वातंमहासत्वं समामंत्र्यमुदासरत्॥ ततोनुसं

भ६. चरन्तस्ते सर्वे पि क्षत्रियात्मजाः ॥ सह भद्रमहोत्साहैः स्वस्वराज्यमुपाययुः ॥ श्रुत्वा तान्समुपायातान्सर्वे तत्पौरिकाजनाः ॥ मुदिताः सहसोपेत्य स्वस्वभूपं प्र
णेमिरे ॥ ततस्ते क्षत्रियाः सर्वे स्वस्वराजकुलं गताः ॥ स्वस्वपित्रोः पदाम्भोजे प्रणत्वा समुपाश्रयन् ॥ ततस्ते समुपाश्रुत्य सर्वं पश्यन्नृत्तान्तिवान्धवान् ॥ स
र्वमेतत्स्ववृत्तान्तं विस्तरेणान्यवेदयन् ॥ तन्निशम्य प्रशस्तास्ते ज्ञातयो बांधवाजनाः ॥ सुतसोमं महीन्द्रं तं प्रशंस्याभिववन्दिरे ॥ ततस्ते क्षत्रियाः स
र्वे सुतसोमानुशासनं ॥ श्रुत्वा सत्वहितं कृत्वा संचेरिरे सदा शुभे ॥ ततः स बोधिसत्वस्तं सौदासं चाभिबोधयन् ॥ स्वराज्ये संप्रतिष्ठाप्य नृपधर्मन्व ४१६
चारयन् ॥ ततः स नृपतिः श्रीमान् सर्वसत्वहितार्थभृत् ॥ नीतिधर्मानुसंरक्षो राजधर्मे समाचरत् ॥ ततस्तत्पौरिकाः सर्वे लोकाश्चाप्यभिनन्दिताः ॥
सुतसोमं नृपेन्द्रं तं प्रशंस्याभिववन्दिरे ॥ ततस्तस्य महीपस्य श्रुत्वानुशासनं सदा ॥ सत्यधर्मानुसंरक्षाः सर्वे चेरुः शुभे सदा ॥ योऽसौ सर्वावधिपः श्रीमान्सुतसोमा
भिधो नृपः ॥ अर्हं हि भगवांश्छास्ता शाक्यमुनिरभूत्तदा ॥ ॥ श्रुत्वेति वाक्यं कथितं जिनेन प्रत्याययुस्ते सकला नृपाद्याः ॥ प्रदक्षिणीकृत्य पदे

प्रणत्वा॰ संबोधिचर्यास्वभिलाषिणाश्च ॥ ॥ इतिश्रीभद्रकल्पावदाने शोकोपघ्नसंभाषणो सौदासोद्धरणो सुतसोमजातकं नाम [illegible] पंचत्रिं
शतितमोऽध्यायः ॥ ॥ श्रीः ॥ ॥ अथ शुद्धोदनो राजा दृष्ट्वा संबुद्धसद्गुणान् ॥ सर्वांश्छाक्यान्समामंत्र्य सम्पश्यन्नेवमब्रवीत् ॥ भो
भवन्तः समाधाय वाक्यं ममाय उच्यते ॥ निशम्य तत्तथा सर्वे कर्त्तुमर्हथ सांप्रतं ॥ यत्स सर्वार्थसिद्धो मे आत्मजो भद्रमानसः ॥ राज्ये कामसुखारक्तः संसार
भोग्यनिस्पृहः ॥ राज्याश्रमं परित्यज्य तपोवने समाश्रयत् ॥ सुदुष्करं तपः कृत्वा परिशुद्धत्रिमण्डलाः ॥ दुष्टान्मारगणाञ्जित्वा संबोधिज्ञानमाप्तवान् ॥
संबुद्धो भगवाञ्छास्ता सर्वज्ञोऽर्हन्मुनीश्वरः ॥ धर्मराजो जगन्नाथस्तथागतो विनायकः ॥ सद्धर्मं समुपादिश्य सर्वान्सत्त्वान्विनोदयन् ॥ बोधिमार्गे
प्रतिष्ठाप्य प्रचारयति सर्वत्र ॥ एवं स त्रिजगच्छास्ता भिक्षुगणासमन्वितः ॥ सर्वसत्त्वहितं कुर्वन्समाचरति सर्वतः ॥ तत्तस्य शरणं गत्वा ब्राह्मणाः क्ष
त्रियाश्च अपि ॥ सत्त्वोऽन्येपि महालोका बहवः प्रभजन्त्यपि ॥ तदनुशासनं धृत्वा प्रव्रज्यासंवरं मुदा ॥ प्राप्यन्ते बहवो लोका भवन्ति ब्रह्मचारिणः ॥ सर्वेपि

भ८. ते महाविज्ञाय तयो ब्रह्मचारिणः ॥ सदा तस्य मुनीन्द्रस्य भजन्ति समुपस्थिताः ॥ तथा सर्वे भवन्तोऽपि धृत्वा तस्यानुशासनं ॥ शरणे सर्वदा स्थित्वा प्रभजन्तु सदा
उगाः ॥ सर्वेषामपि युष्माकमेक एको निजात्मजः ॥ कुमारः शरणे गत्वा प्रव्रजन्तु जगत्गुरोः ॥ सर्वेऽपि ते कुमारा वः शास्तुस्तस्योपसंस्थिताः ॥ बोधिच
र्याव्रतं धृत्वा संचरन्तां समाहिताः ॥ यस्य न विद्यते भ्राता स एकः कुलधर्मभृत् ॥ उपासकव्रतं धृत्वा संभजन्तां मुनीश्वरं ॥ यत्र च बहवः सन्ति भ्रातरो ये कु
मारकाः ॥ ततः एकोऽगृहं त्यक्त्वा प्रव्रजन्तु जिनाश्रमे ॥ इति मद्वचनं श्रुत्वा सर्वैरपि निजात्मजः ॥ युष्माभिः शरणे तस्य प्रेषणीयो जगद्गुरोः ॥ इति राज्ञा ४१७
समादिष्टं सर्वे शाक्यानि शम्यते ॥ तं नरेन्द्रं महीनाथं समीक्ष्यैवं बभाषिरे ॥ भो महीन्द्र महाराज भवानेवं यदीच्छति ॥ अत्र सर्वान्कुमारान्त समानं
त्रैवमादिश ॥ इति तैः कथितं श्रुत्वा शुद्धोदनो नराधिपः ॥ तथाहीति प्रतिश्रुत्य दूतान्वीक्ष्यैवमादिशत् ॥ सर्वेषामपि शाक्यानामेषां सर्वान्निजात्म
जान् ॥ तान्कुमारान्समामंत्र्य समानयत मे पुरः ॥ इति राज्ञा समादिष्टं दूताः सर्वे निशम्य ते ॥ तथेति प्रतिविज्ञप्य सहसा समुपाचरत् ॥ ते गत्वा तत्र

सर्वेषां शाक्यानांच कुले कुले ॥ गत्वा सर्वान्कुमारान्स्तान्समामंत्र्यानयद्द्रुतं ॥ सर्वेपि ते कुमारास्तं शुद्धोदनं नराधिपं ॥ प्रणत्वा समुपाश्रित्य पश्य
न्तउपतस्थिरे ॥ दृष्ट्वा सर्वान्कुमारान्स्तान्शुद्धोदनो नराधिपः ॥ भणुध्वं मेवचः सर्वे यूयमिति समादिशत् ॥ तत्रापि दिष्टमाकर्ण्य सर्वे पि ते कुमारकाः ॥ तं म
हीन्द्रं समालोक्य मुदिता एवमब्रुवन् ॥ देवादिशतु तत्कार्यमस्मासु यत्समीछति ॥ भवतापि यथादिष्टं तथा सर्वं करामहे ॥ इति प्रोक्तं कुमारैस्तैः सर्वैः श्रुत्वा
नराधिपः ॥ मुदा सर्वान्कुमारान्स्तान्सम्पश्यन्नेवमादिशत् ॥ यन्मे सर्वार्थसिद्धेः सौनन्दनः आत्मजः सुधीः ॥ राज्याश्रमं परित्यज्य तपोवने समाश्रयन् ॥ स
ऽष्करं तपः कृत्वा परिशुद्धत्रिमण्डलः ॥ जित्वा मारगणान्दुष्टानर्हन्संबोधिमाप्तवान् ॥ इदानीं स महाभिज्ञो भगवान्क्लेशान्तकाधिपः ॥ सर्वधर्माधिराजे
न्द्रो मुनीश्वरस्तथागतः ॥ कृपादृष्ट्या समालोक्य सर्वान्सत्वान्विलोकयन् ॥ सद्धर्मं समुपादिश्य प्रचरन्ते समन्ततः ॥ तत्सद्धर्मामृतं पीत्वा सर्वलोकाः प्र
बोधिताः ॥ तस्य शास्तुर्मुनीन्द्रस्य शरणे समुपस्थिताः ॥ त्रिरत्नभजनं कृत्वा चतुर्ब्रह्मविहारिणः ॥ बोधिचर्याव्रतं नित्यं संचरन्ते समाहिताः ॥ ये विशुद्धा

भद्र.

शया: सन्त: संस्कारगतिनिस्पृहा: ॥ तस्मात्तु शासनं धृत्वा चरन्ते भिक्षुसंवरं ॥ येच भद्राशया: सन्त: सद्धर्मश्रीगुणार्थिन: ॥ ते तस्य भजनं कृत्वा संचरन्ते उपासका: ॥ ए
वं सर्वे मरा दैत्या सर्वे लोकाधिपा अपि ॥ तस्य धर्मामृतं पीत्वा समभिनन्दिताशया: ॥ शरणे समुपाश्रित्य धृत्वानुशासनं सदा ॥ बोधिचर्याव्रतं धृत्वा संचरन्ते समा
हिता: ॥ एवमन्येपि लोकाश्च सन्त: सद्धर्मवाञ्छिन: ॥ तस्मात्तु शासनं धृत्वा संचरन्ते सदा शुभे ॥ येन तस्य त्रिजगच्छास्तु: पीत्वा धर्मामृतं मुदा ॥ बोधिचर्याव्रतं धृत्वा
संचरन्ते सदा शुभे ॥ दुर्गतिं ते न गच्छन्ति संजाता सज्जनौ सदा ॥ बोधिचर्याव्रतं धृत्वा संचरन्त: सदा शुभे ॥ सत्सुखान्येव भुंजाना भद्रश्रीसद्गुणाश्रया: ॥ सर्वसत्व ४१८
हितं कृत्वा संप्रयायु जिनालयं ॥ तत्रापि ते जिनेन्द्रस्य शरणे समुपस्थिता: ॥ सदानुशासनं धृत्वा संचरन्त: समाहिता: ॥ प्रव्रज्यासम्वरं धृत्वा संचरन्त: स
दा शुभे ॥ प्राप्यार्हत्वं महाभिज्ञा: सुनिर्वृतिं समाश्रयु: ॥ इति सत्यं परिज्ञाय सर्वे यूयं प्रमोदिता: ॥ गत्वा तस्य जगच्छास्तु: शरणे समुपस्थिता: ॥ सदा
नुशासनं धृत्वा संचरध्वं यतिव्रतं ॥ एतत्पुण्याभिभुञ्जाहि यूयं सर्वे शुभेन्द्रिया: ॥ अर्हन्तो बोधिमासाद्य निर्वाणं समवाप्स्यथ ॥ इति मत्वा यदीच्छा बोधि

ध्यतेहिस्तुनिर्वृतौ॥ तस्यानुशासनं धृत्वा संचरध्वं सुसंवरं॥ इत्यादिष्टं नरेन्द्रेण श्रुत्वा सर्वेपि ते मुदा॥ संवुद्धं समुपाश्रित्य चारित्रं व्रतमीछिरे॥ ततः सर्वेकु
मारास्ते प्राप्याज्ञां महीपतेः॥ पादौ नत्वा समामंत्र्य स्वस्वालयमुपाचरन्॥ तत्र सर्वेकुमारास्ते स्वस्वपित्रोः पदाम्बुजे॥ नत्वा राज्ञा यथादिष्टं तथा सर्वं न्यवेदयन्॥ ततोनु
ज्ञां समासाद्य सर्वेपि ते कुमारकाः॥ स्वस्वपित्रोः पदाम्भोजे नत्वा समभिनन्दिताः॥ गजाश्वरथमारुह्य वस्त्रालंकारमण्डिताः॥ स्वस्वगेहाद्विनिर्याता राजमार्ग
उपाचरन्॥ ततः सुन्दरनन्दोपि देवदत्तोनुजः सुधीः॥ हस्तिमारुह्य संपश्यन् राजकुलमुपाचरन्॥ तस्यानुजो भवारकउपधानाभिधो गृहे॥ कुलचर्यांव्र
तं धृत्वा तं मुनीन्द्रं मुदाभजत्॥ तस्यानुजो महाविज्ञ आनन्दोनाम सन्मतिः॥ संवुद्धशरणो गत्वा तथाचारित्रमैछत॥ तमेव गन्तुमीछन्तं माता मृगासमी
क्ष्य सा॥ वालकं स्वयमाश्लिष्य न्यवारयत् प्रयत्नतः॥ तयानिवारितेचापि प्रवोध्य मातरं मुहुः॥ उपधानं दर्शयित्वा गजारूढः समाचरत्॥ धौतोद
नात्मजौ धोचनन्दननन्दिकाभिधौ॥ हस्तिमश्वं समारुह्य राजकुलमुपेयतुः॥ ततोमृतोदनस्यापि पुत्रास्त्रयो विचक्षणाः॥ अनिरुद्धो महानामा भद्रि

भद्र. कश्चेतिविश्रुताः॥ अनिरुद्धंमहाविज्ञंचरमभविकंमुदा॥ महानामासमालोक्य भ्रातैवंपर्यपृच्छत॥ किंभ्रातर्जगच्छास्तुःशरणोसमुपस्थितः॥ प्रव्रज्याव्रतमाश्रय
संचरितुंत्वमिच्छसि॥ अथगृहाश्रमस्थित्वा सर्वसत्वहितार्थभृत्॥ कुलचर्याव्रतंधृत्वा संचरितुंकिमिच्छसि॥ इतिभ्रात्राभिसंपृष्टे महानाम्नासमन्मतिः॥ श्रुत्वा
निरुद्धआलोक्य भ्रातरंतमपृच्छत॥ संबुद्धशरणोस्थित्वाचरितव्यंकथंसदा॥ गृहेस्थित्वापिकिंकार्यंकर्त्तव्यंचतदादिश॥ तदभिवांछितेनूनंसंचरिष्येहमात्मना
॥ इतितत्पृष्टमाकर्ण्यमहानामाविचक्षणाः॥ भ्रातरंतंमहाविज्ञं पश्यन्नेवमुपादिशत्॥ गृहस्थेनसदापुंसाकुलचर्यानुचारिणा॥ प्रातरुत्थायकर्त्तव्यंरत्नःसंदर्शनं ४१९
सदा॥ गुरूणामपिसर्वेषांसंमाननाभिवादनं॥ सदानुशासनंधृत्वाचरितव्यंशुभेसदा॥ ज्ञातायेदुःखिनोवीक्ष्यपालनीयाःसदापिते॥ मृतानामग्निसंस्कारंका
र्यंचश्राद्धतर्पणं॥ मातापितात्मजाःसर्वे पुत्राःपौत्राःस्नुषाअपि॥ दुहितरोपिचतत्पुत्रपौत्राःसर्वेचबांधवाः॥ ज्ञातिवर्गाःसुहृन्मित्रसहायभृत्यसेवकाः॥ दा
सादासीजनाश्चापि पालनीयाःसदात्मवत्॥ रत्नादिद्रव्यवस्तूनि सर्वेपिधातवस्तथा॥ सर्वाण्यपिचभोग्यानि साधनीयानियत्नतः॥ अर्थिनापिसदास

वैमाननीयायथेप्सितैः॥ एवंसर्वेपिसत्वाश्च नन्दनीयास्सुदर्शनैः॥ गृहेनित्यंशुभोत्साहं प्रकर्त्तव्यंदिवानिशं॥ त्रिरत्नभजनंकृत्वाचरणीयंसदाशुभे
॥ सर्वसत्वहितंकृत्वा चतुर्ब्रह्मविहारिणा॥ बोधिचर्याव्रतंधृत्वाचरितव्यंसदाशुभं॥ एवंगृहाश्रमेस्थित्वा पुरुषेणासुखार्थिना॥ यथाकामंसुखंभुक्त्वाचरि
तव्यंसदासुखं॥ इतिकामगुणासौख्यं रागांते विद्यतेयदि॥ कुलचर्याव्रतंधृत्वासंचरस्वगृहेस्थितः॥ इतितत्समुपादिष्टमनिरुद्धोनिशम्यच॥ भ्रातरंम
हानामानं पश्यन्नेवमुपादिशत्॥ प्रव्रजितेनकिंधृत्वाचरितव्यं कथंकुह॥ स्थातव्यंकिंचभोक्तव्यंगन्तव्यंच कथंवद॥ इतितत्पृष्टमाकर्ण्यमहानामावि
चक्षणः॥ भ्रातरमनिरुद्धं तं पश्यन्नेवमुपादिशत्॥ यःप्रव्रतंधृत्वासंचरितुंसमिच्छति॥ सगृहाश्रममुत्सृज्य सर्वांश्चापिपरिग्रहान्॥ गत्वाश्रमेमु
नीन्द्रस्यशरणेसमुपस्थितः॥ सदानुशासनंधृत्वासंबोधिनिहिताशयः॥ सर्वसत्वहिताधानसद्धर्म्मगुणालालसः॥ प्रव्रज्याव्रतमादाय ब्रह्मचर्यं
समाचरत्॥ मुण्डितःसुप्रशान्तात्मा काषायचीवरावृतः॥ शलाकापात्रमादायचतुर्ब्रह्मविहारधृक्॥ कुलाकुलेषुसर्वत्र निर्विकल्पितमानसः॥

याचित्वा श्रद्धया दत्तं भुक्त्वाज्ञोग्यं यथोचितं ॥ एकः संगविरक्तात्मा निरातंको जितेन्द्रियः ॥ निरंजनः समालोक्य समाहितः समाचरेत् ॥ विहारे मण्डपे सत्रे
चैत्यालये जिनाश्रमे ॥ शून्यालये श्मशाने च विविक्ते निर्जने वने ॥ आरामे वृक्षमूले च नदीतीरे सरस्तटे ॥ ग्रामान्तिके महोद्याने पुण्यक्षेत्रे मनोरमे
॥ तृणासने समाश्रित्य विमराख्य समाहितः ॥ समाधिनिहितः स्वान्ते लिखेद्ध्यात्वा जगद्धितं ॥ सर्वसत्त्वसमं पश्यन् दयाकारुण्यचक्षुषा ॥ निर्ममोभि
रहंकारो बोधिचर्यां समाचरन् ॥ एवं बोधिव्रतं धृत्वा संबोधिनिहिताशयः ॥ ससम्पतिर्यत्तिर्योगी सुनिर्वृतिं समाश्रयात् ॥ यद्यत्राप्यत्ति ते वांछा सु ४२०
निर्वृतिसमाश्रये ॥ बौद्धचर्याव्रतं धृत्वा संचरस्व समाहितः ॥ इति शास्त्रा समादिष्टं मनिरुद्धो निशम्य सः ॥ संबुद्धशरणे स्थित्वा व्रतं च भिक्षुमेच्छत ॥ ततः
सौभाद्रिकस्वानः सोऽनिरुद्धो महार्थवित् ॥ भ्रातरं तं महानामं संपश्यन्नेवमब्रवीत् ॥ नाहमत्र गृहे स्थित्वा कामगुणासु खारतः ॥ यथाभिवांछितं भोग्यं भुक्त्वा
रमितुमुत्सहे ॥ त्वमत्र गृहमाभृत्य गृहकार्यं समुद्धर ॥ कुलचर्याव्रतं धृत्वा संचरस्व समाहितः ॥ अहं गत्वा मुनीन्द्रस्य शरणे समुपस्थितः ॥ प्रव्र

ज्याव्रतमाश्रय संचरितुं समुत्सहे ॥ इति प्रोक्त्वा निरुद्धोसौ बोधिचर्याभिवांछितः ॥ पित्रोः पदांबुजे नत्वा तदनुज्ञामयाचत ॥ तत्पितृसंप्रदत्तां स समभिनन्दिता
शयः ॥ लब्ध्वानुज्ञां प्रणत्वा तौ पितरौ च मुदाचरत् ॥ ततः सोभिप्रशान्तात्मा वस्त्रालंकारभूषितः ॥ महानागं समारुह्य राजकुलमुपासरत् ॥ एवं सर्वेपि
तेशाक्याः पंचशतकुमारकाः ॥ गजाश्वरथमारुह्य सर्वालंकारमण्डिताः ॥ तस्य राज्ञो नरेन्द्रस्य शुद्धोदनस्य दर्शने ॥ कैर्ज यथाक्रमं तत्र राजकुलेमुदावि
शन् ॥ तत्र तं स्वामिनं दृष्ट्वा सर्वेपि तेभिनन्दिताः ॥ प्रणत्वा समुपाश्रित्य संपश्यन्तो नु तस्थिरे ॥ तान्सर्वान्समुपासीनान्दृष्ट्वा शुद्धोदनो नृपः ॥ सादरं समु
पामंत्र्य संपश्यन्नेवमादिशत् ॥ सर्वे यूयं कुमारा मे नन्दनस्य जगद्गुरोः ॥ शरणं समुपस्थित्वा चरध्वं बोधिसंवरं ॥ इत्यादिष्टं नरेन्द्रेणा श्रुत्वा सर्वे कुमा
रकाः ॥ तेन तथेति प्रतिश्रुत्य ततो गन्तुं समुत्थिताः ॥ तस्य राज्ञः पदम्भोजे प्रणत्वा समनुमोदिताः ॥ राजकुलाद्विनिष्क्रम्य जनकाय समन्विताः ॥ स्व
स्ववाहनमारुह्य स्वस्वजनसमन्विताः ॥ सुन्दरारामं पुरोधाय संप्रस्थिता मुदाचरन् ॥ तत्र सर्वे कुमारास्ते संबुद्धशालालसाः ॥ प्रचरन्तो महोत्साहैः परद्वारमुपाच

रन्॥ तत्रसर्वेकुमारास्ते दूराद्दृष्ट्वाजिनाश्रमं॥ गजाश्वरथयानेभ्यो ऽवतीर्यपद्भ्यसरन्॥ तत्रसर्वेपितेशाक्यकुमारास्तंमुनीश्वरं॥ दृष्ट्वाभिनन्दितःस्वात्माःप्रणा
त्वैकान्तमाश्रयन्॥ ततोपालिर्विभिक्षात्माकुमारोनापितःसुधीः॥ मात्रासहसमायातस्तत्राश्रमेमुदासरन्॥ तत्रतंश्रीघनंदृष्ट्वासर्वसंघपुरस्कृतं॥ मु
दमात्रासहोपेत्यप्रणत्वैकान्तमाश्रयत्॥ ततोभद्रामायामातातस्योपालेर्महामतेः॥ समुत्थायमुनीन्द्रस्यपादौनत्वैवमब्रवीत्॥ भगवन्सर्वविच्छास्त
रात्मजोयंसुधीर्मम॥ भवद्दर्शनमाकांक्षी आगतोत्रमहावने॥ दृश्यतांदर्पणांतस्मात्त्समानवयसोभवान्॥ कृपादृष्ट्यासमालोक्यसंमोदयितुमर्हसि॥ इ
तितत्प्रार्थितंश्रुत्वाभगवान्समुनीश्वरः॥ तमुपालिंसमालोक्यतूष्णीभूत्वाऽधिवासतत्॥ तदधिवासितंमत्वासउपालिःपुरोगतः॥ दर्पणंदर्शयामास ४२१
त्रिजगद्गुरवेमुदा॥ ततःसभगवान्तस्मै बोधिचर्याश्रियंददौ॥ आदर्शवत्त्रिर्मलंचित्तं भूयात्तवेतिसर्ववित्॥ कुमारेभ्योपिसर्वेभ्योदर्शयामासनापि
तः॥ आदर्शवत्त्रिर्मलंभूयःकुमाभिक्षुगणायच॥ तदाशाक्यात्मजाःसर्वे पंचशतकुमारकाः॥ संमीलैकान्तमाश्रित्यतत्रैवंसंवभाषिरे॥ वयंसर्वेस

माश्रित्य संबुद्ध शरणोऽधुना॥ प्रव्रज्यासंवरं धृत्वा संचरितुमिहागताः॥ तदस्माकमलं सर्वैः शुद्धाम्बर विभूषणैः॥ तदेतान्यानि सर्वाणि वस्त्राणि भूष
णान्यपि॥ तदिमान्यपि सर्वाणि वस्त्राणि भूषणान्यपि॥ अस्मायुपालये दत्वा व्रजेम श्रीघनान्तिके॥ इति संभाषणां कृत्वा सर्वेपि ते कुमारकाः॥ उपालेः
पुरतो गत्वा पश्यन्त उपतस्थिरे॥ ततः सर्वे कुमारास्ते सर्वाण्याभरणान्यपि॥ उपालेः पुरतस्तस्य निक्षिप्यैवं बभाषिरे॥ उपाले यद्वयं सर्वे संबुद्धस्या
स्यशासने॥ प्रव्रज्यासंवरं धृत्वा प्रेक्षाम श्चरितुं ध्रुवं॥ तदस्माकमलं वस्त्रै रेभिः सर्वै र्विभूषणैः॥ तत्तेइमानि सर्वाणि त्वमादत्स्व प्रसीदच॥ तस्मिन्नव
सरे तत्र शुद्धोदनो नराधिपः॥ संबुद्धदर्शनं कर्तुं महोत्साहैर्मुदासरत्॥ तं नरेन्द्रं समायातं समीक्ष्य ते कुमारकाः॥ सर्वेभिनन्दितात्मानः प्रव्रजितुमुपाचर
न्॥ ततः सर्वे कुमारास्ते समुपेत्य जगद्गुरोः॥ शरणात्वा चरणाम्भोजे प्रार्थयन्नेवमानताः॥ भगवन्नाथ सर्वज्ञ भवतां शरणे स्थिताः॥ संचरितुं समीहामः
प्रव्रज्यासंवरं सदा॥ तद्भवान्नः समालोक्य समन्वाहृत्य शासने॥ निर्वृतिसाधने धर्मे संचारयितुमर्हसि॥ इतितैः प्रार्थितैः सर्वैः संबुद्धो भगवाञ्जिनः॥

भ८. सर्वांश्चापिकुमारान्तान्संपश्यन्नेवमादिशत्॥ आयातभिक्षवःसर्वे यदीछथसुनिर्वृतिं॥प्रव्रज्याव्रतमासाद्य संचरध्वंसमाहिताः॥ इत्यादिश्यस संबुद्धः स्वर
शनैस्तच्छिरसिक्रमात्॥प्रव्रज्यासंवरंदत्वा प्राव्राजयत्कुमारकान्॥ ततःसर्वेकुमारास्ते सस्तुद्रस्य सुसमस्तकाः॥ मुण्डिता खिक्खिरीपात्रविभ्राणाश्ची
वरावृताः॥ शुद्धशीलाःसमाचाराः परिशुद्धत्रिमण्डलाः॥ निःक्लेशानिर्मलात्मानः परिशुद्धशुभेन्द्रियाः॥ समाधिसर्वविद्यानांसंसाधनसमुद्यताः॥
प्रव्रज्यासंवरंधृत्वासंचेरिरेसमाहिताः॥ ततस्तेभिक्षवःसर्वे यतयोब्रह्मचारिणः॥ सर्वेषामपिलोकानांवंद्याःपूज्यास्तदाभवन्॥ तान्दृष्ट्वाविस्मितोराजासमं ४२२
त्रिजनपौरिकः॥ ततोविज्ञापयामास पूजितुंतान्यथाक्रमं॥ ज्येष्ठानुक्रमतस्तेषां निकस्तान्मुनीश्वरः॥ पूजनेषुतमानन्द माज्ञापयज्जगद्गुरुः॥ प्रव्रज्याक्र
मतःस्थाप्यानतुज्येष्ठक्रमादिमे॥ नममशासनेह्यत्र अयजन्मविचारणा॥ प्रव्रज्याक्रमतोस्थेया वन्दनीयाश्च भिक्षवः॥ महत्तरोकर्मगुणो महा
ज्येष्ठोभवेयतः॥ इत्यादिष्टंमुनीन्द्रेण श्रुत्वानन्दस्तथेतिसः॥ स्थापयामासतान्सर्वान्प्रव्रज्याक्रमतस्तदा॥ अथतान्पूजयामास शुद्धोदनोयथाविधिः

॥ प्रत्येकं चीवरं दत्वा पात्रं पायसपूरितं ॥ ततः प्रणम्य यो राजा सामात्यजनपौरिकः ॥ सुगताद्यान्भिक्षुसंघान्नत्वा मुदा वनात्पुरं ॥ ॥ इति श्रीभ
द्रकल्पावदानेऽशोकोपगुप्तसंभाषणे सुन्दरनन्दादिपञ्चशतशाक्यकुमारप्रव्रज्याव्रतसंचारणो नाम षट्त्रिंशतितमोऽध्यायः ॥ ३६ ॥ ० ॥
अथ प्रातः समुत्थाय गौतमी साप्रसादिना ॥ भर्तृराज्ञां समासाद्य सर्वसंघं न्यमंत्रयत् ॥ ततस्तद्दह भोज्यानि साधयित्वा च गौतमी ॥ श्रद्धाम्बरावृतास्नात्वा स
र्वालंकरशोभिता ॥ सर्वाङ्गशोभितं कृत्वा यशोधरासमन्विता ॥ ससांघिकं मुनीन्द्रं तं दूतेन समचोदयत् ॥ ततः स भगवान्सर्वैर्भिक्षुसंघैः समन्वितः ॥ खिक्वि
रीपात्रमाधाय प्रतस्थे संप्रभासयन् ॥ तत्र मार्गे ससंबुद्धः सर्वान्सत्वान्विशोधयन् ॥ क्रमेणासंक्रमन्नन्तःपुरे श्रद्धे समाविशत् ॥ तत्र पार्श्वं समादाय भगवा
न्स मुनीश्वरः ॥ श्रद्धासने समाश्रित्य संतस्थौ संप्रभासयन् ॥ तथा पार्श्वं समादाय सर्वे ते सांघिका अपि ॥ यथाक्रमं समाश्रित्य श्रद्धासनेभितास्थिरे ॥ ततः स्वा
सन आसीनं संबुद्धं तं ससांघिकं ॥ दृष्ट्वा पूजोपचारैस्सा साप्यानुजा समर्चयत् ॥ ततः सा मुदिता देवी तं मुनीन्द्रं ससांघिकं ॥ यथार्हभोजनैः श्रद्धैः प्रणी

तैः समतोषयत्॥ ततोपनीय पात्राणि शोधयित्वा भुजादिकं॥ स सांधिकं मुनीन्द्रं तं गौतमोप्रानमञ्भुवा॥ ततः स राहुलः पौत्रा जनकं तं संसांघिकं॥ नत्वा पितुर्मुनी
न्द्रस्य छायायां समुपाश्रयत्॥ स छायापरिस्पर्शेसौ राहुलोतिसुखान्वितः॥ प्रव्रज्याव्रतमाधाय संचरितुं मुदाऽर्हति॥ ततः स राहुलो पुत्रः स्तं मुनीन्द्रं कृताञ्जलिः
॥ प्रणत्वा समुपाश्रित्य पितुर्वदनमभ्यार्थयत्॥ भगवंस्त्रिजगन्नाथ सर्वसत्वहितार्थभृत्॥ कृपादृष्ट्या समालोक्य देहि मे पैतृकं धनं॥ इति तत्प्रार्थितं दृष्ट्वा संबुद्धो
भगवाञ्जिनः॥ संपश्यन्राहुलं पुत्रं उवाचैवं प्रसादितः॥ अत्र मे शासनेस्थित्वा प्रव्रज्यासंवरं चर॥ तदाहं ते प्रदास्यामि पैतृकं धनमुत्तमं॥ इत्यादिष्टं मुनीन्द्रे ५२३
णा निशम्य राहुलो मुदा॥ प्रव्रज्यासंवरं धृत्वा संचरितुं समिच्छति॥ ततः स भगवान्मत्वा राहुलं संप्रबोधितं॥ आर्यसत्यं समारभ्य सद्धर्मं समुपादिशत्
॥ तत्सद्धर्मामृतं पीत्वा राहुलः संप्रसादितः॥ प्रणत्वा तं जगन्नाथं मातुः प्रमुदउपासरत्॥ ततः शुद्धोदनो राजा तत्सद्धर्मामृतं पिबन्॥ समंत्रिजनः पौरैः
सः प्राप्यनन्द्रसंबोधितः॥ ततः स भगवांश्छात्वा सर्वसंघसमन्वितः॥ संभाषयन्सुपराणाभैः स्वाश्रमे समुपासरत्॥ तत्राश्रमे समाश्रित्य भगवान्संघ

समन्वितः॥ जगद्गुरोर्कं समालोक्य नस्थौ ध्यात्वा हितार्थकं॥ ततः स राहुलो भद्रो मातुः पुरः समाश्रितः॥ मुनीन्द्रेणाय यथादिष्टं तथा सर्वं न्यवेदयत्॥ एतत्पुत्र
समाख्यातं श्रुत्वा माता यशोधरा॥ नूनमेष महासत्वः प्रव्रजेदिति मूर्छिता॥ ततो धैर्यं समालंब्य दृष्ट्वा तं राहुलं सुतं॥ स्वक्रोडे संप्रतिष्ठाप्य संपश्यन्त्येवमब्रवीत्
॥ हा पुत्र मां परित्यज्य स राज्यांग परिग्रहां॥ प्रव्रज्या सम्वरं धृत्वा कथं चरितु मिच्छसि॥ पुत्र तावत् कुमारोसि सुकोमल शरीरकः॥ कथं भिक्षुः समाधाय प्रव्रज्या सं
वरं चरे ॥ प्रव्रजितः सदारण्ये निर्जने निवसेर्वने॥ परकुले सु याचित्वा स्वयं भिक्षान्नमाहरेः॥ तत कथं त्वं महीन्द्रस्य कुले जातो नृपात्मजः॥ राज्यमुत्सृज्य स
र्वत्र याचित्वा कथमाहरेः॥ रम्येत्र मन्दिरे त्यक्त्वा शय्यासनं सुकोमलं॥ निर्जनेरण्ये वृक्षान्ते भूतले कथमाश्रयेः॥ स्वगृहेत्र महोत्साहं संगीति रवमुत्तमं ॥
त्यक्त्वा दुष्टजनावासे कथं निर्भीर्वने वसेः॥ सर्वलोकैः स्वराज्येत्र वंद्यमानाभिसंस्तुतः॥ कथमन्यत्र देशेषु भिक्षार्थी नीचवच्चरेः॥ इति मत्वा महाभाग स्वराज्येत्र
सुखान्वितः॥ यथाकामं रमन्भोग्यं भुञ्जमानः सुखं चर॥ यदीच्छसि सुखाकांक्षी संबुद्धशासने व्रतं॥ उपासक व्रतं धृत्वा संचर स्वयथासुखं॥ यद्यस्ति ते

सभिक्षापि संबुद्धश्चासने भवेत् ॥ यावद्बाल्योऽधुना तावच्चैलकव्रतमाचर ॥ यदा त्वं तरुणः प्रौढस्त्रिरत्नशरणागतः ॥ प्रव्रज्यासंवरं धृत्वा संचरस्व समाहितः ॥ स
वंचेत्तदाप्यत्र भद्र सौख्यं भवेद्ध्रुवं ॥ ततः संबोधिमासाद्य निर्वृत्सुखमाप्नुयात् ॥ इति मात्रा समाख्यातं श्रुत्वा स राहुलः सुधीः ॥ मातरं तां समालोक्य संबो
धयन्नब्रवीत् ॥ मम्मापि मे पिता राजकुले जातो नृपात्मजः ॥ राज्यपरिग्रहान्सर्वान्त्यक्त्वा सद्धर्मलालसः ॥ वने गत्वा समासीनस्तपोव्रतं समाचरन् ॥ दुष्टा
न्मारगणाञ्जित्वा परिक्षिमराउलः ॥ अर्हन् संबोधिमासाद्य संबुद्धो भगवानपि ॥ अन्यकुलेषु सर्वत्र निःसंगोपि भ्रमन्स्वयं ॥ याचित्वापि राज्यमाहृत्य ध्यात्वा ४२४
संतिष्ठते सुखं ॥ एकोपि निर्जने रम्ये समाश्रित्यापि भूतले ॥ निर्भीर्ध्यात्वा समाधाय संतिष्ठते यथासुखं ॥ भूयो गेहे श्मशाने पि भूतप्रेतसमाकुले ॥ नि
र्भीरेकः समाधाय स्वस्थः संतिष्ठते सुखं ॥ सोपि राजा प्रपुष्टांगः सुकुमारः सुखोचितः ॥ भ्रमन्सर्वत्र देशेषु संचरते यथासुखं ॥ इति दृष्ट्वापि तत्तस्य श
रणे समुपस्थितः ॥ प्रव्रज्यासंवरं धृत्वा संचरितुं समुत्सहे ॥ एतन्मे वांछितं मातर्यदि ते कृपा मयि ॥ तदनुज्ञां प्रदत्त्वा मे प्रसीदस्वानुमोदितः

इति पुत्रसमाख्यातं श्रुत्वा माता यशोधरा॥ आत्मजं तं महाविज्ञं संपश्यन्त्येवमब्रवीत्॥ हा पुत्र कथमुत्सृज्य मातरं मां जरान्वितां॥ बालोपि दुष्करीं चर्यां सं
चरितुं समुत्सहे॥ यदि तेस्ति समीछापि संबोधिसाधनव्रते॥ यथा त्वं तरुणो भूत्स्न तदा चरस माहितः॥ एवं चेत्त सदा भद्र सौख्यं भवेद्भवे खलु॥ पत्र बोधिमासा
द्य संचरेत्सौगतं व्रतं॥ सर्वसत्वहितं कृत्वा सुनिर्वृतिसमाश्रयाः॥ इति मत्वा महाभाग नाव तत्कुलव्रतं चर॥ इति मात्रोदितं श्रुत्वा राहुलः स महामतिः॥ मा
तरं स्नेहदुःखार्त्तां संपश्यन्नेवमब्रवीत्॥ अम्बात्र किं न जानासि संसारभवचारिणां॥ सर्वेषामपि जन्तूनां मृत्युर्हि परतः सदा॥ अवश्यंभाविभावा हि भ
वन्ति सर्वप्राणिनां॥ इति मत्वा भवे ह्यस्मिन् शान्त्यर्थं काचरेत्सुसंवरं॥ अपि क्षणालयाः कामाः धर्मार्थाभिविनाशकाः॥ इति कामगुणे नैव रोचते मे मनो ख
लु॥ रोचते मे मनो धर्मे संबोधिज्ञानसाधने॥ इत्यनुज्ञां प्रदत्वा मे सद्धर्मं समवाप्नुहि॥ एतद्धर्मानुभावेन त्वमपि निर्मलेन्द्रिया॥ भद्र श्रीसद्गुणाधारो बो
धिसत्वो भवेदपि॥ इत्यात्मजोदितं श्रुत्वा जननी सा प्रबोधिता॥ तमात्मजं महाविज्ञं संपश्यन्त्येवमब्रवीत्॥ यदि पुत्र समिच्छा ते सञ्चरे सौगते पितुः॥

भड. गछानुसासनं श्रुत्वा संचरस्व समाहितः॥ माच दृष्ट्वा सुखाक्रान्तां स्त्रीकान्कामानुरागिनः॥ मनोधैर्यं परित्यज्य समीक्षस्व कुलव्रतं॥ स्त्री श्चापि सुन्दरीकान्ता धर्म
श्रोतुं समागता॥ दृष्ट्वा मनः समाधाय चर संबोधिमानसः॥ कुमारान्सुन्दरान्कान्तान्सर्वालंकारमण्डितान॥ दृष्ट्वा संगतिरागं च माकुरुष्व कथंचन॥ तथा दृ
ष्ट्वा च संगीति महोत्साह मनोरतिं॥ माकुरुष्व समाधाय संचरस्व जितेन्द्रियः॥ आमिषाण्यपि भोग्यानि दृष्ट्वा परकुलेषु च॥ मनोभिलाषलोलत्वं निगृहीत्वा
समाचर॥ शत्रूनुद्धतान्समालोक्य क्षमां कृत्वा समाचर॥ सुहृदोपि समालोक्य माकुरुष्वानुरागतां॥ पितृमित्रसमान्सर्वा स्त्रीकान्वीक्ष्य समाचर॥ स्त्री श्च स ४२५
र्वाः समालोक्य मातृरिव विभावय॥ शून्यमनात्मकं सर्वं सुखदुःखमनित्यितं॥ मत्वा क्लेशान्विनिर्जित्य विहरस्व समाहितः॥ एवं चरन्समाधाय सौगतंत्र
तमुत्तमं॥ निःक्लेशं सुविशुद्धात्मा परिशुद्धत्रिमण्डलः॥ दुष्टान्मारगणाञ्जित्वा जितेन्द्रियो यतिः सुधीः॥ अर्हन्संबोधिमासाद्य सुनिर्वृतिं समाप्नुयात॥ इ
ति सत्यं परिज्ञाय यदीच्छसि सुसंवरं॥ पित्रा यथा समादिष्टं तथाचर समाहितः॥ गच्छ ते सर्वदा भूयात्त्रिरत्नानां सुमंगलं॥ यथाभिवाञ्छितं सर्वं तथा सं

सि अनुध्रुवं ॥ इति मात्रा समादिष्टं श्रुत्वात्मजः स राहुलः ॥ समनुज्ञां समासाद्य ततः संप्रस्थितो चरन् ॥ तं संप्रस्थितमाकर्ण्य गौतमी सा पितामही ॥ सह
सा समुपागत्य समालिंग्यैवमब्रवीत् ॥ हा पौत्र कथमेव त्वं प्रव्रज्याव्रतमिच्छसि ॥ तव पित्राप्यहं त्यक्ता कथं त्याज्या त्वयापि च ॥ बालोसि सांप्रतं पौत्र सुकुमारः सु
खोचितः ॥ दुष्करं संवरं बौद्धं चरितुं शक्नुया कथं ॥ हा वत्स कथमेव त्वं जननीं मां पितामहीं ॥ निर्दया करुणाचित्तः परित्यक्तुं समिच्छसि ॥ यदि ते स्ति स
मिच्छापि सौगते दुष्करे व्रते ॥ यदा त्वं तरुणः प्रौढ स्तदा चर पितुर्व्रतं ॥ यदि मयि दयाते स्ति श्रुत्वा समुचितं मया ॥ तावद्राज्याश्रमे स्थित्वा कुलचर्यां समाच
र ॥ इति तया पितामह्या समाख्यातं निशम्य सः ॥ राहुलः सुप्रशान्तास्य स्तां प्रपश्यन्नेवमब्रवीत् ॥ पितामहि त्वयाप्यत्र भवे न दृश्यते कथं ॥ नानादुःखाभि
सर्वेषां मत्तुश्च पुरतः सदा ॥ एतद्दृष्ट्वात्र संसारे राज्याश्रमे समाश्रितः ॥ कुलचर्याव्रतं धृत्वा चरितुं न समुत्सहे ॥ सर्वासामपि चर्याणां चर्या हि सौगती वरा
॥ इति मत्वाहमप्येवं संचरितुं समुत्सहे ॥ इति मे त्र समुत्साहे माविघ्नं कर्तुमर्हसि ॥ तद्यदिच्छसि सद्धर्मे समनुज्ञां प्रदेहि मे ॥ इति पौत्रोदितं श्रुत्वा

भ.ड. गौतमी सा पितामही॥ तं पौत्रं राहुलं वीक्ष्य संपश्यंत्यैवमब्रवीत्॥ यदि तेस्ति समिच्छापि गच्छ पौत्र समाहितः॥ पितुः शरणमाश्रित्य संचरस्व सुसंवरं॥ तदुदं
तं समाकर्ण्य पितामहो नृपाधिपः॥ समुत्थाय मुनीन्द्रस्य प्राचरत्सहसाश्रमे॥ तत्र स नृपती राजा समंत्रिजनपौरिकः॥ उपेत्य साञ्जलिर्नत्वा श्रीघनमेवं
मब्रवीत्॥ भगवन्नयदयं बालः पौत्रो मे राज्यनिस्पृहः॥ प्रव्रज्यासंवरं धृत्वा संचरितुं समिच्छति॥ यद्ययं मम पौत्रोपि राज्यं मा संपरिग्रहं॥ भवच्छरणमा
श्रित्य प्रव्रजिष्यति सन्मतिः॥ तदा कोत्र भवेद्राजा पौत्रोन्यो मे न विद्यते॥ राजवंशसमुच्छिन्नो भवेन्नूनमिहाधुना॥ तदत्र विद्यते शास्तः प्रजासु यदि ते द ४२६
या॥ सुकुमारमिदं बाल्यं चारयमाधुनाव्रतं॥ इति पित्रोदितं श्रुत्वा सर्वज्ञोर्हन्मुनीश्वरः॥ जनकं तं महीपालं सम्पश्यन्नेवमादिशत्॥ अयं राजन्महा
सत्वश्चरमभविकः खलु॥ ममानुशासनं धृत्वा नूनं चरेत्सुसंवरं॥ तदत्र विघ्नतामस्य माकार्षीः सर्वथार्हसि॥ समनुज्ञां प्रदत्वास्य पूरयस्व मनोरथं॥
इति शास्तामुनीन्द्रेण समादिष्टं निशम्य सः॥ पिता राजा विस्मितास्यः पुनरेवमभाषत॥ भगवन्नस्मि मया किंचिद्धिकारं कृतं तदा॥ जानकर्मा

स्वर्ग १

दिसंस्कारमपिनैवाभिकारितं॥ यदिनूनमयंपुत्र त्वत्कौराज्यंविरागितः॥ नवशरणामाश्रित्य प्रव्रज्यासंवरंचरेत्॥ तदागमयसर्वज्ञ यावत्सपूर्णं विभो॥ज्ञा
तकर्मादिसंस्कारं कारयेयं यथाक्रमं॥ ततःसंप्रेषयिष्यामि नवात्रशरणे खलु॥ तदात्मजमिमंबालंसंचारयस्वसंवरं॥ यावत्तस्यात्मजोनैवजातो वंशसमृ
द्धिकृत॥ तावत्सहस्वसर्वज्ञमात्वंछिदनंकुरु॥ इतिसंप्रार्थितंराज्ञाश्रुत्वाससर्वविज्जिनः॥ तथेतिमौनमाधाय तदभ्रुवासवोधितः॥तदभिवासितंमत
त्वा नृपतिःसुप्रसादितः॥ भगवत्तंप्रणम्याशुस्वपुरंसमुपाचरत्॥ तत्रतंराहुलंपौत्रंसमामंत्र्यपितामहः॥ सर्वमेतत्प्रवृत्तांतंसमाख्यायेवमब्रवी
त्॥ यदिलेत्तिसमिच्छाहि प्रव्रज्यावृतचारणे॥ यदातवभवेत्पुत्र स्तदागमय मज्जिरात्॥ इतिपितामहाख्यातं श्रुत्वासराहुलस्तथा॥ गत्वदंभूत्
स्वलस्थौ विलम्बोमेभवेदिति॥ ततःपितामहोराजा पौत्रस्यतस्यसम्मतेः॥ ज्ञातकर्मादिसंस्कारमकारयद्यथाक्रमं॥ यशापमित्रस्वशाक्यस्य कन्यां
कमलेतिविश्रुतां॥ तस्मैविवाहयामास यथाविधिपुरोहितः॥ वंशार्थधारमत्सोपि कमलयासमन्तुकः॥ प्रव्रज्यासंवरंलिप्सुः कामव

भ८ गौन्दिर्नुन्नवः॥ सर्वज्ञस्यात्र भावेन गर्भे मा यत्नसातनः॥ उक्तत्वात्र नलाभाय राहुलं चोदयन्त्रिव॥ ज्ञात्वा तद्वृजमर्हन्नसचोदयामास भूपतिं॥ अन्यत्रगमनाकांक्षी
राहुलं प्रत वारतो॥ जनिष्यतियदा पौत्र प्रेक्षयिष्यामि सत्वरं॥ इति विज्ञापनां कृत्वा नरवर्थो दोलायमानसः॥ विलंबकारणोतस्य जिनस्य पृथिवीपतिः॥ घ
राणावघोषं सर्वत्र कारयामास चोदनं॥ भोभो पौरजनाः सर्वे श्रुयतां नृपतेर्वच॥ प्रव्राजयन्तु सर्वज्ञे अयारम्भानिजात्मजान्॥ येषां च बहवः सन्ति पुत्राः प्रव्रा
जयंतु ते॥ एकमेकं गृहे स्थाप्य वंशाभ्रश्रतिपालय॥ येषामेकैकपुत्रस्तु ते मा प्रव्राजयन्तु तं॥ माकर्त्तव्यं वंशछेद मित्याज्ञां नृपतेः कुरु॥ प्रत्यहं किंतु पश्चैव ४२७
ज्येष्ठानुक्रमतः क्रमात्॥ प्रव्राजयन्तु विधिवच्छासने जगदीपतेः॥ घराणा वघोषणां श्रुत्वा चतुर्वर्णाः प्ररोड्जवाः॥ कुमारा मोक्षलाभाय प्रव्रज्याव्रतमीक्षि
रे॥ अथ यद्युः कुमारास्ते मुदा प्रव्रजितं वने॥ आनयकेन प्रेर्यमाना शासनान्नितृ भूपतेः॥ भगवतः पुरो गत्वा कृत्वा प्रदक्षिणात्रयं॥ नत्वा पादाम्बुजेत स्य
प्रार्थयन्कृतमञ्जनं॥ भगवन्नाथ संबुद्ध भवच्छासनमाश्रिताः॥ प्रव्रज्याव्रतमाधाय च संचरितुं मुदागताः॥ कृपादृष्ट्यास मालोक्य प्रव्रज्यां दातुमर्हसि॥

समाधिधारणीविद्यामंत्रयोजयसर्ववित् ॥ इतिविज्ञापितंश्रुत्वाभगवान्करुणाकरः ॥ तेषांशिरस्सुसंस्पृश्यएहीत्युक्त्वाप्रदायहीत् ॥ एहीत्युक्तेतिनेन्द्रेणसर्वेतेमु
ण्डिताःशुभाः ॥ बभूवुस्त्रिचीवरीहस्ताकाषायचीवरावृताः ॥ पञ्चाभिज्ञपदंप्राप्ताजितेन्द्रियानिरंजनाः ॥ वंद्याःपूज्याःसदेवानांलोकानांचाभवन्क्षणात् ॥
एवंप्रतिदिनंपञ्चप्रेषिताआनयकेननते ॥ मुनीन्द्रस्याश्रमेगत्वाप्रव्रज्याव्रतमाचरन् ॥ शीघ्रमागमनेच्छापिज्येष्ठानुक्रमयोगतः ॥ सर्वांप्रव्राजितान्दृष्ट्वास
मुत्सुकाःसमाश्रिताः ॥ ब्रह्मक्षत्रियशूद्राश्चवैश्यासर्वेकुमारकाः ॥ यथानुक्रमतस्तत्रप्रव्रज्याव्रतमाश्रयन् ॥ वज्रोऽपिकारयामासप्रव्रज्याधारिणःक्र
मात् ॥ यथाविधिव्रतंधृत्वानिर्वाणपदगामिनः ॥ एवंकृत्वाप्रतिदिनंताश्चनान्व्रतधारिणः ॥ सद्धर्मोपदेशमाधायनिनायवत्सरंवसन् ॥ ततःश्रा
द्धेऽथसमयेप्रासूतदिव्यसुन्दरं ॥ कमलापत्रसत्वासाराजलक्षणमण्डितं ॥ अथशुद्धोदनोराजापौत्रात्मजंसमीक्ष्यसः ॥ विधिवत्कारयामासजात
कर्ममहोत्सवं ॥ त्रयोदशदिनेप्राप्तेनामकरणमुत्सवाः ॥ सकलानन्ददितिनाम्नातंचकारमुदितोनृपः ॥ राहुलोपिशुतंवीक्ष्यमुदमापपरांतथा ॥ यः

५६ प्रजेस्वस्वभारे त्वं तिष्ठ त्रिलोकपालने ॥ पौत्रं वीक्ष्य मुनीन्द्रोऽपि पाणिनानतच्छिरः स्पृशन् ॥ स्वामिषं प्रददौ तस्मै समनःकमभिपूरितं ॥ ततः पूजां प्रतिगृह्य नृपार्थितां
सपात्रकः ॥ सर्वैर्भिक्षुसहितो न्यग्रोधाराममाविशत् ॥ तत्र स्वाश्रममासीनः उत्रागमनत्सोत्सुकः ॥ भिक्षुसंघप्रभिस्तत्स्थौ संभाषयन् जगत् ॥ ततः
स राहुलः पौत्रः पितामहस्य भूपतेः ॥ आज्ञां पदेन त्वा संप्रास्थित स्ततोचरत् ॥ ततः समुदितो गत्वा सहसा पितुराश्रमे ॥ पादाब्जे प्रणतिं कृत्वा साश्रु
लोचनः आविशत् ॥ एवं दृष्ट्वा स सर्वज्ञः प्रव्रजितुं मुदागतं ॥ पाणिनानतच्छिरः स्पृष्ट्वा समुपश्यन्नेवमादिशत् ॥ एहि वत्स महाभाग संबोधिज्ञानसाधनं ॥ ४२८
ब्रह्मचर्यासंवरं धृत्वा संचरस्व समाहितः ॥ इत्यादिश्य मुनीन्द्रोऽसौ शालीपुत्रं महामतिं ॥ मौद्गल्यं च समामंत्र्य समुपश्यन्नेवमादिशत् ॥ युवामिमं महासत्वं रा
हुलं मम नन्दनं ॥ प्रव्रज्या संवरं दत्वा चारयतां यथाविधि ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा शालीसुतो यतिः ॥ मौद्गल्यश्च समामंत्र्य राहुलमेवमूर्त्वतु ॥ एहि
वत्स यदीच्छा ते संबोधिसाधनव्रते ॥ इन्द्रियारीन् विनिर्जित्य संचरस्व समाहितः ॥ इति ताभ्यां समादिष्टं निशम्य राहुलो मुदा ॥ तौ यतीसन्मती नत्वा सो

अलिरेवमब्रवीत्॥ भदन्ताहमिच्छामि संबोधिसाधनं व्रतं॥ तद्भवन्तौ प्रदत्तां मे सुसंवरं यथाविधिः॥ इति तत्प्रार्थितं श्रुत्वा शालीपुत्रः प्रसादितः॥ मौद्ग
ल्यश्च समालोक्य राहुलमेवमूचतुः॥ शृणु वत्स समाधाय प्रव्रज्याचरणो विधिः॥ आदौ तावत्त्वया शास्त्रा त्रिरत्नशरणं कुरु॥ विरम्य दशपापेभ्यः शुद्ध
शीलः समाचर॥ आमिषभोजने रागं मा कुरुष्व कदाचन॥ कामक्लेशालये चापि मानसं माभिचारय॥ दुष्टसंगानुरागं च त्यक्त्वा संमोहितेन्द्रियः॥ अवि
शीलो विशुद्धात्मा निःसंगो बोधिमानसः॥ शिक्षापदं समादाय चतुर्ब्रह्म समाहितः॥ भवाभिरतिसंस्कारं त्यक्त्वाचर निरञ्जनः॥ श्रुत्वानुशासनं शास्तुः स
बोद्धव्यः समाहितः॥ शरणो समुपाश्रित्य संचरस्वानुमोदितः॥ एतच्छिक्षापदं धृत्वा संचरितुं यदीच्छसि॥ तदाभ्यां दास्यते तुभ्यं संवरं बोधिसाधनं॥ इति तत्स
मुपादिष्टं निशम्य राहुलो मुदा॥ तौ भदन्तौ यतीन्द्रौ नत्वा साञ्जलिश्चैवमब्रवीत्॥ भदन्तौ भवतां यावज्जीवमहं समुपाश्रितः॥ कामक्लेशानुरागं च न करिष्याम्य
हं सदा॥ दुष्टसंगानुरागं च त्यक्त्वाभिनिर्जितेन्द्रियः॥ निःसंगः सुप्रशान्तात्मा संचरिष्ये निरञ्जनः॥ शिक्षापदं समादाय सुसमाहितमानसः॥ संबुद्धशरणो

स्थित्वासंचरिष्येसुसंवरे॥ इतिसत्यंमयाख्यातं श्रुत्वाछाससकोगुरुः॥ प्रव्रज्यासंवरंमह्यंसंप्रदातुंसमर्हथ॥ इतिसंप्रार्थितैतेन राहुलेनमुदान्विधा॥ तौयती
सन्मतौप्राज्ञौ राहुलमेवमूचतुः॥ यद्येवंतेसमिच्छास्ति संबोधिसाधनेव्रते॥ संचरस्वसमाधाय दास्यावस्तिसुसंवरं॥ इत्युक्त्वा तौयतीशानौ राहुलंतंमहाम
तिं॥ प्रव्रज्यासंवरे बौद्धे संचारयितुमैछतां॥ ततोमौद्गल्यआलोक्य राहुलस्यशिरोरुहान्॥ अवतार्यशिरस्तस्य मुण्डितंसमशोभयत्॥ ततः शारिपु
त्रस्तस्य राहुलस्ययथाविधिः॥ दत्वाशिक्षापदंचित्तं विशुद्धं प्रात्यनन्दयत्॥ ततः पात्रंशलाकंच दत्वाकाषायचीवरं॥ राहुलंतंसुभद्रांगंचक्रतुः सौग ४२९
तंयतिं॥ ततः सराहुलोभद्रः काषायचीवराछ्वन्नः॥ धृत्वापात्रशलाकंच ब्रह्मचर्यं समाचरत्॥ ततस्तंयतिमात्मजं मौद्गल्यशारिनन्दनौ॥ गृहीत्वा
संप्रतिष्ठाप्य त्रशासने च शिक्षतां॥ ततःसयतिरात्मजः सर्वशिक्षापदंदधत्॥ सर्वसमाधिविद्याज्ञं प्राज्ञोर्हत्वं समाययौ॥ ततोर्हन्तंसमादाय शास्तारौ
तौयतीगुरू॥ गत्वाशाक्यमुनीन्द्रस्यप्राभिजग्मतुराश्रमे॥ तत्रतौसमुपाश्रित्य भगवतः पदाम्बुजे॥ प्रणाम्यैतत्सुतं तातं निवेश्यतस्थतुः पुरः॥ तथा

सराहुलोप्यर्हं भगवतः पदं बुजे॥ प्रणत्वा समुपाश्रित्य तस्थौ समभिनन्दितः॥ तत्र वृत्तिं समाकर्ण्य शुद्धोदनः पितामहः॥ विस्मितस्तं महासत्वं मर्हन्तं
शुभे छत्॥ ततः सनृपतीराजा सर्मत्रिजनबांधवः॥ महोत्साहैर्ध्वनीन्द्रस्य तत्राश्रमे मुदाचरत्॥ तत्रपीत्वं तमर्हन्तं संबुद्धं समुपाश्रितं॥ समीक्ष्य सुप्रशान्तात्मा सं
पश्यन्समुपासरत्॥ तत्र तं त्रिजगन्नाथं भगवन्तं मुनीश्वरं॥ सर्वसंघं तमर्हन्तं वन्दित्वा समुपाश्रयत्॥ तच्छ्रुत्वा गोतमी चापि पितामही यशोधरा॥ मातांतः
पुरिकाः सर्वास्तं द्रष्टुं समुपाचरन्॥ तत्र तं यतिमर्हन्तं काषायचीवरावृतं॥ दृष्ट्वा ता विस्मिताः सर्वास्तत्राथ समुपाचरेत्॥ तत्र तं समुपासीनं वामपार्श्वे जगद्गुरोः॥
समीक्ष्य विस्मयापन्नमानसाः समुपाचरन्॥ तत्र तं श्रीघनं नत्वा तं च सर्वान्यतीनपि॥ एकान्ते समुपासत्य तस्थुः सर्वेपि ते मुदा॥ तथा सर्वेपि वैश्याश्च गृहस्था
श्च महाजनाः॥ वणिजः सार्थवाहश्च शिल्पिनः पौरिका अपि॥ सर्वे जानपदाश्चापि तथान्यदेशवासिनः॥ तत्र सर्वेपि ते लोकाः समुपेत्य मुनीश्वरं॥ तमर्हन्तं
यतीन्सर्वान्प्रणत्वैकान्तमाश्रयन्॥ तत्र तान्समुपासीनान्सर्वान्दृष्ट्वा मुनीश्वरः॥ आर्यसत्यं समारभ्य सद्धर्मं समुपादिशत्॥ ततः सर्वेपि ते लोकाः संबु

४८. ॐ मर्हत्यवीन्॥ सर्वांतं च महर्षिभिर्जनतास्वस्वालयं ययुः॥ ततो यशोधरमाता सर्वान्तत्र शिरोरुहान्॥ प्रार्थयित्वा मुनीन्द्रस्य लब्धानुज्ञां समादधौ॥ तान्सर्वान्सा समादा
य गौतमीयाद् मोदिता॥ सर्वान् तः पुरिकाः श्वश्रूः पादौ नत्वालयं ययुः॥ तत्र यशोधराराज्ञः श्वशुरस्याज्ञ मोदिनः॥ लब्धानुज्ञां शिलाचैत्यं पुत्रस्य कर्तुमैच्छत॥ त
त्र सा नः पुरे तस्य नन्दनस्य शिरोरुहान्॥ सर्वान्नगर्भे प्रतिष्ठाप्य महच्चैत्यमकारयत्॥ ततः सा तन्महच्चैत्यं प्रतिष्ठाप्य यथाविधिः॥ नित्यं तं समुपाश्रित्य स
म्यक्त्वं तदाभजत्॥ ततोऽनुज्ञां समासाद्य श्वशुरस्य यशोधरा॥ संघमुख्यं सर्वसंघं भूयो न्यमंत्रयत्॥ तदधिवासितं ज्ञात्वा मत्वा यशोधरा मुदा॥ ४३०
ऽर्हत्पूजोपयोग्यसामग्रीसुपरां तामसाधयत्॥ ततः सा समये प्राप्ते भगवन्तं ससांघिकं॥ इति ताभ्यागमं तत्र प्रार्थयामास सादरं॥ ततस्तत्प्रार्थितं श्रुत्वा
भगवोस्त्र प्रभासयत्॥ आत्मजं तं पुरोधाय प्राचरन्त्सांघिकान्वितः॥ तत्र मार्गे समालोक्य सर्वान्सत्वान्विशोधयन्॥ क्रमेणापुचरन्त्तत्र नगरे समुपाय
यौ॥ तत्रात्मजं पुरोधाय भगवन्तं समागतं॥ सर्वे लोकाः समालोक्य प्रणत्वा संप्रसादिताः॥ एवं समीक्ष्यमाणोऽभिवन्द्यमानः प्रसादितैः॥ सर्वलोकैः

उपसन्नः स्वात्मपुरउपाविशत्॥ तत्रपार्श्वंसमादाय संबुद्धआत्मजान्वितः॥ अग्रासनेसमाश्रित्यतस्थौसमभिभासयन्॥ सर्वेपिसांघिकाःपार्श्वंस मासा
ययथाक्रमं॥ स्वस्वासनेसमाश्रित्यसंतस्थिरे समाहिताः॥ तत्रासनसमासीनान्संबुद्धप्रमुखान्यतीन्॥ सर्वान्स्वात्मजं तंच समीक्ष्यसंप्रसादिताः॥ यथा
क्रमंसमभ्यर्च्यदिव्यास्वादरसोत्तमैः॥ यथार्हभोजनैःसर्वान्संघान्समतर्पयत्॥ तान्सर्वानभिसंतुष्टान्संबुद्धादीन्यतीश्वरान्॥ यशोधरासमालोक्य स
वधूकात्यनन्दयत्॥ ततोपनीयपात्राणिसर्वेषांयोगिनामपि॥ हस्तादीन्शोधयित्वान्ते भूमिंचसमशोधयत्॥ ततःसानन्दितामाताराहुलभद्रमात्मजं॥
उत्संगेसंप्रतिष्ठाप्य नीचासनउपाश्रयत्॥ तथासमीक्ष्यतंपौत्रं गौतमीचाभिनन्दिता॥ धर्मंश्रोतुंसमीच्छन्ती तदन्तिकंसमाश्रयत्॥ तथान्तःपुरिकाश्चा
पिसर्वाःसमनुमोदिताः॥ नीचासनसमाश्रित्यसंनिषेदुःसमाहिताः॥ तत्रताःसमुपासीनाःसर्वाःसमीक्ष्य सर्ववित्॥ बोधिचर्यांसमारभ्य सद्धर्मंसमुपा
दिशत्॥ तत्सद्धर्मामृतंपीत्वा सर्वायशोधरादयः॥ सदाबोधिव्रतंधृत्वा संचरितुंसमीच्छिरे॥ ततस्ताभ्यांजगच्छास्तादत्वाभद्रजयाशिषं॥ तमात्मजंप

भद्र. रोधायवनौ व्रजन्स सांघिकः॥ एवं वनं समालोक्य भगवन्तं ससांघिकं॥ सर्वलोकाः प्रासीनाववन्दिरेभिनन्दिताः॥ एवं स भगवान्सर्वैः स्तूयमानोभिनन्दितः॥
गत्वा स्वाश्रममाश्रित्य तस्थौ धर्मं समादिशन्॥ तदन्येद्युस्तथा तत्र गौतमी चानुमोदिता॥ तं मुनीन्द्रं ससंघन्तं समामंत्र्य समानयत्॥ तत्र पार्श्वं समादाय भगवान्सह
सांघिकः॥ शुद्धासने समाश्रित्य तस्थौ समभिभासयन्॥ तथासने समासीनं भगवन्तं ससांघिकं॥ दृष्ट्वा मुदा समभ्यर्च्य भोजनैः समतोषयत्॥ सर्वास्तान्त्रिप्तिसंतुष्टा
न्दृष्ट्वा सा गौतमी मुदा॥ ततोपनीय पात्राणि हस्तादीन्स मशोधयत्॥ ततः सा गौतमी माता भगवन्तं मुनीश्वरं॥ ससांघिकं समालोक्य नीचासनमुपाश्रयत्॥ तां
दृष्ट्वा समुपासीनां सर्वज्ञो भगवाञ्जिनः॥ आदिमध्यान्तकल्याणं सद्धर्मं समुपादिशत्॥ ततः स भगवान्ताभ्यो दत्वारोग्यशिवाशिषं॥ गत्वाश्रमे समाश्रित्य तत्र ४३१
स्थौ संघसमन्वितः॥ एवं स राहुलो भद्रो यतिरर्हन्महामतिः॥ ब्रह्मचारी विशुद्धात्मा सर्वलोकाभिवन्दितः॥ ग्रामकुलेषु सर्वेषु भिक्षार्थी निर्मलेन्द्रियः॥ सर्व
लोकमनोहर्त्ता समाचरन्समाहितः॥ तं दृष्ट्वा समुपायातं सर्वे शाक्याः प्रसादिताः॥ सादरं समुपामंत्र्य शुद्धासनेन्यवेशयत्॥ तत्राश्रमे समाश्रित्य राहु

लोर्हन्स सन्मतिः ॥ सुदृष्ट्वा तान्समालोक्य सर्वाञ्छ्राद्धान्व्यनोदयत् ॥ तमर्हन्तं समालोक्य सर्वे श्राद्धा विनोदिताः ॥ समभ्यर्च्य प्रणीतेन भोग्येन समतोषयन् ॥
ततः सोर्हन्यतिस्तेभ्यः सर्वेभ्योपि प्रसादितः ॥ भद्रारोग्याशिषं दत्वा तत्र निजाश्रये ययौ ॥ तत्रासनमुपासन्य समाधिसुस्थितेन्द्रियः ॥ सर्वसत्वहिताकां
क्षी तस्थौ ध्यात्वा समाहितः ॥ एवं सोर्हन्यतिर्भिक्षुर्भिक्षार्थमभिनन्दयन् ॥ कुलेकुलेपि सर्वत्र प्रचचार समाहितः ॥ तमर्हन्तं समालोक्य सर्वलोकाः प्रसादिताः ॥
समामन्त्र्य समभ्यर्च्य भिक्षां दत्वात्यमानयत् ॥ एवं सोऽर्हन्महाभिज्ञः सर्वलोकाभिवन्दितः ॥ मानितः पूज्यमानोपि सर्वत्रापि समाचरत् ॥ एवं स राहुलो
भद्रो बाल्योप्यर्हन्यतिः कृती ॥ ब्रह्मचारी महाभिज्ञः सर्वबोधिधर्मभृद्बभौ ॥ ॥ इति श्रीभद्रकल्पावदाने सकलानन्दजन्म राहुलभद्र प्रव्र
ज्याब्रह्मचारणो नाम सप्तत्रिंशतितमोध्यायः ॥ शुभ ॥ ॥ ॥ अथैकस्मिन्दिने भिक्षु राहुलभद्र आत्मवित् ॥ पितुरावास
मासाद्य भिक्षार्थी नगरे चरेत् ॥ तत्र संचरन्सर्वैः स्तूयमानोभिवन्दितः ॥ वीक्ष्यमाणः सुभद्राशो राजकुलमप्यचरत् ॥ तं यतिं समुपायान्तं राहुलभद्र

भद्र

मात्मजं॥ माता यशोधरा श्रुत्वा द्रष्टुं तत्र मुदाचरत्॥ तमात्मजं यतिं दृष्ट्वा जननी साश्रुलोचना॥ वहिर्गत्वा समाश्लिष्य स्वान्तःपुरमुदानयत्॥ तत्र पाद्यं मुदा दत्वा
संस्थाप्य बोधितासने॥ अभ्यर्च्य षड्रसैर्भोज्यैः प्रणीतैः समतोषयत्॥ ततस्तमात्मजं भिक्षुं दृष्ट्वा माता यशोधरा॥ तत्सद्धर्मामृतं पातुं तत्राश्रमे समाश्र
यत्॥ तथोपमातरश्चापि सर्वाः सखीजना अपि॥ तस्य धर्मामृतं पातुं नीचासने समाश्रयत्॥ तं पौत्रं यतिमर्हन्तं गौतमी च पितामही॥ संद्रष्टुं समुपा
याता सखीजनसमन्विता॥ तत्र तं यतिमात्मजं समीक्ष्य सापि तामही॥ साश्रुनेत्राभिपश्यन्ती धर्मं श्रोतुमुपाश्रयत्॥ ताः सर्वाः समुपासीनाः दृष्ट्वा
सोऽर्हन्महामतिः॥ आर्यसत्यं समारभ्य सद्धर्मं समपादिशत्॥ ततः सद्धर्मामृतं पीत्वा गौतमी समबोधिता॥ यशोधरा च ताः सर्वास्तथोपमातृका अपि ४३१
॥ त्रिरत्नशरणं गत्वा भद्रश्रीबोधिसाधनं॥ प्रव्रज्यासंवरं धृत्वा संचरितुं समीच्छिरे॥ ताः सर्वा राहुलो मत्वा प्रव्रज्याव्रतवाञ्छिनीः॥ मातरं तां समा
लोक्य तस्थौ निश्चलितेन्द्रियः॥ तमेवं संस्थितं दृष्ट्वा जननी सानुरागिता॥ गलदश्रुभिलिप्तास्या तस्थौ संमोहिताशया॥ तामभिमोहितां अम्बां दृष्ट्वा

त्मजः स राहुलः ॥ सहसा पाणिना मूर्ध्नि संस्पृष्ट्वा समबोधयत् ॥ ततः सा जननी वीक्ष्य तमात्मजं पतिं चिरात् ॥ यानैरश्रुविरूक्षाक्षा सम्पश्यन्त्येवम
ब्रवीत् ॥ अयि पुत्र यतेऽन्यत्र भिक्षार्थं माचर क्वचित् ॥ सदात्रैव समागत्य भुक्त्वा धर्ममुपादिश ॥ मयार्हन्नपि भिक्षुस्त्वं त्यक्तुं नैवात्र शक्यसे ॥ नि
त्यं संदर्शनं दत्त्वा मनो मे संविनोदय ॥ इति मात्रोदितं श्रुत्वा यतिरर्हन्स राहुलः ॥ मातरं तां समालोक्य सुदृशो वम भाषत ॥ यदि वांछास्ति ते मातर्म
म संदर्शने सदा ॥ प्रव्रज्यासंवरं धृत्वा संचर स्वमया सह ॥ इत्यात्मजसमाख्यातं श्रुत्वा सा जननी तथा ॥ प्रव्रज्याव्रतमादाय संचरितुं समैच्छत ॥ त
तः सोऽर्हन्महाभिज्ञो मात्रे दत्त्वा शुभाशिषं ॥ गौतम्यै च तथा ताभ्यः सर्वाभ्योऽपि प्रसादितः ॥ समुत्थित समुड्डीय गरुड्व द्विहाय सा ॥ तत्र शाक्यमु
नीन्द्रस्य गत्वाश्रमे समाश्रयत् ॥ एतत्सर्वप्रवृत्तान्तं शास्तुरग्रे समाश्रितः ॥ निवेदित्वा प्रणत्वा त्वा तस्थौ समभिनन्दितः ॥ तच्छ्रुत्वा स मुनीन्द्रो
ऽसौ समनुपरिवोधितः ॥ तमा त्मजं यतिं पश्यन्नास्थौ विधुरिवोज्ज्वलन् ॥ ततस्तस्यार्हतो माता यशोधरा जगाम गता ॥ प्रव्रज्याव्रतमादा

भद्र. यसंचरितुंसमैच्छत ॥ ततोयशोधरासास्वधर्मश्रीग्रहणवांछिनी ॥ गौतमींभद्रिकांश्वश्रूं समामंत्र्यैवमब्रवीत् ॥ मातरहं त्रिरत्नानां शरणं समुपाश्रिता ॥ प्रव्रज्या
व्रतमादाय संचरितुं समुत्सहे ॥ तद्भवतीप्रदत्वामेनुज्ञां सद्धर्मसाधने ॥ समभिवांछितंचित्तं संमोदयितुमर्हति ॥ इतितत्प्रार्थितंश्रुत्वा गौतमी सानुमो
दिता ॥ यशोधरांस्नुषांतांच पश्यन्त्येवमभाषत ॥ भद्रेत्वंयदि ते वांछा सद्धर्मव्रतसाधने ॥ अहमपित्वयासार्धं तथाचरितुमुत्सहे ॥ इतितदुक्तमाकर्
र्ण्य यशोधरातिमोदिता ॥ भूयस्तांगौतमींश्वश्रूं सम्पश्यन्त्येवमब्रवीत् ॥ यदिवांछास्तितेमातः सद्धर्मव्रतसाधने ॥ आवामपिचरिष्यामः संबुद्ध ४३२
शासनेव्रतं ॥ इतितत्संमतंकृत्वा गौतमीसानुमोदिता ॥ भर्तूराज्ञः पुरोनुज्ञां संप्रार्थितुमुपाचरत् ॥ ततसास्वामिनोराज्ञः पादौनत्वापुरस्थिता
साञ्जलिः सुप्रसन्नास्यासम्पश्यन्त्येवमब्रवीत् ॥ स्वामिन्देवमहाराज यत्समिच्छामिसांप्रतं ॥ तद्भवानभिलाषंमे संपूरयितुमर्हति ॥ इति
तत्प्रार्थितंश्रुत्वा भर्ताशुद्धोदनोनृपः ॥ गौतमींतांप्रियांभार्यां सम्पश्यन्नेवमादिशत् ॥ यत्समिच्छसिभद्रेत्वं तत्समाख्याहिमेपुरा

॥ सर्वं संपूरयिष्यामि नवाभिवाञ्छितं ध्रुवं ॥ इति भर्त्रा समादिष्टं गोतमी सा प्रमोदिता ॥ स्वामिनं तं महाराजं संपश्यन्त्यैवमब्रवीत् ॥ स्वामिन् यद्यभि
लाषं मे नूनं संपूरयेद् भवान् ॥ इहास्माकं सदा भद्रं निरुत्पातं भवेदपि ॥ शुभोत्साहं सुखं भुक्त्वा यास्यामहे सुनिर्वृतिं ॥ इति सत्यं परिज्ञाय त्रिरत्नशरणा
श्रिता ॥ बोधिचर्याव्रतं धृत्वा संचरितुं समुत्सहे ॥ इत्यत्र मां प्रदत्त्वा मे सद्धर्मव्रतसाधने ॥ समभिलषितं चित्तं संमोदयितुमर्हति ॥ इति तत्प्रार्थितं श्रुत्वा
स्वामी शुद्धोदनो नृपः ॥ गोतमीं तां प्रियां भार्यां संपश्यन्नेवमादिशत् ॥ अयि त्वं मां कथं हित्वा त्रिरत्नशरणं गता ॥ प्रव्रज्यासंवरं धृत्वा संचरि
तुमिहेच्छसि ॥ यदि पुण्योपस्थिते वाञ्छा दत्त्वा दानं यथेप्सितं ॥ त्रिरत्नभजनं कृत्वा चर स्वोपासकव्रतं ॥ इति भर्त्रा समादिष्टं श्रुत्वा सा गोतमी प्रिया ॥
स्वामिनं तं च भूमीन्द्रं संपश्यन्त्यैवमब्रवीत् ॥ स्वामिन्नाहमिहैवं वाञ्छा क्लेशाभिव्याकुले भवे ॥ तत्प्रव्रज्याव्रतं धृत्वा निर्वृतिं गन्तुमुत्सहे ॥ किं चाहं ज
रसाक्रान्ता वृद्धोदुर्वलितेन्द्रिया ॥ अवश्यं मृत्युनाघ्राय ग्रसिष्ये भवतः पुरः ॥ तदा भवान् महीन्द्रोऽपि रक्षितुं मां न शक्नुयात् ॥ सर्वेषामपि जन्तूनां

भद्र

भाविभावानवेदपि॥ इतिमत्वामहाराज चिरत्नयरणाश्रितः॥ बौद्धचर्याव्रतंधृत्वासंचरितुमिहोत्सहे॥ येहिबौद्धव्रतंधृत्वा संचरन्तेसमाहिताः॥ दुर्गतिंते
नगच्छंतिसत्पसंयान्तिसद्गतिं॥ नचतेशुभगाःप्राज्ञा भद्रश्रीसद्गुणाश्रया॥ बोधिसत्वामहासत्वाःप्रकुर्वन्तोजगद्धितं॥ क्रमेणबोधिसंभारं पूरयित्वाशुभा[?]
श्रयाः॥ अर्हन्तःप्राप्यसंबोधिं संबुद्धपदमाप्नुयुः॥ इत्यादिष्टंमुनीन्द्रेणाश्रुतंमयात्वयापि हि॥ एवंमत्वामहाराज समिच्छामिसुसंवरं॥ नृपश्रीद्वि
घ्नेंनस्वामिन्रुष्टायांमयितेदया॥ समनुज्ञांप्रदत्वामे वांछितं परिपूरय॥ इतितत्प्रार्थितंश्रुत्वा भर्त्ताशुद्धोदनोनृपः॥ संपश्यंतांप्रियांभार्यांमनसै
वंव्यचिंतयत्॥ अत्राहंकिंकरिष्यामियदीयंमेप्रियासती॥ प्रव्रज्याव्रतसंचारमिच्छतिमय्यपिजीविते॥ यदिनदास्यतेनुज्ञामयास्यैव्रतसाधने॥ नू ४३४
नंमत्पाविषीदन्ती मृत्युंवापिव्रजेदिह॥ किंचापीयंजराक्रान्ता प्रवृद्धादुर्वलेन्द्रिया॥ अतःकियंतिवर्षाणिजीवेदिहभवेऽस्थिरे॥ अहमपिजराक्रान्तः
प्रवृद्धोदुर्वलेन्द्रियः॥ अतःकियन्तिवर्षाणिजीवेयंकस्मात्मयः॥ इत्यनुज्ञांप्रदत्वास्याभार्यायाःपुरापसाधने॥ मनोभिवांछितंसिद्धंकारयेय

महं ध्रुवं ॥ यद्दियं निश्चलस्वान्ता शुद्धशीलसमाहिता ॥ त्रिरत्नशरणं कृत्वा संचरते सुसंवरं ॥ एतत्सुराणाभिशुद्धेयं परिशुद्ध त्रिमण्डला ॥ अर्हज्जीशा
प्यसंबोधिसंबुद्धपदमाशुयात् ॥ इतिमत्वा सभूमीन्द्रो भर्त्ताशुद्धोदनो नृपः ॥ गौतमीं तां सतीं भार्यां संपश्यन्त्रेव मादिशत् ॥ यदि भद्रे क्षिते वांछा संबु
द्धधर्मसाधने ॥ शुद्धशीला समाधाय संबुद्धशरणे स्थिता ॥ त्रिरत्नभजनं कृत्वा निर्विकल्पा समाहिता ॥ सर्वसत्वहितं कृत्वा संचरस्व सुसंवरं ॥
इति भर्त्रात्यनुज्ञातं श्रुत्वा सा गौतमी मुदा ॥ सुप्रसन्नमुखाम्भोजा तथेति प्रात्यनन्दत ॥ ततः सा गौतमी भूयो नत्वा भर्त्तुः पदांबुजे ॥ साञ्जलिः समुपा
श्रित्य संपश्यन्त्येवमब्रवीत् ॥ स्वामिन् यशोधरा सापि संबुद्धशरणाश्रिता ॥ प्रव्रज्यासंवरं धृत्वा संचरितुं समिच्छति ॥ नृदस्या अपि राजेन्द्र सद्ध
र्मसुखसाधने ॥ दत्वानुज्ञां मनोवांछां संपूरयितुमर्हति ॥ इति तत्प्रार्थितं श्रुत्वा नृपतिः सोनुमोदितः ॥ गौतमीं तां सतीं भार्यां संपश्यन्त्रेव मादिश
त् ॥ यद्यस्या अपि वांछास्ति संबुद्धधर्मसाधने ॥ त्रिरत्नशरणे स्थित्वा चरतु सा सुसंवरं ॥ इति भर्त्रात्यनुज्ञातं श्रुत्वा सा गौतमी मुदा ॥ तथा

भ८. हीतिप्रतिज्ञाय प्रात्यनस्त्वबोधिता ॥ ततः सा गौतमी भर्तुः प्राप्याज्ञां प्रमोदिता ॥ प्रगत्वा चरणाम्भोजे यशोधरालये चरत् ॥ तत्र सा समुपागत्य यशो
धरां स्नुषां सतीं ॥ सुप्रशान्तमुखाम्भोजां संपश्यन्त्येवमब्रवीत् ॥ यशोधरे प्रसीदस्व यत्र रत्नोऽनुमोदितः ॥ समनुज्ञां ददात्येव मा वाभ्यां व्रतसाधने ॥
अतः साधु समागच्छ गत्वा संबुद्धशासने ॥ त्रिरत्नशरणे स्थित्वा चरिष्यावस्तु संवरं ॥ इति मात्रा समाख्यातं निशम्य सा यशोधरा ॥ समभिनन्दिता
तीव गौतमीमेवमब्रवीत् ॥ मातः संसिध्यते वांछा मम सद्धर्मसाधने ॥ तदेहि प्रगमिष्यावः संबुद्धशरणोऽधुना ॥ इत्युक्त्वा सुप्रशान्त्रा सा दत्वार्थि
भ्योयथेप्सितं ॥ ततः संप्रस्थिता गन्तुं संबुद्धशरणे सरत् ॥ तां तथा संप्रस्थितां दृष्ट्वा गौतमी सानुमोदिता ॥ कृत्वा दानं समर्थिभ्यो गृहात्संप्रस्थिताव ४३५
रत् ॥ सस्नुषां प्रस्थितं दृष्ट्वा सर्वा अन्तःपुराश्रिताः ॥ रामा अप्यनुमोदन्त्य सत्वथात्र संप्रतस्थिरे ॥ एवं ताः सकलाः कान्ता यशोधरा दयान्विता ॥ गौतमी पुर
तः कृत्वा संप्रस्थिताः प्रचेरिरे ॥ ता एवं प्रस्थिता वीक्ष्य सर्वे लोकाः पुराश्रिताः ॥ विस्मयाकुलितस्वान्ताः स्तम्भिता इव तस्थिरे ॥ एवं संवीक्ष्यमाना

स्ताः सर्वैर्लोकैः सविस्मयैः ॥ गौतमीप्रमुखाः सर्वाः प्राब्रह्मर्यमाचरन् ॥ तत्रमार्गेसमायाताः सर्वास्ताः संप्रसादिताः ॥ सर्वेसत्त्वाः समालोक्य विस्मयं
समुपाययुः ॥ एवं समीक्ष्यमानास्ताः सर्वैर्देवासुरैरपि ॥ संचरन्त्योमुदातत्रखद्राश्रममुपाचरन् ॥ ताः सर्वाःसमुपायाताः समीक्ष्यभगवाञ्जिनः ॥ ध्यात्वा
संभासयंस्ततस्थौ ध्यानवरोन्नु संप्रभः ॥ तमेवं संस्थितं दृष्ट्वा दूरात्ताः सकलाअपि ॥ सुप्रशान्ताशयानत्वा तत्राशु समुपासरन् ॥ ततस्ताःसमुपासृत्य भगव
न्तंयथाक्रमं ॥ समभ्यर्च्याभिवन्दित्वा सर्वाःसमभितास्थिरे ॥ ताः सर्वाः समुपासीनाः समीक्ष्यभगवाञ्जिनः ॥ बोधिचर्यांसमारभ्य सद्धर्मंसमुपादिशत् ॥
तत्सद्धर्मामृतंपीत्वा सर्वास्ताः संप्रबोधिताः ॥ बोधिचर्याव्रतंधृत्वा संचरितुं समीछिरे ॥ तत्रसागौतमीमाता समुत्थाय कृताञ्जलिः ॥ भगवन्तंसमालो
क्य प्रणत्वैवमभाषत ॥ भगवन्नाथ सर्वज्ञ यदहं सुरसान्विता ॥ तद्भवच्छरणास्थित्वा व्रतंचरितुमुत्सहे ॥ एषायशोधरा चापि भवतः शरणाश्रिता ॥
विरलभजनंकृत्वाव्रतंचरितुमिच्छति ॥ तदावांभगवान्पक्षन्समन्वाहृत्यशासने ॥ प्रव्रज्यासंवरंदत्वा संचारयितुमर्हति ॥ इतितत्प्रार्थितंश्रुत्वा

भद्र संबुद्धोऽर्हन्नु स्वपाणिना ॥ दक्षिणेन शिरस्तस्याः संस्पृष्ट्वैवं समादिशत् ॥ एहि मातः समाधाय त्रिरत्नशरणाश्रिता ॥ ममानुशासनं धृत्वा संचर स्व
सुसंवरं ॥ इत्यादिष्टं मुनीन्द्रेण गौतमी प्रणिताभवत् ॥ खिक्खिरी पात्रभृद्धस्ता काषायचीवरावृता ॥ ततः साभूत्सुभद्राङ्गा परिशुद्धविमराउलासमा
धिधारिणी विद्यासमाहितसमुद्यता ॥ अर्हन्ती सद्गुणाधारा सन्मतिर्ब्रह्मचारिणी ॥ सर्वलोकाभिवंद्याश्च मान्या पूज्याच सर्वतः ॥ ततस्तां यतिमर्हन्तीं भि
क्षुणीं ब्रह्मचारिणीं ॥ दृष्ट्वायशोधराप्यागत्य नत्वा पादावुपाश्रयत् ॥ एवं तां समुपायातां दृष्ट्वा शास्ता स्वपाणिना ॥ दक्षिणेन शिरस्तस्याः संस्पृष्टे ४३६
वं समादिशत् ॥ समेहि भद्रिके साध्वि शास्तुर्धृत्वानुशासनं ॥ त्रिरत्नशरणे स्थित्वा संचर स्वसुसंवरं ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा यशोधरा
मुदा ॥ सुप्रसन्नाशयानस्यां गौतम्याः समुपासरत् ॥ तां दृष्ट्वा समुपायातां गौतमी संस्मितानना ॥ सादरं समुपामंत्र्य संपश्यन्त्येवमादिशत् ॥ समेहि भद्रिके शास्तुः
शरणे समुपस्थिता ॥ त्रिरत्नभजनं कृत्वा संचर स्वसुसंवरं ॥ इति मात्रा समादिष्टे प्रणिताभूद्यशोधरा ॥ खिक्खिरी पात्रविभ्राणा काषायचीवरावृता ॥

समाधिधारणीविद्यासमाहितसमुद्यता॥ शुद्धशीलासमापन्ना परिशुद्धत्रिमण्डला॥ निर्विकल्पाशुभद्रांग्या स्वर्हन्तीब्रह्मचारिणी॥ सर्वेषामपि वंश्याभूत्मा
न्यापूज्या समन्ततः॥ तामर्हन्तीं शुभद्रांग्यां भिक्षुणीं ब्रह्मचारिणीं॥ दृष्ट्वान्तःपुरिकाः सर्वास्ता अपि व्रतमीछिरे॥ ततस्ताः सकलाः कान्ता गौतम्याश्चरणांबु
जे॥ नत्वा यशोधरायाश्च संप्रश्रप्य न्युपाश्रयन्॥ ताः सर्वाः समुपासीनाः समीक्ष्य गौतमी मुदा॥ तासां शिरस्तु संस्पृष्ट्वा प्रव्रज्यायां समग्रहीत्॥ तास्स
र्वास्तु मुण्डिता पात्रविधारणाचीवरावृताः॥ निर्विकल्पाशुभद्रांग्या व भूखभैक्षगाधुवं॥ एवं ताः सकलाः कान्ता त्रिरत्नशरणाश्रिताः॥ बोधिचर्याव्रतं धृ
त्वा संचेरिरे समाहिताः॥ ताः सुशीलाः समाचाराः परिशुद्धत्रिमण्डलाः॥ सर्वा अपि समालोक्य लोकाः सर्वेऽनुमोदिताः॥ त्रिरत्नभजनं कृत्वा भद्रश्रीगुणा
लालसाः॥ बोधिचर्याव्रतं धृत्वा संचेरिरेऽनुमोदिताः॥ धर्मानुचारिणी दृष्ट्वा राजाशुद्धोदनोऽपि सः॥ समभिनन्दितः स्वान्तः सद्धर्मगुणालालसः॥ त्रिरत्नभ
जनं कृत्वा धृत्वा बुद्धानुशासनं॥ बोधिचर्याव्रतं धृत्वा संप्रचेरेऽनुमोदितः॥ दृष्ट्वैवं संचरन्तं तं नृपं सर्वे द्विजा अपि॥ अमात्या मंत्रिणो भृत्या जनाः स

भद्र. वैपि शैरिकाः ॥ समनुमोदितस्तानां भद्र श्रीगुणाब्धिनः ॥ विरलभजनं कृत्वा बोधिचर्यां समाचरत् ॥ एतद्धर्मानुभावेन तदा सर्वत्र भूतले ॥ निरुत्साहं श्रम
श्रीमन्महोत्साहं समाचरन् ॥ ततस्तांसकलान्दृष्ट्वा लोकान्संबुद्धगुणालालसान् ॥ बोधिचर्यासमाचारान्भद्र श्रीसत्त्वखान्विनान् ॥ दृष्ट्वा दुष्टो देवदत्तः
प्रगत्वा तीर्थिकाश्रमे ॥ सर्वांस्तान्तीर्थिकान्स्वपक्षसमामंत्र्यैवमब्रवीत् ॥ भो भवन्तो महाभिज्ञाः पश्यन्त्वाय दिहाधुना ॥ संबुद्धः सर्वलोकानां शास्ता भू
वतिसर्वजित् ॥ तद्भवन्तो महाभिज्ञा नृपिसर्वान्विनिर्जयन् ॥ प्रत्यन्तनिर्जनेरण्ये प्रवासयत्वतिक्षिपन् ॥ त्वारण्ये तदा को वा धर्मश्रोतुमुपासरे
त् ॥ तदास्य सुगतस्यापि भजेयुर्नैवमहाजनाः ॥ तदा सर्वेपि लोकाश्च युष्माकं समुपस्थिताः ॥ धर्मं श्रुत्वानुमोदन्तो भजेयुरभिनन्दिताः ॥ इति तत्सम ४३५
पादिष्टं श्रुत्वा सर्वेपि तीर्थिकाः ॥ तथा कर्तुं समिच्छन्तो मिथ एवं बभाषिरे ॥ असौ शौद्धोदनी राजा महीन्द्रस्त्रिगुणार्थभृत् ॥ सर्वसत्त्वहितं क
र्तुं त्यक्त्वा सर्वान्परिग्रहान् ॥ गयाशीर्षे नगे गत्वा चेरित्वा दुष्करं तपः ॥ जित्वा मारगणान्सर्वान्संबोधिज्ञानमाप्तवान् ॥ इदानीं स महासत्त्वः

सर्वत्रसंचरन्त्वयं॥ बौद्धचर्यासमारभ्य दिशीते सौगतंव्रतं॥ एतद्धर्मामृतं पीत्वा सर्वे लोकाः प्रबोधिताः॥ बोधिचर्याव्रतं धृत्वा संचरन्तेनुमोदिताः॥ ए
तद्धर्मानुभावेन सर्वत्र भुवनेष्वपि॥ निरुत्पातं शुभोत्साहं प्रावर्त्ततनिरन्तरं॥ एवमसौ महाभिज्ञः संबुद्धोर्हन्मुनीश्वरः॥ सर्वधर्माधिपः शास्ता विनायको
भविष्यति॥ कोस्य धर्मानुभावत्वं निराकर्त्तुं प्रशक्नुयात्॥ एकस्त्कजगच्छास्त्रीकं जित्वा संचरतेधुना॥ इत्थमस्यानुभावत्वमप्रमेयं महत्तरं॥ निराकर्त्तुं मशक्यं
हि सर्वैर्लोकाधिपैरपि॥ इतितस्य जगच्छास्तुः प्रातिहार्यं महत्तरं॥ दृष्ट्वा मत्वानुमोदन्तः सर्वे लोका भजन्त्यपि॥ अस्य धर्मानुभावत्वं सर्वत्र संप्रसारि
तं॥ सर्वलोकानुभावानि समाच्छायाभिराजते॥ तदस्य त्रिजगच्छास्तुर्मनोभिरुषितं नहि॥ ततकथं साधनानेन कर्त्तव्यमिह विग्रहं॥ तदस्य भजनं
कृत्वा पीत्वा धर्मामृतं सदा॥ कुलचर्याव्रतं धृत्वा संचरेमहि सर्वदा॥ एवं चेन्नः सदा भद्रं निरुत्पातं भवेदपि॥ सर्वलोकाभिमान्याश्च भवेमहि समं
ततः॥ इतितत्कथितं श्रुत्वा देवदत्तोतिरोषितः॥ तान्सर्वान्तीर्थिकान्दृष्ट्वा क्रूरदृष्ट्येवमब्रवीत्॥ आः एवं किं वदन्त्यत्र भवन्तोपि विचक्षणाः॥

भ८ कियद्धर्मानुभावत्वं जानन्ते भ्रातरस्य मे ॥ असौ श्रीक्रोदनीग्रामवास्तकुलजो मे समानिकः ॥ श्रीक्रोदनिरहंग्रामवास्तकुलजस्त्वत्समानिकः ॥ कियद्धर्मानुभावत्वं नाहं किमेन विद्यते ॥
कथं सर्वविज्जगच्छास्ता सर्वधर्माधिपो जिनः ॥ सर्वज्ञोऽर्हन्महाभिज्ञो विनायको भवत्यपि ॥ कथं स पूजनीयोऽपि हि वन्द्यो मान्यो भवत्यपि ॥ स्वधर्मान्परिभ्रष्टो हि भिक्षार्थी भ्रमते
अपि ॥ इति तस्य कुलाचारपरिभ्रष्टस्य दुर्मतेः ॥ यशोऽभिघातनं कर्तुं प्रोद्यमं च प्रयत्नतः ॥ इति तत्कथितं श्रुत्वा सर्वे ते तीर्थिका अपि ॥ तं दृष्टमभिपश्यन्तस्तस्थुर्मौनव्रता इव ॥ एवं
तान्तीर्थिकान्सर्वान्मौनीभूतान्समीक्ष्य सः ॥ देवदत्तोऽभिहृष्टात्मा मनसैवं व्यचिन्तयत् ॥ इमे हि तीर्थिकाः सर्वे सन्तोऽपि न विचक्षणाः ॥ यत्तस्य दुर्मतेर्भिक्षोर्भयशंकाविषादि ४३८
ताः ॥ यशोऽभिघातनं कर्तुमुत्सहन्ते न केचन ॥ कथं आनुर्यशः पश्यन्ति स्थेयं संप्रसारितं ॥ तत्तस्य दुर्मतेर्भिक्षोः कीर्तिं दिग्गुणानपि ॥ विघातयितुं मत्रापि कार्यो महत्प्रयत्नतः ॥
इति विचिन्त्य दुष्टोऽसौ देवदत्तोऽतिरोषितः ॥ तीर्थिकापासिकं विप्रं समामन्त्र्यैवमब्रवीत् ॥ भो साधो श्रूयतां वाक्यं यन्मयार्थमयोच्यते ॥ न भवानपि यत्नेन सर्वथा कर्तुमर्हति ॥ इ
ति तत्प्रार्थितं श्रुत्वा ब्राह्मणः सोऽनुमोदितः ॥ देवदत्तं महायत्नं संपश्यन्नेवमब्रवीत् ॥ यद्भवान्वदते साधो वाक्यं हितार्थसाधनं ॥ तन्नूनं प्रकरिष्यामि सर्वं दत्त पुरो मम ॥ इति त

त्कथितं श्रुत्वा देवदत्तः प्रमोदितः ॥ ब्राह्मणां तं सुहृन्मित्रं सम्यग्वचनमब्रवीत् ॥ यदि त्वयि महाभाग विश्वासं धियते ध्रुवं ॥ यदहं संवदिष्यामि तत्तथा कर्त्तुमर्हसि ॥ इति
तत्कथितं श्रुत्वा ब्राह्मणः सोऽनुमोदितः ॥ देवदत्तं सुहृन्मित्रं ससंशयः समब्रवीत् ॥ यथोदितं त्वया साधो करिष्यामि तथा शुभं ॥ तद्वदस्व हितार्थं यद्दहितं किं त्ववां
छितं ॥ इति तदुदितं श्रुत्वा देवदत्तोऽब्रवीत्ततः ॥ त्वं मित्रं वत्सरानन्दहिताहितेप्रियानुगः ॥ तस्मान्मित्रस्य मे कार्यं करणीयं त्वयाऽद्भुतं ॥ असौ सौख्यावदातिर्दुष्टः समानकुलजो
मम ॥ आघोरस्तायशोदेवीभर्त्तृत्वादिन्द्रजालिकः ॥ तस्याः प्रभावात्तुलां प्राप्य विश्वं महत्तरं ॥ नानाकृद्धिवलोपेतो जननानां दृष्टिवञ्चकृत् ॥ दृष्टीभूतो मानितो सोलोकैर
र्देवैर्दिवानिशं ॥ स्वकीतत्वत्रप्रर्शे विभिश्शुभिः सहितः सदा ॥ कुलचर्यामाश्रितोपि नैवाहं मानितो जनैः ॥ भूपसंज्ञो विहीनत्वादिन्द्रजालारव्यविद्यया ॥ तस्मात्तत्तां तद्विद्यां
शिक्षितुं सेह हन्त ध्रुवं ॥ तद्यद्योपायतनेसस्याकृत्यतस्वममसंमतं ॥ इत्याकर्ण्य गिरं तस्य पिधाय श्रवणौ सुधीः ॥ स्मृत्वा रत्नत्रयं भूयः प्रत्याहहितया गिरा ॥ कथमङ्ग त्वं सिमि
त्रत्वं वदसि स्वबलितोपि किं ॥ तत्कर्म न करिष्यामि त्वयि प्रीपितेप्यहं ॥ समाकर्ण्यापितद्वाक्यं सामर्षः श्रासरत्वकं ॥ यत्र मासास्य सहसाजिनाश्रमकुपाश्रयो ॥ वन्दित्वा चर

भ८ शास्तारं प्रार्थयामास साञ्जलिः ॥ निमंत्रयाम्यहं नाथ क्षमाम्भोधे ससांघिकं ॥ प्रव्रज्यां धारितो ह्येको दुर्भगस्थापकारकृत ॥ अग्रारभ्यो पाशकस्थः सस्संघं भोजयाम्यहं ॥ तस्मा
च्छुः प्राभिगन्तव्या सभिक्षुगणस्त्वया गृहे ॥ पूर्वमागः कृतं यन्मे भूपात्तां ह्यपरसावहन्‌ ॥ तथाप्यपकृतिर्याया नत्सर्वं विस्मरात्मज ॥ त्वदपकारसंभूतकिल्विषक्षयहेतवे ॥ प्रा
र्थयामि त्वामिव सर्वपापक्षयंकरं ॥ इतीनिमंत्रितस्तेन प्राच्युवासदयाकरः ॥ स्वयं जानंस्तस्य चित्तं स्वप्रभावप्रकाशने ॥ मत्वाधिवासितं बुद्धं सुरप्रत्यागमत्तम
भूः ॥ स्थित्वा गेहे जनानां हि साधयेत्सुपचारकं ॥ शोधयित्वा गृहं रत्न मालाभिः संविराजितं ॥ भद्रासनानि प्रास्तीर्य सवासांसि समन्ततः ॥ साधयित्वोपचाराणि विता ४३९
नानि वितन्य च ॥ ततस्तत्सुधिनाः प्राहुर्मिथः श्रीघनभक्तिकाः ॥ इदं नो सौख्यमान्तोऽयं तस्य भक्तिपरस्य राः ॥ यस्यानुभावाद्दुर्लालं बुद्धं सततं नताः ॥ ततः प्रा
तः समुत्थाय सत्तमक्रं वन्नुरा ॥ संसिद्धान्युपचाराणि तस्यागच्छन्निमंत्रणे ॥ इति तच्छिरमाकर्ण्य प्रमनाः प्रययौ ततः ॥ मातुश्च रोगविहारे सौ निमंत्रितुं मुनीश्वरं ॥ ता
नेन स्थानं सौ शिष्यान्वात्य दृष्टा परिचित्तवित्‌ ॥ विष्णुमात्वनीं नाम गृहीनधार्मिणीं परां ॥ ममात्मजः प्रागतो सावसम्म् निमंत्रणे मुरा ॥ प्रकाशितुं स्वमाहात्म्यं गच्छामो भो

जितं तेन ॥ वितायाम श्मशानस्यैव पठध्वं मनसा स्मरन् ॥ नग्रथेमां भृणुध्वंमो साहस्त्रमर्द्दनी भवां ॥ तेजसा सर्वबुद्धानां प्रत्येकजिनतेजसा ॥ अर्हतां चैव वीर्येण सर्वेषां
मंत्रधारिणां ॥ प्रज्ञया शालिपुत्रस्य मौद्गल्यस्य च ऋद्धिणा ॥ चक्षुषा चानिरुद्धस्य काश्यपस्य महद्गुणैः ॥ कौष्ठिल्य पूर्वशाखाया च आनन्दस्य श्रुतेन च ॥ सर्वलो
केषु मैत्र्या च करुणाया वै पकारिणु ॥ बोधिचर्यामुदिनया शारीरां पेक्षया हि ते ॥ वीर्येण तेजसा तेषां विषमस्त्वविषं ङ्कतं ॥ रागो द्वेषश्च मोहश्च एते लोके त्रयो
विषाः ॥ निर्विषो भगवान्बुद्धो बुद्धसत्येहतं विषं ॥ रागो द्वेषश्च मोहश्च एते लोके त्रयो विषाः ॥ निर्विषो भगवद्धर्मो धर्मसत्येहतं विषं ॥ रागो द्वेषश्च मोहश्च एते लो
के त्रयो विषाः ॥ निर्विषो भगवत्संघः संघसत्य विषंहतं ॥ विषस्य पृथिवी माता विषस्य पृथिवी पिता ॥ एतेन सत्यवाक्येन सर्वेषु निर्विषा विषाः ॥ हाकारान्तां ह
कारणां मंत्रं चापि महत्तरं ॥ त्रिंशत्तिभिः षडधिकै रक्षैर्ग्रथितं परैः ॥ वर्गाग्र पञ्चमयुत पद्वर्गान्त्याक्षरादिकं ॥ प्रथमद्वयसंपृक्त शान्तान्तं त्रिविधं पुनः ॥ पंचोत्त
राभिर्दशभि रचितं भिक्षव स्तथा ॥ संस्मारध्वं महाविद्यां सर्वहालाहलेहरां ॥ संस्मारयामासुरथ दत्तां भगवता स्वयं ॥ श्रीनारत्न सवृत्तानं मानन्तर्याः स्मितानना ॥

४८ प्राञ्जोथाशीः प्रणम्यान्तं सांजलिः प्रार्थयज्जिनं ॥ भगवन्समयो जातस्तन्नस्संघोभिगच्छतु ॥ इतितत्प्रार्थितं श्रुत्वा धर्मराजः समुत्थितः ॥ स संघः पात्रमादाय संभासयन्स्ततोव
रत् ॥ तत्र तस्य गृहे गत्वा पात्रमादाय मारजित् ॥ अध्यासने समाश्रित्य तस्थौ ध्यात्वा प्रभासयन् ॥ एवं सर्वेपि ते संघाः पात्रं गृह्य यथाक्रमं ॥ स्वस्वासने समाश्रित्य तस्थुश्री
त्वास महिताः ॥ अन्वयामास तं दुष्टः स संघस्तु पचारनः ॥ सुवर्णादिक्षिराणां दत्वा सकौतूहलं यस्तु चोदरं ॥ साधकैः साधितं दुष्टः श्रेयस्करं न्यायसंततः ॥ गरलं मिश्रितं भोज्यं
नदिन्नाग्रान मानसः ॥ उग्रास्साधवः केचित्सलाप्यर्विनिन्द्यतं ॥ तस्थुस्तस्यागिराकेचित्तन्माहात्म्यदिदृक्षवः ॥ तत्पुरदत्तंपि तत्पात्रं पायसामृतपूरितं ॥ प्रत्येकं प्र ४८०
दर्दुस्तिर्भ्योविषादमलिनाननाः ॥ तद्भोग्यं सविषं मत्वा संशोध्य विषमोचकः ॥ संपश्यन्पात्रमादाय स्वभुजे शुद्धमानसः ॥ एवं सर्वेपि ते संघाः पठित्वा विषमोचनीं
॥ पात्रमादाय संशोध्य निर्विषं च बुभुजुर्मुदा ॥ तान्सर्वानभिसंतुष्टान्सर्वान्प्रसन्नमुखान्यतीन् ॥ निर्विकारान्समालोक्य सर्वेति विस्मयं ययुः ॥ ततस्तेषां देवदत्तो जिनाग्रानां
यथाक्रमं ॥ अपनीय पात्राणि हस्तादीन्समशोधयत् ॥ ततः संशोधयित्वा स तत्र भूमौ प्रभामनुना ॥ नीचासनसमासीनस्तस्थौ सज्ञातिबान्धवः ॥ ततः स्वकृतपा

केन दुष्टः समित्रबान्धवः ॥ गरलपरिनिष्पक्व स्तस्थौ संमोहितेन्द्रियः ॥ लालाश्रवमुखः कोशान्विदांगः परिदाहितः ॥ भूमौ पपात च क्रमतः परिवर्त्त्येइनस्ततः
॥ नदुदन्तं समाकर्ण्य शुद्धोदनः ससत्वरं ॥ आगत्य तं जिनं नत्वा न्यवेदयत्कृताञ्जलिः ॥ जगद्धिते श्रीभगवन्नेषनागः सर्वथाक्षम ॥ दुष्टोऽयं मत्सुतः पापी
मात्मा श्रावस्त्यया निग्रहं ॥ प्रकुरुष्व कृतं तेन दुष्टेन श्रीघने श्रुतः ॥ तातं मयाशांतिपार तत्सर्वं क्षमसत्कुरौ ॥ सर्वोपकारकृन्नित्यं त्वात्मजं किमुपेक्ष्यसे ॥ निर्विषीकृ
त्यसहसा समुद्धर विषान्तरं ॥ संसैन्योनमुचिर्यो सौ हन्तुं त्वामत्र वृष्टिभिः ॥ परिवृतः समानस्थौ बोधिमण्डमुपाश्रितं ॥ ताद्दशं नं महादुष्ट मनिन्द्य मपकारि
णं ॥ रक्ष रक्ष मयात्र बध्वं नदनुजं प्रपालय ॥ इति तं प्रार्थितं श्रुत्वा सम्बुद्धो ईद्र्मुनीश्वरः ॥ पितृव्यं तं समालोक्य करुणार्द्रः समब्रवीत् ॥ तात शृणु समा
धाय यन्मया क्रीयते किमु ॥ येनैव यत्कृतं कर्म तेनैव भुज्यते फलं ॥ कृतकर्मोप्यभुक्तानि न नश्यन्ति हि सर्वतः ॥ समयं समुपाश्रित्य फलन्ति सर्वदेहिनां ॥ नास्ति
नाद्यत्रितकर्म वायुभिश्च नश्यते ॥ क्षिप्यतेनाम्बु भिश्चापि भूमौ वाशीयते नहि ॥ अन्यथापि च कर्माणि न भवंति कदाचन ॥ मिश्रे मिश्रं शुभे सौख्यं दुःखं पापफलेः

भद्र सदा॥इति मत्वा परित्यज्य कृष्णानि मिश्रितान्यपि॥शुक्लान्येव हि कर्माणि कर्त्तव्यानि शुभार्थिभिः॥मया न निहतो मारः स्वयमेवापि पप्यत॥आमियास्त्व प्रदाहेन करादिर
हितो भवत्॥इति जिनगिरं श्रुत्वा न्यवेदयद्धितवादिनः॥सर्वं हि भवता शास्त्र समादिष्टं तथा किल॥तथापि त्रिजगन्नाथः सर्वधर्माधिपेश्वरः॥नंदनानुमती न्मूढान्सर्वथा त्रातु
मर्हति॥इति तत्प्रार्थितं श्रुत्वा संबुद्धः श्रीगुणाकरः॥शुद्धशालान्समालोक्य चकार स्वस्थितानतं॥न तत्र स्व स्थिताः सर्वे ससंघं तं प्रणेमिरे॥सोऽभूदसूयासंपन्नः पुनस्त
स्मिन्नुपाकुलः॥ततः स भगवांस्तेभ्यो दत्वाशिषं ससांघिकः॥पक्षीवाकाशमार्गेण गत्वा स्वाश्रममाश्रयत्॥शुक्लोदनः सुतं दृष्ट्वा प्रभ न्सयद्धपाकुलं॥दुष्टारे कथमत्रे ४५१
ति पुत्र कीसंपं वशं गतः॥भूयश्चापकृतं तस्मिंजगत्पूज्ये गुणेश्वरे॥शान्तिपारं गतत्वा न्सत्वांर रक्षापकारिणं॥अद्यैव शरणं गच्छ तस्य तत्पापसंक्षये॥न किल्विष
क्षयं यासि सेवाद्दते जगद्गुरोः॥प्रव्राजिकं समाधाय चराजजवरान्वितः॥निर्लज्जोऽसि कथं रागी दृष्ट्वा माहात्म्यमुत्तमं॥प्राप्तुं तां पदवीं भव्यां भिक्षुकव्रतमाचर॥यदि
न चरसे भैक्षं निर्वासयामि राज्यतः॥वध्यं नैत्स्थापयिष्येवाणोन्मत्तपापकारिणां॥इति निर्भर्त्सितस्तेन लज्जितः प्रार्थयन्स्मितः॥गच्छाम्यद्यैव शरणं तद्गुरोः प्रतिपत्तये॥

प्रशान्त्वेति दुरात्मासौ बहिर्गत्वा पुरात्ततः॥ व्यचिन्तयदहस्थित्वा वृतं तेन प्रभुः समुन्नमं॥ दुष्टस्यारेः कथं शिष्यभूतः प्राव्राजिकं व्रतं॥ चरिष्यामि निरुद्यमानः समान
कुलजोयतः॥ तत्पदं समभिज्ञाय मं चरिष्ये नतपोध्वना॥ हत्वं तथामाभिनंतं मघोरमंत्रसाधकः॥ ततः सोतिविषम्यात्मा तदीर्ष्यालुः प्रकोपितः॥ मस्करि शारशाग
त्वा परिव्राडभवत्तदा॥ ततः सोतिप्रदुष्टात्मा त्रिरत्नगुणनिन्दकः॥ आर्यधर्मपरिभ्रष्टः निरुद्यमानोचरद्भुवि॥ ॥ इतिश्री भद्रकल्पावदाने सं
उद्धर्मानुभावपरिवर्त्तो नाम अष्टत्रिंशदध्यायः॥ ३८ ॥ (८०२) ॥ अथ स भगवाश्छास्ता भिक्षूनानन्दकादिकान॥ भिक्षुणीरपि सर्वा
स्ताः समामन्त्र्यैवमादिशत्॥ भिक्षवोऽन्यत्र देशेपि सर्वत्र बोधिसाधनं॥ उपदेष्टुं समिच्छामि तत्समायात वांछिनः॥ कतामालुम्बिनीयात्रा भिक्षवश्च
समुद्भूता॥ सर्वांस्तानुद्धरिष्यामि प्रतिज्ञेति महत्तरा॥ इति शास्त्रा समादिष्टं श्रुत्वा सर्वेपि सांघिकाः॥ तथागन्तुं समीछन्तः शात्मनन्दत्सबोधिताः॥ त
दुदन्तं समाकर्ण्य पिताभुद्धोदनो नृपः॥ तमात्मजं जगद्वंद्यं निवारयितुमैछत॥ ततः सन्नृपतिराजा समंत्रीजनपौरिकः॥ शाक्यस्तस्मुनीन्द्रस्य

भद्र. तत्राश्रमे तु व्यचरत्॥ ततस्तमात्मजं बुद्धं दृष्ट्वा नराधिपः पिता॥ प्रणत्वा साञ्जलिः पश्यन् समामंत्र्यैवमब्रवीत्॥ भगवन्नयं जगच्छास्ता संबुद्धो भगवानसि॥
तद्दत्तैव समाश्रित्य बोधिचर्यां प्रकाशय॥ नान्यत्र विषये गन्तुं समिच्छतु भवानपि॥ सर्वदाहमुपाश्रित्य भजेयं भवतामपि॥ स्थातुमिह न शक्नोमि वि
नाते मुखदर्शनं॥ हित्वा राज्यं सत्संगं व्रजिष्यामि तपोवनं॥ इति विज्ञाय सर्वज्ञ याचज्ञो वाम्यहं नृपः॥ तावत्कुत्रापि मा गच्छ यदि ते ऽस्ति दया मयि
॥ इति संप्रार्थितेनेन निशम्य भगवाञ्जिनः॥ जनकं तं महीपालं सम्पश्यन्नेवमादिशत्॥ नाहमेकत्र लोकानां हितार्थे बोधिमाप्नवान्॥ अपि
सर्वत्र सद्धर्मं चारयितुं जिनो भवं॥ अपहं गन्तुमिच्छामि सर्वत्र भवतो ऽपि॥ संबोधिसाधनं धर्मं संचारयितुमानसः॥ यदि धर्मे ऽस्ति वो वाञ्छा सं ४८२
बोधिसाधने सदा॥ सर्वज्ञालयं चैत्यं प्रतिष्ठाप्याभिसेव्यत॥ यो ऽपि चैत्यं प्रतिष्ठाप्य भजते सर्वदार्चयन्॥ स निर्मलो ऽभिशुद्धात्मा भद्रश्रीसद्गुणा
श्रयः॥ बोधिसत्वो महासत्वः सर्वसत्वहितार्थभृत्॥ निर्विघ्नं बोधिसंभारं कृत्वा संपूरितं क्रमात्॥ दशमारगणाञ्जित्वा परिशुद्धत्रिमण्डलः॥

अर्हन्संप्राप्यसंबोधिंसंबुद्धपदमाप्नुयात्॥ इतिमत्वाप्रतिष्ठाप्यचैत्यंरत्नत्रयालयं॥ यथाविधिसमभ्यर्च्यभजध्वंसर्वदामुदा॥ इत्यादिष्टंमुनीन्द्रे
णाश्रुत्वाराजाप्रबोधितः॥ तथेत्यभ्यनुमोदित्वासमभ्युवासभूपतिः॥ ततःसंबुद्धआलोक्यराज्ञातदनुमोदितं॥ तंनृपंससभंदृष्ट्वासंपश्यन्नेव
मादिशत्॥ शृणुराजन्समाधायचैत्यपूजाफलंमहत्॥ विशेषेणप्रवक्ष्यामिसर्वलोकाभिबोधने॥ पञ्चामृतैःसहाम्भोभिःसंशोधितस्तुनि
र्मलैः॥ स्नापयन्तिप्रशस्तायेधर्मधातुंजिनालये॥ मन्दाकिन्यांसहास्नात्वापरिशुद्धत्रिमण्डलाः॥ दिव्यसुखाभिभुंजानाःप्रान्तेयान्तिजिनाल
यं॥ सौरभद्रव्यसंयुक्तंयेचैत्येसुगतालये॥ मोदयन्तोजगच्चित्तंधूपयन्तिसदामुदा॥ तेसौगंधिनसौम्यांगामान्यादेवासुरैरपि॥ भ
द्रश्रीगुणासंपन्नाभवेयुरत्नसंनिभाः॥ पञ्चगन्धैर्मुदायेच धर्मधातौजिनालये॥ लिप्त्वाराध्यसमाश्रित्यप्रभजन्तिसदादरात्॥ सप्तरत्न
समेतास्तेभद्रश्रीसद्गुणाश्रयाः॥ सर्वलोकहितोद्युक्ताभवेयुःक्षितिपेश्वराः॥ येचैत्यमुनिराजेन्द्रंविचित्रचीवराम्बरैः॥ प्रावार्यश्रद्धयाभ्य

भद्र. च्यं संभजन्ते सुखसम्पदा ॥ ते दिव्यभूषकौशेयरत्नाभरणभूषिताः ॥ साम्राज्यमधिपाः सन्तो भवेयुर्भद्रचारिणः ॥ येचैत्यं कुंकुमैः सर्वैर्जलजैः स्थल
जैरपि ॥ समभ्यर्च्य समाश्रित्य प्रभजन्ति सदादरात् ॥ महेन्द्रश्रीसमृद्धास्ते शक्राधिकप्रभोन्विताः ॥ भद्रश्रीसुखसंपन्ना भवेयुर्वोधिभागिनः ॥
येचैत्यं पुष्पमालाभिः शोभयित्वा भजंत्यलं ॥ भवेयुः श्रीसमृद्धास्ते धर्मकामाः सुराधिपाः ॥ घृतसुगंधितैलादि संप्रदीप्तं तमोपहं ॥ प्रज्वा
लयन्ति येचैत्ये सर्वं ब्रह्मालये मुदा ॥ स दृष्टकायः सुरूपास्ते ज्ञानदीप्ततमोपहा ॥ भूपार्चितपदाम्भोजा भवेयुर्वोधिचारिणः ॥ प्रणीतं सुरसंभोग्यं वर्णाग
न्धसमन्वितं ॥ येचैत्ये तोऽउपढौकित्वा संभजन्ते समादरात् ॥ ऋद्धिमन्तो नृपेन्द्रास्ते सप्तरत्नसमन्विताः ॥ स्वर्गेऽदिवाधिपाश्चापि भजेयुर्वोधिचारिणः ४४३
॥ येचैत्ये सुरसंपानं सौवर्णगंधसंयुतं ॥ उपढौक्य समाराध्य प्रभजन्ते समाहिताः ॥ ते बलिष्ठा महीपेन्द्राः श्रीसमृद्धा निरोगिणः ॥ स्वर्गेयातास्त्र
देवेन्द्रा भवेयुर्वोधिभागिनः ॥ मूलस्कन्धानि येचैत्ये वीजफलदलान्यपि ॥ श्रद्धया समुपस्थाप्य संभजन्ते समाहिताः ॥ ते प्रभुक्त्वा यथाकामं भोगयाणि

सकलान्यपि ॥ सद्धर्मसाधनारक्ताः संप्रयुर्जिनालयं ॥ समर्पयन्ति ये चैत्य पर्थौध्वजगणान्यपि ॥ तेबलिष्ठाः सुप्रशंगाः सौम्यरूपा निरामयाः ॥ वितन्यो
चैर्वितानानि संभजन्ति जिनालयं ॥ धन्यास्ते गुणिनो वन्द्याः शुद्धवंशा विचक्षणाः ॥ सर्वार्थसिद्धिसम्पन्नाः संप्रयायु जिनालयं ॥ सौवर्णरत्नपुष्पा
दिछत्त्रानि विविधान्यपि ॥ अवरोप्य ध्वजान् स्नान् संभजन्तेऽभिनन्दिताः ॥ भद्रश्री सद्गुणाधाराः सर्वभूपाधिपा भुवि ॥ स्वर्गे देवाधिपो भूत्वा
प्रान्ते यायुर्जिनालयं ॥ लंबयित्वा पताकाये भजन्ति तं जिनालयं ॥ ते भूत्वात्र महीपालो प्रान्ते यायु जिनालयं ॥ ये चैत्ये विविधैर्वाद्यैः संगीतिम
दंगादिभिः ॥ तौर्यवंशादिभिश्चापि संसेव्यान्ते महोत्सवैः ॥ ते मनोज्ञस्वगुर्दिव्य श्रोत्राः श्रीसद्गुणाश्रयाः ॥ सद्धर्मसाधनं कृत्वा संप्रयायुर्जि
नालयं ॥ सलाजाक्षतपुष्पाणि स्वस्तिवाक्यमुदीरयन् ॥ प्रक्षिप्य श्रद्धया भक्त्या संभजन्ते नमोदिताः ॥ सर्वसत्वहितं कृत्वा संप्रयायुर्जिना
लयं ॥ सधातुद्रव्यरत्नादि दक्षिणानि जिनालये ॥ श्रद्धयासमुपस्थाप्य संभजन्तेऽभिनन्दिताः ॥ दिव्यश्रीसुखभंजाना भद्रश्रीसद्गुणा

भद्र.

श्रयाः ॥ सर्वसत्वहितं कृत्वा प्राप्नोयायुर्जिनालयं ॥ येभक्त्या स्तुतिभिः पद्यै भैर्स्तवं कुर्वन्त्यालयं तथा ॥ पद्यैर्गद्यमयैर्वापि स्तुत्वा भजन्ति सादरं ॥ सर्वरत्नसमृ
द्धास्ते सर्वविद्याविचक्षणाः ॥ भूपाः स्वर्गाधिपाश्चापि भूत्वायायुर्जिनालयं ॥ नत्वाष्टांगैः प्रसन्नाये संभजन्ते समादरात् ॥ सप्तरत्नसमेतास्ते नृ
पाधिपा महर्द्धिकाः ॥ येमुनीन्द्रालयं चैत्यमनेकशः प्रदक्षिणं ॥ कृत्वा ध्यात्वा भक्त्या स्तुत्वा नामोच्चार्य भजन्ति च ॥ जातिस्मराश्चिरायुष्का म
तिमन्तः सुवेशिताः ॥ वन्द्याः पूज्याश्च मान्याश्च भवेयुर्बोधिचारिणः ॥ शुद्धाश्मभस्मसंक्षालैः समालिप्य समन्ततः ॥ समभ्यर्च्य महोत्साहै ४४४
र्ये भजन्ति जिनालयं ॥ शोकक्लेशाग्निसंतापविवर्जिताश्चिरायुषः ॥ नीरोगाः सुखिनो देवा भवेयुर्भूमिपाश्च ते ॥ ये च निर्माल्यमाकृष्य शोधये
न्ति समन्ततः ॥ निर्मुक्तक्लेशशोकास्ते दर्शनीयाः शुभेन्द्रियाः ॥ श्रीमन्तः पुण्डरीकास्या भवेयुर्बोधिचारिणः ॥ जीर्णितिशीर्णितं चैव प्रतिसंस्कृत्य ये
मुदा ॥ प्रतिष्ठाप्य महोत्साहैः संभजन्ते नुमोदिताः ॥ सर्वसम्पत्समृद्धास्ते पूर्णेन्द्रिया निरामयाः ॥ धर्मकामाः शुभाचारा भवेयुर्बोधिचारिणः ॥ ज

पन्नो ये स्य मंत्राणि धारणीश्च समाहिताः ॥ ध्यात्वा स्मृत्वा च नामानि समुच्चार्य भजन्त्यलं ॥ तेपि सर्वे महासत्वाः परिभुक्त्वा निमराड्लाः ॥ भद्रश्रीसद्गुणाधा
राभवेयुर्बोधिचारिणः ॥ एवं महत्तरं पुण्यं धर्मधातौ जिनालये ॥ श्रद्धाभजनसंभूतं समादिष्टं मुनीश्वरैः ॥ मयैतत्पुण्यसंक्षिप्तमात्रं तु कथ्यतेऽधुना
॥ संपूर्णं विस्तरेणात्र समाख्यातुं न शक्यते ॥ एवं विज्ञाय चैत्यस्य सेवाफलं महत्तरं ॥ श्रद्धया शरणं कृत्वा कुरुध्वं भजनं सदा ॥ ये चैत्ये शरणं
कृत्वा श्रद्धया समुपाश्रिताः ॥ सुप्रशान्ताशया भक्त्या संभजन्तेनुमोदिताः ॥ दुर्गतीं ते न गच्छेयुः कुत्रापि सर्वदा भवे ॥ संजाता सद्गतिष्वेव भ
वेयुर्बोधिचारिणः ॥ सदा ते सुकुले जाता बोधिसत्वा विचक्षणाः ॥ सर्वसत्वहिताधानं संचरेरन् सुसंवरं ॥ ततस्ते बोधिसंभारं पूरयित्वा यथाक्रमं
॥ त्रिविधां बोधिमासाद्य निर्वृतिं पदमाप्नुयात् ॥ नहि चित्तप्रसादस्य स्वल्पा भवति दक्षिणा ॥ तथागतेषु सद्धर्मे संघेष्वपि च सर्वदा ॥ उक्ता एव
मचिंत्या हि सद्धर्माः सांघिका अपि ॥ अचिंत्येपि प्रशन्तानां विपाकश्च सदाशुभे ॥ एवं मत्वा त्रिरत्नानां भक्तिसेवाफलं महत् ॥ सेवाभक्तिः स

४६ दाकार्यां: धर्मधातौजिनालये॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा शुद्धोदनो नृपः॥ सलोकान्पनु मोदित्वा प्रात्यनन्दत्प्रबोधितः॥ ततः सजनको राजा समभिनन्दि
ताशयः॥ तं मुनीन्द्रं महाभिज्ञं सम्पश्यन्नेदमब्रवीत्॥ भगवन्नाथ सर्वज्ञ यादिष्टं भवता यथा॥ तथा कर्तुं समिच्छामि तत्समादेष्टु मर्हति॥ एवं संप्रार्थितं
पित्रा श्रुत्वार्हन्भगवाञ्जिनः॥ तं महीन्द्रं महीपालं संपश्यन्नेवमादिशत्॥ कुरुष्वैत्य महीनाथ धर्मधातुं जिनालयं॥ एतत्पुण्यविपाकेन संबुद्धप
दमाप्नुयात्॥ इत्यादिष्टं जगच्छास्त्रा संबुद्धो भगवाञ्जिनः॥ स्वं नखं केशमुत्कृत्य राजेन्द्रायैवमादिशत्॥ राजन्नेतन्नखं केशं निधाय गर्भम
ण्डले॥ शिलामयं महच्चैत्यं कारयित्वा यथाविधिः॥ प्रतिष्ठाप्य महोत्साहैः समभ्यर्च्य सदा भज॥ तत्कचं नखमादाय संप्रार्थ्य जिनं नृ
पः॥ उद्वहन्नुत्तरासंगं जानुभ्यां भूतले स्पृशन्॥ अद्यैव कारयिष्यामि स्तूपं विंवं महत्तरं॥ प्रासादं काञ्चनमयं यत्स्वजाभिश्च सेव्यते॥ पुन
र्वै निविधास्यामि एकं यत्राहमाश्रये॥ तस्यैव भजनं कृत्वा निर्वास्यामि निरञ्जनः॥ भूपतिं सकलानन्दं विधास्याम्यभिषेकतः॥ कुरुष्वैत्यप्र ४८५.

निष्ठात्वं तस्मै दत्वाभिषेचनं॥ तत्पूर्ववत्समागच्छ संसाधिकोऽधुनापुरे॥ तपोवनं व्रजिष्यामि सहैकाकी त्वयात्मज॥ इत्यादिश्य गुरुर्वत्सं इतिनं श्रीघ
नो नृपः॥ पूर्णायां संविधास्यामि तत्प्रतिष्ठाभिषेचनं॥ तथापि पूजयिष्यामि आगच्छ पूर्ववज्जिनः॥ कारयिष्यामि चैत्यं च प्रतिष्ठां तद्दिनेऽत्र॥ इतित
क्रिरमाकर्ण्य जगाम भिक्षुभिः सह॥ निजप्रभाभिः संभाव्य खिक्किवरी पात्रमावहन्॥ पाद्यं ददौ महीपालः पूर्ववत्सांघिकाय सः॥ सिंहासनस
मासीनानर्चयामास भक्तितः॥ पात्रं पायससंपूर्णं ददौ चापि त्रिचीवरं॥ जलधाराभिसंश्रोध्य नीचासनमुपाश्रितः॥ ततः श्री भगवान्धर्मं क
थयामास साशिषं॥ स्तूपबिम्बं कारयेति प्रोक्त्वा प्रत्याययौ ततः॥ न्यग्रोधाराममाश्रित्य सद्धर्ममुपदेशयन्॥ तस्थौ भिक्षुगणैः सार्द्धं अन्यत्रग
मनोत्सुकः॥ ॥ अथासाववनीपालो यथावद्भूपरीक्षणं॥ कृत्वा तत्र यवारोपं भोजयित्वा च गां स्तृणं॥ तासां मूत्रपुरीषाद्यैर्लेपयि
त्वा च मृगमयैः॥ कुमारीभोजयामास तत्रस्थां विधिनार्चयन्॥ तद्धात्पतः समुद्धृत्य शल्यं वास्तुं परीक्ष्य च॥ भूमीखननमाधाय सूत्रपातपुरस्स

∴ पू. सुवर्णप्रभा पाठ. पश्चि. समाधिराज पा.
द. प्रज्ञापारमिता पा. उत्त. गण्डव्यूह पा. २

भद्र. रं॥ तोयपूर्णानतः कृत्वा पादन्यासं तदन्तरं॥ अनेन विधिना चैत्यं कारयामास काञ्चनं॥ नवरत्नसमाकीर्णां कोष्ठं नक्षत्रकेशिनं॥ गर्भे निधाय सर्वज्ञ पञ्चदे
वीसमावृतां॥ सौवर्णरत्नखचितछत्त्रांकितं ध्वजांकितं॥ रत्नतोरणसंदीप्तं वितानपरिमण्डितं॥ अथैष मासे राकायां दशमे रविवासरे॥ आ
युष्मति तथा योगे तत्प्रतिष्ठां चकार सः॥ कृत्वाधिवासनां सम्यक् च तन्त्रं दृष्ट्वा यथाविधिः॥ आनन्दाख्यां श्च तु दिक्षु पाठकांश्च विधाय च॥ तथाभि
षेकं प्रददौ चैत्यस्य भगवान्नृपः॥ कलशाभिषेकमाधाय भागवतेप्रमोदितः॥ तत्कर्मणि समाप्तेऽथ देशयात्रां तथा करोत्॥ सिंदूराच्छादित ४७६
दिशां पुरस्कृत्य महीपतिं॥ वाद्यनृत्यमहोत्साहैः पुष्पवृष्टिभिरन्वितैः॥ प्रजाभिः स्तूयमानाभिश्च तु रंगसमन्वितं॥ भागधेयमहो तस्य सक
लानन्दभूपतेः॥ जिनाभिषेकमानस्य केचिदिति प्रशशंसिरे॥ ततो राजकुलं प्राप्ता रात्रावाकर्षणं त्वकार्षी॥ समृद्धिमां श्रीघनेन निनायानि ड
याजनैः॥ प्रातः श्रीभगवांस्तस्मिं कृत्वा छत्त्रावरोहनं॥ तस्या अपि ददौ दिव्यं द्वात्रिंशद्दलसंयुतं॥ एवं व्रतमहोरात्रं कारयित्वा जगद्गुरुः॥ च

कारं भूपतिं पौत्रं च चक्रवर्त्तिनमीश्वरं ॥ इन्द्रप्रस्थकर्णाढ्यः समादिशद्विशेषतः ॥ आहोनिशैक माहात्म्यां सजनायमहीक्षिते ॥ अथा
स्म्यां जिनेन्द्रोसौ तच्छत्रं प्रतिसंहरन् ॥ सर्वलोकहितार्थाय समादिशन्महीपतिं ॥ निष्ठस्वात्र महीपाल चैत्यभजनतत्परः ॥ प्रजानां हितमाधा
य बोध्यर्थीधनमाचरन् ॥ धर्मापराधं सततं माकुरुष्वा विशेषतः ॥ दशकुशलमाधाय त्रिरत्नसेवको भव ॥ पुनरप्यागमिष्यामि व्याख्यातुं म
तुलां कथां ॥ इतोधुना व्रजिष्यामि संसघोहं सुतात्मज ॥ तत्राप्यहं गमिष्यामि यत्र मायासमाश्रिता ॥ सर्वत्रापि भ्रमिष्यामि जगदुद्धारका
मुकः ॥ ॥ इत्युक्तवन्तं त्रिभवाधिराजं । ननाम सार्द्धं गप्रणामपूर्वं । प्रागच्छ भूपो जगदीश्वरत्वं । धर्मामृतं वर्षितुमित्थमीश ॥ इति
प्रणामस्य धिरः स्थ शित्वा । संबद्धस्वाशीर्वचमाजिनेन्द्रः ॥ सदा प्रजानां हितमाचरस्व । संबोधिकाममस्तु वाच वेत्थं ॥ ॥ अथात्र श्रीप्रभु
भक्त्ये वारे । योगेच बद्धो सहभिक्षुसंघैः ॥ विनिर्ययौ राजकुलान्मुनीन्द्रः सं भाषयन् स्वप्रभया समन्ततः ॥ प्राचार्यमानः सकलौः पुरस्थै नि

भद्र. वार्य्यमानो विहिताञ्जलीभिः ॥ पुनः प्रयास्यामि सुभाषितार्थं भजन्विरत्नं समुदीरयन्तीति ॥ परस्परं हैत्य समाचरन्त स्वश्चैत्य सेवा सुरताश्च भक्त्या ॥ दानं प्र
ताः शीलविशुद्धदेहा ध्यानक्षमावीर्य्य सुबुद्धिवज्ञः ॥ शालीसुतं दक्षिणातश्च पश्चे आनन्दमाधायत सुफलं च ॥ वामे तथा भिक्षुगणाभिकीर्णे
विनिर्य्ययौ कापिलदेशतो जिनः ॥ ॥ श्रीमत्स्वयम्भू जिनदर्शनार्थं नेपालगामी प्रययौ मुनीशः ॥ उदीचि दिक्षं मुखस्य वलोका कुश्ले कामः
प्रमनास्ततो सौ ॥ शुद्धोदनो सौ नृपतिस्तथास्मिं पौत्रात्मजं शिक्ष्य तपोवनं ततः ॥ गत्वाकरोच्चैत्य मुदारकेशं नखं च संस्थाप्य सुगर्भमण्डले ॥ कृत्वा ४८१
स्य पूजां सततं सुभक्तः समाश्रमज्जत्सुरतः सुचित्तं ॥ श्रीशाक्यसिंहेति सदा जपन्स नस्थौ महीपः सकलादिहर्षः ॥ प्रजा हितं सुव्रतमादधानो दान
क्षमा शील सुबुद्धि वीर्यैः ॥ ॥ अथोपगुप्तो नृपतिं विभावे श्रृणुष्व भूपालफलं विशेषान् । भगवन्तियं भद्र सुभद्रकल्पं श्रद्धाप्रशन्ना कथयन्ति येव ॥ नी
वैपु सर्वे स्वपिसात नजय शान्तं गभोज्ये च तथा अंतेषु ॥ रत्नत्रयाचौ सुचचैत्य विंबे तत्त्वा भुवनिक्षयकालुषास्त ॥ रक्षन्ति ब्रता: सततं सधर्मा संघास्तथा

ःसहलोकपालाः॥ योगीश्वराः सार्षिगणाः प्रसन्ना ग्रहाश्च नक्षत्रगणाध्रुवास्तान्॥ दानव्रताद्यान्यरिपूरितास्ते संबोधिसंभारगुणोरुपेताः॥ धर्मार्थ
कामं समवाप्नुवन्तः प्रान्ते च निर्वाणितिरं विमुक्ताः॥ रत्नत्रिविदं सर्वसुभाषितानां यस्मिन्यिता पुत्र समागमोभूत्॥ शालीसुताद्याः सकलाश्च भिक्षवो
यथाभूतरुज्जुंगपदाभिकामाः॥ इत्येवमुक्त्वा जिनराजकल्पो ध्यानाश्रितोभूदुपगुप्तभिक्षुः॥ लक्षास्तथाष्टादशभिक्षुकानां ध्यानेषु लीनापरित
स्थुरेवं॥ ततस्तथाशोकमहीमहेन्द्रः सामात्यलोकः पुरमाविवेश॥ नत्वाच तान् भिक्षुगणान्समर्च्य भूयोभिलाषी श्रवणोत्सुकाभ्ये॥ ॥
इति श्रीभद्रकल्पावदानेशोकोपगुप्तसंवादे सकलानन्दाभिषेकशुद्धोदनतपोवनाभिगमप्रवर्णो नामोन्तचत्वारिंशतितमोऽध्यायः समाप्तः॥ ०४०॥
ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतः॥ ह्यवदत्तेषां च यो निरोध एवंवादी महाश्रमणः॥ ०॥ यत्रेदं सूत्रराजेन्द्रं प्रावर्त्तयत्कलावपि
॥ भाविद्यः शृणुयाद्यश्च श्रावयेद्यश्च चारयेत॥ एतेषां तत्र सर्वेषां संबुद्धाः सकलाः सदा॥ कृपादृष्ट्या समालोक्य कुर्वन्तु भद्रमाभवं॥ सर्वापार

मितादेव्य स्तेषांनत्र सदाशिवं॥ कुर्वन्त्वोवोधिसंभारं पूरयन्तुजगद्धिते॥ सर्वेपिवोधिसत्वाश्च प्रत्येकसुगता अपि॥ अर्हन्तोयोगिनस्तेषां भद्रं कुर्व
न्तुसर्वदा॥ ब्रह्मादिलोकपालाश्च सर्वेचापि महर्षयः॥ तत्रतेषांचसर्वेषां कुर्वन्तु मंगलंसदा॥ कालेवर्षन्तु मेघाश्च भूयाद्बहुस्यवतीमही॥ निरु
त्पातंमहोत्साहं सुभिक्षं भवतुध्रुवं॥ वहुक्षीरप्रदागावो वृक्षाः पुष्पफलान्विताः॥ औषध्योरसवीर्याढ्या भूयासुस्तत्र सर्वदा॥ भवन्तुप्राणि
नः सर्वे आरोग्यंचिरजीविनः॥ सर्वद्रव्यसमापन्नाः श्रीमन्तो भद्रचारिणः॥ राजाभवतुधर्मिष्ठो मंत्रिणोनीतिचारिणः॥ सर्वेलोकाः सुवृत्ति ४४८
स्थाभवन्तुधर्मसाधिनः॥ माभून्कश्चिद्दुराचार श्चौरोदुष्टश्च वञ्चकः॥ दरिद्रो दुर्भगादीनो मदमानाभिगर्वितः॥ सर्वसत्वसमाचाराः परिशु
द्धत्रिमण्डलाः॥ स्वस्वकुलव्रतारक्ताः प्रचरन्तुजगद्धिते॥ सर्वेभद्राशयाः सन्तः संवोधिव्रतचारिणः॥ त्रिरत्नभजनंकृत्वा संचरन्तां सदाशुभे॥
आकाशषट्गगणा भूमिमितेशुभाव्दे· पक्षेऽसितेरसतिथौचशुचौर्वृहस्पतौ॥ शाक्यश्वरोनिजपरागत भद्रकल्पं· पूर्णीकृतंकुलिशवंशसमुद्भवेन॥१॥

मितादेव्य स्तेषांनत्र सदाशिवं ॥ कुर्वन्तोबोधिसंभारं पूरयन्तुजगद्धिते ॥ सर्वेपिबोधिसत्वाश्च प्रत्येकसुगताअपि ॥ अर्हन्तोयोगिनस्तेषां भद्रं कुर्व
न्तुसर्वदा ॥ ब्रह्मादिलोकपालाश्च सर्वेचापिमहर्षयः ॥ तत्रतेषांचसर्वेषांकुर्वन्तुमंगलंसदा ॥ कालेवर्षन्तुमेघाश्च भूयाच्छस्यवतीमही ॥ निरु
त्पातंमहोत्साहं सुभिक्षं भवतुध्रुवं ॥ बहुक्षीरप्रदागावो वृक्षाःपुष्पफलान्विताः ॥ औषध्योरसवीर्याढ्या भूयास्तुस्तत्र सर्वदा ॥ भवन्तुप्राणि
नःसर्वे आरोग्यंचिरजीविनः ॥ सर्वेद्रव्यसमापन्नाः श्रीमन्तोभद्रचारिणः ॥ राजाभवतुधर्मिष्ठो मंत्रिणोनीतिचारिणः ॥ सर्वेलोकाःसुवृत्ति
स्थाभवन्तुधर्मसाधिनः ॥ माभून्कश्चिद्दुराचार श्चौरोदुष्टश्च वञ्चकः ॥ दरिद्रोदुर्भगादीनो मदमानाभिगर्वितः ॥ सर्वसत्वसमाचाराः परिशु
द्धिमण्डलाः ॥ स्वस्वकुलव्रतारक्ताः प्रचरन्तुजगद्धिते ॥ सर्वेभद्राशयाः सन्तः संबोधिव्रतचारिणः ॥ त्रिरत्नभजनंकृत्वा संचरन्तांसदाशुभे ॥
आकाशषट्गगणभूमिमितेशुभाब्दे पक्षेऽसितेरसमितेथौचभृगुवर्गवेहि ॥ शाक्येश्वरोनिजपरागतभद्रकल्पं पूर्णीकृतंकुलिशवंशसमुद्भवेन ॥१॥